आचार्यपाठ्यक्रमः- एम.ए.पाठ्यक्रमश्च चतुर्षु सत्रार्द्धेषु विभक्तः। प्रतिसत्रार्द्धं पञ्चपत्राणि भवन्ति। पाठ्यक्रमे आहत्य विंशतिः पत्राणि भवन्ति। प्रतिसत्रार्द्धं पञ्चमं पत्रम् ऐच्छिकम्। अन्यानि अनिवार्यपत्राणि तेषां पाठ्यांशाः पूर्णरूपेण (१००%) संस्कृते उपलभ्यन्ते। परञ्च M.A. इत्यत्र पाठ्यांशाः संस्कृतमाध्यमेन हिन्दीमाध्यमेन च विद्यते।

1. **शास्त्रिशिक्षाशास्त्रिपाठ्यक्रमः(B.A.+Bed)**- विश्वविद्यालयद्वारा चतुर्वर्षीयः शास्त्री-शिक्षाशास्त्रिपाठ्यक्रमः प्रचाल्यते। अस्मिन् पाठ्यक्रमे प्रथमवर्षे नव सैद्धान्तिकपत्राणि सन्ति। द्वितीयवर्षे च नव सन्ति। तृतीयवर्षे नव पत्राणि सन्ति। चतुर्थवर्षे त्रीणि सैद्धान्तिकपत्राणि, (प्रायोगिक शिक्षणाभ्यासः, संस्कृत एवं हिन्दी आहत्य चत्वारिंशत् पाठाः वर्षचतुष्टयेन **1000** अङ्कानां सैद्धान्तिक-प्रायोगिकशिक्षणविषयाः सन्ति। सैद्धान्तिक-प्रायोगिकविषयाणां च पाठ्यांशाः हिन्दीविषयमतिरिच्य पूर्णरूपेण संस्कृतमाध्यमेन उपलभ्यमानाः सन्ति।
2. परीक्षासु प्रश्नोत्तरपत्रिकायाः माध्यमोऽपि संस्कृतमेव भवेदिति पारम्परिकस्नातकोत्तपाठ्यक्रमेषु सर्वेष्वपि अनुशासनं विश्वविद्यालयः करोति । एतद्वर्जयित्वापि विद्यावारिधौ प्रवेशेच्छुकानां समेषां विद्यार्थिनां अध्ययनाध्यापनयोः माध्यमः तथैव शोधप्रबन्धलेखनस्य माध्यमोऽपि संस्कृतमेव भवेदिति नियमो विश्वविद्यालयेन आदिष्टः।
3. विद्यार्थिनां संस्कृतसम्भाषणाय, शास्त्रगतगूढतत्त्वावगमोत्तरं समाजे सारल्येन एवं विद्वत्सभायां सुष्ठुतया प्रतिपादनार्थं 'वाग्वर्धिनी' नामकं साप्ताहिकं सदः संस्कृतभाषायां विश्वविद्यालयेन कार्यते। एते सर्वेऽपि कार्यक्रमाः संस्कृतभाषायां सञ्चालिताः भवन्ति।

| File Description | Document |
|---|---|
| Provide UG and PG Syllabus prepared in Sanskrit | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.1.4_1716024975_12674.pdf) |
| Provide link of the University website | View Document (https://www.mpsvv.ac.in/index.php/en/ug-shastri-syllabus-outcome) |

**1.2 Academic Flexibility**

***1.2.1 Whether the University has designed and offered any Innovative Courses/ Courses in emerging area/ Sanskrit based courses including scientific and technical literature leading to both traditional and modern degrees (e.g. Shastri, B.Sc. etc) with combination of yoga/ Ancient and Modern Mathematics/ Economics/ Management/ Law/ Computer Science/ Theoretical Ayurveda/ Krishi-parashara/ Vrikshayurveda etc. If yes give details.***

***विगतेभ्यः पञ्चभ्यः वर्षेभ्यः प्रवर्तितेषु सर्वेषु विविधायामवस्तु पाठ्यपत्रेषु (वैज्ञानिक-प्रौद्योगिक-साहित्यसमाश्रयेण शास्त्री/ बीएस्.सी-प्रभृति पारम्परिकाधुनिकोपाधिनाम्ना योगशास्त्रस्य प्राचीन-आधुनिकगणितयोः/ अर्थशास्त्रस्य/ प्रबन्धनशास्त्रस्य/ विधिशास्त्रस्य/ सङ्गणकविज्ञानस्य/ आयुर्वेदसिद्धान्तस्य (दर्शनस्य)/ कृषिपाराशरस्य/ वृक्षायुर्वेदस्य च सङ्घटनेन समारब्धानि नवीनपाठ्यपत्राणि तथा उदयमानविषयकपाठ्यपत्राणि/ संस्कृताश्रितपाठ्यपत्राणि) अभिनवपाठ्यपत्राणि।***

**Answer:**

सामाजिकीं स्थितिं वीक्ष्य अपेक्षानुगुणं समये समये परिवर्त्यमाना शिक्षाव्यवस्था देशम् उन्नतिं प्रापयति। संस्कृतवाङ्मये विद्यमानानां मौलिकानां व्यक्तेः, समाजस्य, देशस्य, विश्वस्य च क्षेमवर्धकानां सर्वशान्तिप्रदानां च विषयाणां शैक्षिकविधिमाध्यमेन सह प्रदानाय महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः सङ्कल्पबद्धः वर्तते। विश्वविद्यालयस्य तदनुरूपाः गतिविधयः वर्तन्ते।

तत्र कौटिलीयार्थशास्त्रम् एम.ए संस्कृतपाठ्यक्रमे, आयुर्वेदसिद्धान्तः, एम. ए योगपाठ्यक्रमे वृक्षायुर्वेदः, एम.ए ज्योतिर्विज्ञानपाठ्यक्रमे, संगणकविज्ञानं शास्त्रिपरीक्षापाठ्यक्रमे च विशेषरूपेण स्थापिताः विद्यन्ते । एवमेव एतेषु पाठ्यक्रमेषु प्राचीनैः पाठ्यपत्रैः सह कालोचितानि कानिचन नवीनपाठ्यपत्राणि स्वीकृतानि वर्तन्ते। शास्त्रिपाठ्यक्रमे आचार्यपाठ्यक्रमे च सिद्धान्तज्यौतिषविषयके प्राचीनगणितसम्बन्धीनि पत्राणि भवन्ति। तत्र शास्त्रिपाठ्यक्रमे सिद्धान्तशिरोमणिः, सिद्धान्ततत्त्वविवेकः, केतकीयग्रहगणितम् इतीमानि पत्राणि भवन्ति। आचार्यपाठ्यक्रमे लीलावती, सरलत्रिकोणमितिः, रेखागणितम्, गोलपरिभाषा सूर्यसिद्धान्तः इतीमानि पत्राणि प्राचीनगणितसम्बन्धीनि सन्ति। गोलस्य स्थितिं ग्रहाणां गतिञ्च निर्दुष्टतया प्रतिपादयितुं ज्योतिर्विज्ञाने आश्रितस्य प्राचीनस्य गणितस्य परिचयः एतैः पाठ्यपत्रैः सम्पद्यते। 'सिद्धान्तशिरोमणिः' इति पत्रेण भारतीयगणितपद्धत्या ग्रहणकालस्य निर्णयः निर्दुष्टतया ज्ञातुं शक्यते। फलितज्योतिषविषयके प्राचीनगणितम् आश्रिते आचार्यपाठ्यक्रमे सूर्यसिद्धान्तः, भारतीयकुण्डलीविज्ञानम् इति पत्रे भवतः। भारतीयकुण्डलीविज्ञानम् इति पत्रे प्राचीनगणितमाश्रित्य कुण्डलीनिर्माणविधानं प्रतिपादितमस्ति।

संस्कृतच्छात्राणां सर्वशास्त्रेषु अबाधितगतिर्भवतु इति धिया महाभारतम्, रघुवंशमहाकाव्यम, किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितम्, तर्कसङ्ग्रहः, लघुजातकम्, षट्पञ्चाशिका, सारावली, जन्मपत्री विज्ञान रचना, पौरोहित्य कर्म प्रशिक्षक, ग्रहशान्तिपद्धति, पारिभाषिकपदार्थसंग्रहः, न्यायशास्त्र का इतिहास, पौरोहित्यकर्मपद्धति, ग्रहशान्तिपद्धतिः, स्मार्त यज्ञदीपिका इत्यादयः ग्रन्थाः आधुनिकविषयानामवगमनाय वैकल्पिकविषयत्वेन पाठ्यांशे स्वीकृताः। उज्जैनक्षेत्रस्य माहात्म्यसंरक्षणाय ब्राह्मणवटूनां योग्यतासम्पादनाय एते विषयाः अत्यन्तमुपयोगिनः भवन्ति।

अभिनवपाठ्यक्रमेषु M.Sc. Yoga, M.A. Vaastu, M.A. Yoga, इत्यादयः कार्यक्रमाः सञ्चाल्यमानाः सन्ति। एतादृशेषु आधुनिककार्यक्रमेषु हिन्दीभाषायां संस्कृतस्य गूढविषयाणां चर्चा सरलरूपेण कृता भवन्ति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.2.1_1716110133_1267 |
| Minutes of relevant Academic Council/BOS meeting(अध्ययनमण्डलस्य/ विद्वत्परिषदः उपवेशनकार्यवृत्तम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.2.1_1715825122_1267 |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/index.php/en/ph-d-diploma-certificate-syllabus-outcome) |

***1.2.2 Percentage of Programmes in which Choice Based Credit System (CBCS)/ elective course system has been implemented (Preceeding academic year data)***

***विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या/ ऐच्छिकपाठ्यपत्रप्रणाल्या प्रवर्तितानां पाठ्यक्रमाणां प्रतिशतता। (प्रगतवर्षस्य दत्तांशः)***

**Answer:** 87.5

1.2.2.1 Number of Programmes in which CBCS/ Elective course system implemented.

विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या/ ऐच्छिकपाठ्यपत्रप्रणाल्या प्रवर्तितानां पाठ्यक्रमाणां सङ्ख्या।

Answer: 21

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.2.2_1715827059_12674.p |
| Minutes of relevant Academic Council/BOS meetings (अध्ययनमण्डलस्य/ विद्वत्परिषदः उपवेशनकार्यवृत्तम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.2.2_1715825822_12674.p |
| Institutional data (Data Template)( सांस्थानिकदत्तांशः देयः (दत्तांशप्रारूपम्) ) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.2.2_1715825808_12674.xl |

***1.2.3 University provides the flexibility of bringing together the conventional face-to-face mode, MOOCs, online education and allow students to choose and combine the courses they are interested in. Provide details.***

***विश्वविद्यालयेन प्रत्यक्षशिक्षणविधायाः सामूहिकमुक्तान्तर्जालपाठ्यक्रमस्य (MOOCs) अतितन्त्रीयशिक्षाणां च परस्परसमन्वयनाय नमनीयता प्रकल्पिता, येन स्वरुचिपूर्णानां पाठ्यक्रमाणां चयने संयोजने च च्छात्राः अनुमताः। क्रियान्वयनविवरणं देयम्।***

**Answer:**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये छात्राणां स्वरुचिपूर्णानां चयने संयोजने वा स्वातन्त्र्यम् प्रदत्तम्। शास्त्र/ विषयचयने NEP नेशनल एजुकेशन पॉलिसी 2020 इति नीत्या निर्मितेषु पाठ्यक्रमेषु विषयचयने छात्राणां स्वातन्त्र्यं कल्पितमस्ति विश्वविद्यालयेन। यथा- शास्त्रिपाठ्यक्रमे अधीतवेदान्तः छात्रः आचार्यपाठ्यक्रमे साहित्यं फलितज्योतिषम् अन्यद्वा शास्त्रं स्वीकर्तुं शक्नोति। एवम् शास्त्रिपाठ्यक्रमे अन्यतमं शास्त्रम् आचार्यपाठ्यक्रमे अन्यतमं शास्त्रं स्वीकर्तुं शक्यते इति शास्त्रचयने नमनीयता वर्तते।

एवमेव आचार्य / एम. ए. पाठ्यक्रमे वैकल्पिकपत्रे मुख्यविषयाद् अतिरिक्तम् अन्यसङ्कायीयं विषयं ग्रहीत्वा अध्ययनस्य अवसरः दीयते। यथा- शास्त्रिपाठ्यक्रमे अधीतवेदान्तः छात्रः आचार्यपाठ्यक्रमे साहित्यं फलितज्योतिषम् अन्यद्वा शास्त्रं स्वीकर्तुं शक्नोति। एवम् शास्त्रिपाठ्यक्रमे अन्यतमं शास्त्रम् आचार्यपाठ्यक्रमे अन्यतमं शास्त्रं स्वीकर्तुं शक्यते इति शास्त्रचयने नमनीयता वर्तते।
अधितन्त्रिशिक्षणे शिक्षकैः पाठ्यांशानां PPT व्याख्यानानां आडियो/वीडियो तथा लेखाः अथ च युटुबमध्ये व्याख्यानानि संस्थाप्य तस्य लिंक वेवसाइटमध्ये दत्तमस्ति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.2.3_1716 |
| Provide Link to MOOCs, online Platform(सामूहिकमुक्तान्तर्जालपाठ्यक्रमस्य अन्तर्जालानुबन्धः,) | View Document (https://mpsvv.ac.in/index.php/en/students/lms) |

**1.3 Curriculum Enrichment**

***1.3.1 Institution integrates cross cutting issues as reflected in Sanskrit literature relevant to Gender, Environment and Sustainability, Human Values and Professional Ethics and traditional system of shastric***

***learning into the Curriculum.***

***संस्था संस्कृतसाहित्ये शास्त्रपरम्परायां च प्रतिफलितान् स्त्रीपुरुष-पर्यावरण-स्थिरता-मानवीयमूल्य-वृत्तिनीति-पारम्परिकशास्त्राधिगमप्रणालीविषयकान् सर्वत्रानुस्यूतांशान् पाठ्यचर्यायां समन्वयति।***

**Answer:**

संस्कृतसाहित्यस्य उपदेशसारः वर्तते **"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्"।।** इति। वेदाः, शास्त्राणि च प्रभुसम्मिततया, पुराणानि मित्रसम्मिततया, काव्यानि कान्तासम्मिततया च जनान् उपदिशन्ति। अतः एतेषां संस्कृतवाङ्मयगतानां ग्रन्थानाम् अध्ययनस्य उपदेशप्राप्तिपूर्वकं तथा आचरणम् एव मुख्यं प्रयोजनम्। ततः जनाः परस्परं सामरस्येन जीवन्तः सामाजिकीं शान्तिं वर्धयेयुः।

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः वेदादित्रिविधमपि साहित्यम् आश्रित्य विविधाः पाठ्यचर्याः समचालयत्। पाठ्यक्रमेषु स्थितानि समता, स्थिरता, एकता, देशभक्तिः, अहिंसा, सत्यम्, अस्तेयः, शौचम्, इन्द्रियनिग्रहः इत्यादीनि मूल्यानि प्राकाश्यं नीतानि। दाम्पत्यधर्मः, राजधर्मः, पौरजानपदधर्मः, कौटुम्बिकाचाराः, पर्यावरणस्य महत्त्वम्, वृत्तिनीतिः इति नैके विषयाः पाठ्यचर्यायां समन्वयन्ति। तादृशाः सङ्क्षेपतः अत्र उल्लिख्यन्ते।

**लैङ्गिक-जागरुकता/समानता**

विश्वविद्यालयः लैङ्गिकजागरुकतायै समानतायै च प्रतिबद्धो वर्तते। अत्र सञ्चाल्यमानेषु पाठ्यक्रेषु संस्कृतवाङ्मये वर्तमानाः एतत् विषयसन्दर्भाः विषयाः प्रतिबिम्बिताः भवन्ति।

**पर्यावरणस्थिरता (Sustainability) -**

विश्वविद्यालयः पर्यावरणस्य स्थिरताविषये सर्वेषु हितधारकेषु संवेदनशीलतायाः सहनशक्तिः भवतु इति सर्वेषां सम्भाव्यसाधनानाम् अन्वेषणं करोति। सर्वेषु शिक्षणविभागेषु पर्यावरणस्य विविधाः आयामाः पाठ्यक्रमे सफलतया समावेशिताः सन्ति । प्राचीनभारतीयदर्शने, वैदिकशास्त्रेषु,शास्त्रीयग्रन्थेषु इत्यादिषु वर्णितमानवमूल्यानि व्यावसायिकनीतिशास्त्राणि च विश्वविद्यालयस्य पाठ्यक्रमे, एतासां योजनानां अग्रेसराय आनीतानि सन्ति। शास्त्री-आधारपाठ्यक्रमः पर्यावरणमनुसृत्य निर्धारितम्। येन पर्यावरणसंरक्षणाय जनजागृतिः दायित्वबोधश्च भविष्यति।

**शास्त्राध्ययनस्य पारम्परिकपद्धतिः-**

पारम्परिकसंस्कृतग्रन्थानां गहनाध्ययनस्य उद्देश्यं कृत्वा सर्वैः विभागैः पाठ्यक्रमस्य परिकल्पना कृता अस्ति । मूलग्रन्थानां पठनेन शिक्षणप्रक्रियायां वास्तविकशैक्षणिकरुचिः वर्धते।

**मानवीयमूल्यानि व्यावसायिकनीतयश्च –**

मानवीयमूल्ययुक्ताः निम्नलिखिताः ग्रन्थाः पाठ्यक्रमे विहिताः-

शास्त्रिपाठ्यक्रमे साहित्यविषयस्य प्रथमप्रश्नपत्रे भतृहरेः नीतिशतकं निर्धारितं वर्तते। येन अध्ययनेन छात्राः मानवीयतासम्पन्नाः शास्त्रानुगुणम् उचितानुचितबोधपूर्वकं सम्यग् व्यावसायिकवृत्तौ च समर्थाः भवन्ति। एवमेव आचार्यपाठ्यक्रमस्य अद्वैतवेदान्तविषये प्रथमसत्रार्द्धे श्रीमद्भगवद्गीतायाः त्रयोदशतमोऽध्यायः पाठ्यांशे विद्यते। यत्र छात्राः क्षेत्रक्षेत्रज्ञविभागयोगसंम्बन्धिविषयवर्णनेन मानवीयमूल्यमवगच्छन्ति। तत्रैव आचार्यतृतीयसत्रार्द्धपाठ्यक्रमे गीतायां मोक्षविषयकं, वस्तुतः त्यागस्वरूपं किम् इत्यादिवषयान् अवगच्छन्ति।

शुक्लयजुर्वेदे **'इषे त्वो र्जेत्वा'** इत्यादिमन्त्रेषु अस्तेयः गवादिपशुसंरक्षा, सज्जनसंख्यावृद्धिः। **'इदमहम् अनृतात्सत्यमुपैमि'** इत्यादिमन्त्रेषु सत्यमार्गः। अद्वैतवेदान्ते कठोपनिषद् इति पत्रे यमनचिकेतसोः संवादेन आध्यात्मिकं मूल्यम्।

चम्पूरामायणम्, नलचम्पूः इत्यादिग्रन्थेषु वर्णितानि मूल्यानि सर्वदर्शने योगसूत्रम् इति पत्रे भारतीययोगदर्शनस्य सर्वोपादेयता पुराणेतिहासे वाल्मीकिरामायणम् इति पत्रे राज्ञः प्रजापालने अवधेयाः अंशाः। अद्वैतवेदान्ते मुण्डकोपनिषद् इति पत्रे जीवब्रह्मणोः ऐक्यभावःविशेषतया: छात्रैः अवधेयाः भवन्ति।

साहित्ये अभिज्ञानशाकुन्तलम् इति पत्रे स्त्रीणां पुरुषाणां च समाधिकारः। महर्षेः कण्वस्य गुरुकुले महर्षेः मारीचस्याश्रमे च वसतां तपस्विन्यः मुनिकुमाराश्च इत्येतेषां स्त्रीपुरुषाणां सहाध्ययनम्। कन्यायाः निजमनोरथानुसारं पतिवरणम्। दम्पत्योः सामरस्येन जीवनम्। पौरोहित्ये श्राद्धविवेक इति पत्रे पूर्वजानां स्मरणम्। अद्वैतवेदान्ते तैत्तिरीयोपनिषद् इति पत्रे अधिलोक-अधिज्यौतिष-अधिविद्य-अधिप्रज-अध्यात्मनामिकाः पञ्चमहासंहिताः। ईशावास्योपनिषद् इति पत्रे अधर्ममार्गस्य परित्यागः। आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं सन्धानम्। इत्यादि-उपनिषद्वाक्यैः पाठ्यांशैः पारम्परिकशिक्षाप्रणालीपरिचयश्च वर्णितो विद्यते।

वेदान्तसारः इति पत्रे आध्यात्मिकं मौल्यम्। पर्यावरणशिक्षा इति पत्रे प्रकृतिसंरक्षणम्, जलसंरक्षणम्, भूमिसंरक्षणम् च। अद्वैतवेदान्ते श्रीमद्भगवद्गीता इति पत्रे अहङ्कारपरित्यागः, आहारपद्धतिः, सत्त्वरजस्तमसां गुणानां स्वरूपम्, तत्प्रभावः च।

किरातार्जुनीयम् इति पत्रे राजनैतिकविचाराः। व्याकरणशास्त्रम् इति पत्रे वैज्ञानिकविधिना उच्चारणप्रक्रियायाः ज्ञानं महत्त्वञ्च। रघुवंश इति पाठ्यांशेन सुभाषितैश्च सन्मार्गोपदेशः। इत्येतानि सार्वकालिकतया अत्यन्तोपादेयानि तत्त्वानि शास्त्रिपाठ्यक्रमे विद्यमानानि पाठ्यचर्यायाम् अनुस्यूततया समन्वयं लभन्ते।

आचार्यपाठ्यक्रमे व्याकरणशास्त्रे शब्दसाधुत्वप्रक्रियाविज्ञानं, परिष्कारः, शब्दतत्त्वस्य ब्रह्मरूपत्वेन प्रतिपादनम्। न्यायदर्शने प्रामाणिकरीत्या द्रव्यगुणकर्मादीनां वर्णनम्, परमाणुतः द्व्णुकादिक्रमेण सृष्टिप्रक्रिया निरूपणम्। प्रत्यक्षादिप्रमाणेन प्रमात्मकज्ञानोत्पत्तिप्रक्रिया। अद्वैतवेदान्ते छान्दोग्योपनिषद् इति पत्रे सत्यस्य अभिव्यक्तिमार्गः। अद्वैतसिद्धिः इत्यादिविषयाः आस्तिकतायाः स्थैर्यसम्पादकाः।

एवं महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयद्वारा सञ्चालितेषु पाठ्यक्रमेषु, संस्कृतसाहित्ये विद्यमानाः मौलिकाः विषयाः, शास्त्रपरम्परया सिद्धाः समाजे अन्वयं लभमानाः अभ्युन्नतिकारिणश्च विषयाः युक्ताः सन्ति।

| File Description | Document |
|---|---|
| The list of courses where the above topics are included प्रधानानां पाठ्यपत्राणां सूची यत्र उपर्युक्तविषयाः योजिताः। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.1_1715890871_12674.pdf) |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.1_1716029584_12674.pdf) |
| A description of courses which address Gender, Environment and Sustainability, Human Values and Professional Ethics, traditional system of shastric learning स्त्रीपुम्भिदासंवेदने, पर्यावरणस्य स्थिरतायाः विकासस्य मानवीयमूल्य-वृत्तिनीति-पारम्परिकशास्त्राध | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.1_1715890877_12674.pdf) |

***1.3.2 Number of value-added courses imparting transferable and life skills offered during the last five years.***

***विगतपञ्चवर्षेषु प्रचालितानां स्थानान्तरार्हाणां जीवनकौशलप्रदानां मूल्यसंवर्धकानाञ्च पाठ्यपत्राणां सङ्ख्या।***

**Answer:** 17

1.3.2.1 How many new value-added courses are added within the last 5 years

विगतपञ्चवर्षेषु कति मूल्यसंवर्धक-पाठ्यपत्राणि योजितानि?

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 5 | 5 | 4 | 2 | 1 |

| File Description | Document |
|---|---|

| | |
|---|---|
| List of value added courses (Data Template) combined with 1.3.3 मूल्यसंवर्धकपाठ्यपत्राणां सूची दत्तांशप्रारूपानुगुणं सांस्थानिकदत्तांशः 1.3.3 बिन्दुना युक्ता। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.2_1715897855_12674.xls |
| Brochure or any other document relating to value added courses पञ्चदशतः विंशतिहोरापर्यन्तं ततोऽधिकं वा प्रचालितानां मूल्यसंवर्धकपाठ्यपत्राणां नामानि। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.2_1715895865_12674.pd |
| Any additional information अतिरिक्ताः सूचनाः। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.2_1715896950_12674.pd |

| Other Upload Files | |
|---|---|
| 1 | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.2_1715896966_12674.pdf) |

***1.3.3 Average Percentage of students enrolled in the courses under 1.3.2.***

***1.3.2 बिन्दोः अनुरूपं जीवनकौशलप्रदे मूल्यसंवर्धके च पाठ्यपत्रे प्रविष्टानां छात्राणां प्रतिशतता।***

**Answer:** 19.82

1.3.3.1 Number of students enrolled in value-added courses imparting transferable and life skills offered year-wise during the last five years

विगतपञ्चवर्षेषु प्रचालितानां स्थानान्तरार्हाणां जीवनकौशलप्रदानां मूल्यसंवर्धक-पाठ्यपत्राणां प्रतिवर्षीया सङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 128 | 226 | 48 | 29 | 14 |

| File Description | Document |
|---|---|
| List of students enrolled (Data Template) combined with 1.3.2 प्रविष्टानां छात्राणां सूची (दत्तांशप्रारूपम्) 1.3.2 बिन्दुना युक्ता। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.3_1716036552_12674.xlsx) |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.3_1716037953_12674.pdf) |

***1.3.4 Percentage of students undertaking field projects/ internships/ training programmes/ summer assignments etc. (Preceeding academic year data)***

***क्षेत्रकार्यपरियोजनासु अन्तःप्रशिक्षणेषु प्रशिक्षणपाठ्यक्रमेषु ग्रीष्मावकाशस्तकार्येषु गृहीतभागानां छात्राणां प्रतिशतता। (प्रगतवर्षस्य)***

**Answer:** 19.26

1.3.4.1 Number of students undertaking field project or internships

क्षेत्रकार्यपरियोजनासु ग्रीष्मावकाशादिषु कार्याणि कुर्वताम्/ अन्तःप्रशिक्षणं प्राप्नुवतां छात्राणां सङ्ख्या।

Answer: 89

| File Description | Document |
|---|---|
| List of Programmes and number of students undertaking field projects / internships (Data Template) पाठ्यक्रमाणां तथा क्षेत्रकार्यपरियोजनाः विरामकालीनकार्याणि कुर्वताम्/ अन्तःप्रशिक्षणं प्राप्नुवतां छात्राणां सूची (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.4_1716110205_12674.xlsx) |
| Any additional information | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.4_1716034787_12674.pdf) |

***1.3.5 University Curriculum has units and sub-units of the modern subjects like History, Political Science, Education, Psychology, Economics and statistics etc. have contents from Sanskrit based knowledge and being taught in Sanskrit medium. Modern Sanskrit Literature is also included in the curriculum, Provide details.***

***इतिहास-अर्थशास्त्र-शिक्षाशास्त्र-मनोविज्ञान-सङ्ख्याशास्त्र-समाजशास्त्र-राज्यशास्त्रेत्याद्याधुनिक-विषयभागोपभागाः अपि संस्कृतमाध्यमेन पाठ्यमानाः सन्ति। आधुनिकसंस्कृतसाहित्यमपि पाठ्यचर्यायामन्तर्भावितम्, विवरणं देयम्।***

**Answer:**

**संस्कृतमाध्यमेन पाठ्यमानाः भागोपभागाः-**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयद्वारा शास्त्रिपाठ्यक्रमः, आचार्यपाठ्यक्रमः, एम. ए. ज्योतिर्विज्ञानपाठ्यक्रमः, एम.ए. योगपाठ्यक्रमः एम.ए. संस्कृतपाठ्यक्रमः शिक्षाशास्त्रिपाठ्यक्रमः (बीए बीएड) स्नातक-स्नातकोत्तरपत्रोपाधिपाठ्यक्रमः, च सञ्चालिताः सन्ति। एतेषु पाठ्यक्रमेषु संस्कृतं/शास्त्रीयविषयैः सह आधुनिकाः विषयाः अपि युक्ताः वर्तन्ते। भारतीयज्ञानपरम्परायाः ज्ञानेन सह विश्वविद्यालयस्य छात्राः आधुनिकविषयेषु नवाचारेषु च विशिष्टं ज्ञानं प्राप्नुयुः, तेन समाजे स्वातन्त्र्येण कालोचितं योगदानं कर्तुं च ते प्रभवेयुः इति उद्देश्येन तान् आधुनिकानपि विषयान् स्वीकृत्य विन्यस्तः पाठ्यक्रमः सञ्चालितो वर्तते।

शास्त्री, बी.ए आनर्स, तृतीयवर्षे संस्कृतपाठ्यक्रमे आधुनिक संस्कृतसाहित्यस्य समावेशः कृतो विद्यते। तत्र अप्पाशास्त्री, पण्डिता क्षमाराव, जानकीवल्लभशास्त्री, स्वामीरामभद्राचार्य, रेवाप्रसादद्विवेदी, मिथिलाप्रसादत्रिपाठी, राधावल्लभत्रिपाठी, राजेन्द्रमिश्रप्रभृतीनां कवीनां काव्यरचनाः पाठ्यांशे स्वीकृताः सन्ति।

विश्वविद्यालयस्य पाठ्यक्रमस्य परिकल्पने विश्वविद्यालयस्य दृष्टिः (Mission) च सारभूतम् अस्ति। महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये कौशलप्रधानपाठ्यक्रमाणां महत्त्वं दीयते। नूतनपाठ्यक्रमानाणाम् अध्ययनेन कार्यजीवने पूर्णता भवति। नवीनशिक्षणकौशलेन व्यक्तिः सम्यक् कार्यं कर्तुं शक्नोति। एतेन छात्रः अधिकं आत्मविश्वासयुक्तः व्यक्तिवादी भवति। नूतनविषयाणां शिक्षणेन संस्कृतछात्राणां उपलब्धिभावना, ज्ञानवृद्धिभावना, सृजनशीलता, आत्मविश्वासः च विकसिताः भवन्ति। कार्यक्रमसूचौ च पारम्परिक-आधुनिकमूल्यानां मिश्रणम् अस्ति। पर्यावरणशिक्षा,उद्यमिता-इतिहासः प्रबन्धनम्, मनोविज्ञानम्, अर्थशास्त्रम्, इत्यादयः विषयाः छात्राणां कृते पाठ्यन्ते। संस्कृतभाषायाः क्षेत्रं विस्तृतं यत् अन्ये विविधाः अध्ययनप्रवाहाः समाविष्टाः सन्ति।

शास्त्री, बी.ए आनर्स, शास्त्रिशिक्षाशास्त्रीप्रभृतिषु पाठ्यक्रमेषु आधुनिकविषयाणां सन्निवेशः कृतो वर्तते।

| File Description | Document |
|---|---|
| List of units and sub-units of the modern subjects आधुनिक-विषयभागोपभागानां सूची। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.5_1716040528_12674.pdf) |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.3.5_1716047484_12674.pdf) |

**1.4 Feedback System**

***1.4.1 Structured feedback received from***

***1) Students***

***2) Teachers***

***3) Employers***

***4) Alumni***

***5) Parents***

***for design and review of syllabus semester wise/year-wise***

***अर्धसत्रप्रणाल्याः, वार्षिकसत्रप्रणाल्याः वा पाठ्यांशसंरचनार्थं समीक्षार्थञ्च संरचिता प्रतिपुष्टिः स्वीक्रियते -***

***१. छात्रेभ्यः***

***२. अध्यापकेभ्यः***

***३. वृत्तिदातृभ्यः***

***४. पूर्वच्छात्रेभ्यः***

***५. अभिभावकेभ्यः***

**Answer:** A. Any 4 of the above (अ. उपरि निर्दिष्टेषु कानिचित् चत्वारि)

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.4.1_1715900341_12 |
| Any additional information (Upload) अतिरिक्ताः सूचनाः (उपारोपणीयम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.4.1_1716046066_12 |
| Action taken report of the University on feedback report as stated in the minutes of the Governing Council, Syndicate, Board of Management (Upload) हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनं शासिपरिषदः कार्यवृत्तानुरूपं विश्वविद्यालयेन कृतकार्यस्य प्रतिवेद | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.4.1_1716046590_12 |

| | |
|---|---|
| URL for stakeholder feedback report URL हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनम् | View Document (https://www.mpsvv.ac.in/index.php/en/feedback-survey) |

***1.4.2 Feedback processes of the institution may be classified as follows:***

***संस्थायाः प्रतिपुष्टिप्रक्रिया अधोलिखितक्रमेण विभज्य दर्श्यते –***

**Answer:** A. Feedback collected, analysed, action taken and available on website(अ. प्रतिपुष्टिः सङ्गृहीता, विश्लेषिता, क्रियान्विता च, जालस्थाने उपलभ्यते च।)

| File Description | Document |
|---|---|
| Upload Stakeholder feedback report, Action taken report of the university on it as minuted by the Governing Council, Syndicate, Board of Management. हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनं, शासिपरिषदः कार्यवृत्तानुरूपं विश्वविद्यालयेन क्रियान्वयस्य प्रतिवेदनम् उपारोपणीयम्। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.4.2_1716048479_12674.pdf) |
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.4.2_1716048765_12674.pdf) |
| URL for feedback report हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनस्य सन्धानम्। | View Document (https://www.mpsvv.ac.in/index.php/en/feedback-survey) |

***1.4.3 The feedback thus obtained is***

***• Discussed in the Statutory Bodies of the University like Academic Council/ Executive Council etc.***

***• Is used for restructuring the curriculum***

***• Discussed with Traditional scholars/ Peers***

***इत्थं सङ्गृहीता प्रतिपुष्टिः -***

***· विश्वविद्यालयस्य विद्वत्परिषदि/ शासिपरिषदि/ न्यायसभायाम्/ अन्येषु प्राधिकारेषु चर्चिता।***

***· पाठ्यचर्यायाः पुनः निर्माणाय उपयुज्यते।***

***· पारम्परिकैः विद्वद्भिः प्रवरगणैः सह चर्चिता।***

**Answer:**

- महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः स्वकीयहितधारकेभ्यः प्रतिपुष्टिं सङ्गृह्य पाठ्यचर्यायाः निर्माणे प्रतिपुष्टेः प्रयोगं करोति। अस्य विश्वविद्यालयकार्याणि विविधपरिषद्द्वारा प्रवर्तन्ते। विविधेभ्यः हितधारकेभ्यः युगानुरोधेन प्रतिपुष्टिं स्वीकर्तुं प्रतिपुष्टेः स्वरूपं

निर्धारयितुं विशेषज्ञैः मार्गदर्शनं प्राप्तम्। विगतपञ्चवर्षाणां 2018 तः 2023 पर्यन्तं विविधसान्दर्भिकप्रश्नानुसारं विविधेभ्यः हितधारकेभ्यः युगानुरोधेन प्रतिपुष्टिं संकलय्य पाठ्यचर्यायामावश्यकतानुगुणं परिवर्तनानि विहितानि। प्रतिपुष्टेः प्रत्येकं हितधारकेभ्यः (छात्त्रेभ्यः,अध्यापकेभ्यः, पूर्वछात्त्रेभ्यः, नियोजकेभ्यः) प्राप्तस्य दत्तांशस्य विशुद्धिं विधाय पुनरावृत्तिदोषान् निवार्य वैज्ञानिकरीत्या व्यवस्थीकरणं कृतम्। प्राप्तदत्तांशानां विद्यापरिषदि चर्चां विधाय अनुमोदनं प्राप्तम्।

- विविधहितधारकेभ्यः प्राप्तस्य प्रतिपुष्टेः सम्बद्धविशेषज्ञैः साकं चर्चासत्रेषु विमर्शान् कृत्वा बहुमूल्यानि मन्तव्यानि, संस्तुतयः सङ्कलितानि। सर्वेषामपि मन्तव्यानां, संस्तुतीनां व्यावहारिकप्रयोगणां विश्वविद्यालयीयपाठ्यचर्यासु पाठ्येतरक्रियासु कर्तुं संस्थागतसर्वेष्वपि स्तरेषु चिन्तनं विहितम्। विविधहितधारकेभ्यः प्राप्तप्रतिपुष्टेः प्रयोगं विविधनीतिनिर्माणकार्येषु साहाय्यं करोति। विविधहितधारकेभ्यः प्राप्तप्रतिपुष्टिरस्माकं युगानुरूपपरिवर्तनानि संशोधनानि सूचयति।
- विविधहितधारकेभ्यः प्राप्तप्रतिपुष्टिः राष्ट्रिय-अध्यापक-शिक्षा-परिषदः(NCTE) निर्णयमनुसृत्य शिक्षाशास्त्रि-क्रियान्वयनं कर्तुं सूचयति। विविधहितधारकेभ्यः प्राप्तप्रतिपुष्टिः निर्णयान् शास्त्रिकक्षासु क्रियान्वयनं कर्तुं सूचयति। विविधहितधारकेभ्यः प्राप्तप्रतिपुष्ट्यनुगुणं- शास्त्रिकक्षासु संगणकविज्ञानपाठ्यक्रमः छात्त्रेभ्यः अनिवार्यरूपेण योजितः।
- विविधहितधारकेभ्यः प्राप्तप्रतिपुष्ट्यनुगुणं शास्त्रिकक्षासु पर्यावरणविज्ञानपाठ्यक्रमः छात्त्रेभ्यः योजितः। छात्त्रेषु पर्यावरणस्य जागरूकता सम्पादनाय, वायु-जल-ध्वनिप्रदूषणं दूरीकर्तुं सतर्कता समुत्पादनाय पर्यावरणविज्ञानपाठ्यक्रमः प्रासङ्गिकः वर्तते।
- विद्यापरिषदः उपवेशने विविधहितधारकेभ्यः (अध्यापक-छात्त्र-पूर्वछात्त्र-वृत्तिदातृभ्यः) प्राप्तप्रतिपुष्टेः चर्चा कृता। ततः परिषदः सर्वे सदस्याः स्वकीयमतानि स्थापितवन्तः। उपवेशने निर्दिष्टेषु बिन्दुषु चर्चा विहिता। एतत्परिपाटीम् अनुसृत्य गतपर्याये पाठ्यक्रमाणां नवीकरणम्, परिवर्तनम्, परिवर्धनम्, इत्यादयः विषयाः अध्ययनमण्डलस्य पुरतः उपास्थाप्यन्ते। अपेक्षानुगुणं कार्यपरिषदः अनुशंसां स्वीकृत्य कार्यान्वयः कृतः। परिषदः निर्णयानुसारं तन्निर्देशमनुसृत्य विश्वविद्यालयः कार्यमकरोत्।
- विविधहितधारकेभ्यः प्राप्तस्य प्रतिपुष्टेः विश्लेषणं व्यावहारिकसंस्तुतयश्च अध्ययनमण्डले, संकायमण्डले, विद्यापरिषदि, कार्यपरिषदि, प्रेष्यते विचार्यते च। शैक्षिकानि प्राशासनिकानि, आनुसन्धानिकानि, प्राकाशनिकानि च कार्याणि विश्वविद्यालयस्य प्रगतेः साक्षात् सूचकानि भवन्ति। क्रियाशीलाः इमाः परिषदः निर्दिष्टानां कार्याणां निर्वाहे विशिष्टम् अनुभवम् आवहन्ति। विविधहितधारकेभ्यः (अध्यापकेभ्यः,छात्त्रेभ्यः,पूर्वछात्त्रेभ्यः,नियोजकेभ्यः) प्राप्तप्रतिपुष्टेः इमाः परिषदः प्रयोगं कुर्वन्ति।
- विविधहितधारकेभ्यः (अध्यापकेभ्यः,छात्त्रेभ्यः,पूर्वछात्त्रेभ्यः,नियोजकेभ्यः) प्राप्तप्रतिपुष्टेः निर्णयाय विद्यापरिषद् एव मुख्या भवति। तस्याः परिषदः अङ्गीकारात्परं प्रतिपुष्टेः निर्णीतस्य प्रकल्पस्य क्रियान्वयः क्रियते। शैक्षणिकपुरोगतिं प्राप्य विश्वविद्यालयः अन्यसंस्थाभिः सह स्पर्धितुम् ईहते। प्रतिपुष्टेः प्रयोगः पाठ्यक्रमरचनादिषु शैक्षिककार्येषु अविलम्बं लक्ष्यपूर्तये अध्ययनमण्डलं रचयितुम् इयं परिषत् प्रोत्साहयति अनुमन्यते च। अध्ययनमण्डलद्वारा अङ्गीकृतं निर्णयं परिशीलयति। अपेक्षानुगुणं परिष्कारं सूचयति। शैक्षणिकनिर्णयाः पूर्णतया छात्रकेन्द्रिताः छात्रप्रियाश्च भवेयुः, तदर्थं विद्यापरिषत् सततं तत्परा भवति। परिषदः कार्यतन्त्रस्य लक्ष्यं भवति अधीतशास्त्राः स्पर्धात्मके जगति अनतिश्रमेण उद्योगं लभेरन् इति।
- विद्यापरिषद् अध्ययनमण्डलम्, संकायमण्डलं च विश्वविद्यालयस्य शैक्षणिकीं कार्यप्रणालीं सम्पादयन्ति। विश्वविद्यालयस्य सर्वाङ्गिकविकासे एतेषां कार्ययोजना, काले अङ्गीक्रियमाणः निर्णयः, स्थाने दीयमाना प्रतिपुष्टिः च विशिष्टां भूमिकां वहति। विविधहितधारकेभ्यः (अध्यापकेभ्यः, छात्त्रेभ्यः, पूर्वछात्त्रेभ्यः, नियोजकेभ्यः) प्राप्तस्य प्रतिपुष्टेः प्रयोगः समाजस्य अध्येतृणां च अपेक्षाः सूक्ष्मं विज्ञाय शैक्षिकनिर्णयानां क्रियान्वयः कर्तव्यः। यतः स एव परिसरेषु परिणामजनकः। बी.ए.बी.एड. शिक्षाशास्त्रिपाठ्यक्रमस्य च शैक्षिककार्याणि विश्वविद्यालयस्य विद्यापरिषद् अनयोः संस्थयोः नियमान् परिशीलयति। तदविरोधेन विश्वविद्यालयस्योद्देश्यं साधयितुं कार्ययोजनाङ्करोति।
- महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य प्रत्येकविभागीयछात्रेभ्यः भौतिकमाध्यमेनापि प्रतिपुष्टेः संग्रहणं कृतमस्ति। इत्थं स विविधहितधारकेभ्यः (अध्यापकेभ्यः,छात्त्रेभ्यः,पूर्वछात्त्रेभ्यः,नियोजकेभ्यः) प्राप्तस्य प्रतिपुष्टेः प्रयोगः विशिष्टछात्त्रेभ्यः विश्वविद्यालयकल्याणाय कल्पते। विद्यापरिषदः अध्ययनमण्डलस्य च विविधहितधारकेभ्यः प्राप्तस्य प्रतिपुष्ट्याधारेणैव विश्वविद्यालयः पाठ्यपत्रं निर्धारयति। शास्त्रिपाठ्यक्रमे च अनिवार्यपत्रत्वेन **उद्यमिताविकासः इति** योजितम्। अद्यत्वे उद्यमिता विकासः सर्वत्र औद्योगोकक्षेत्रेषु अनिवार्यतयापेक्षितमस्ति। तेन संस्कृतपदवीधराणामौद्योगिकक्षेत्रे उद्योगावसराय विस्तारोभवत्।
- शास्त्रिपाठ्यक्रमे पर्यावरणमिति पत्रं योजितम्। समाजस्य प्रतिपुष्ट्यनुसारं विद्यापरिषदः क्रियान्वयनस्येदमन्यदुदाहरणम्। अस्य पत्रस्याध्ययनेन बहूनि प्रयोजनानि वर्तन्ते। पर्यावरणस्य सन्तुलनारक्षणम्, प्रदूषणनियन्त्रणम्, शुद्धवायोः जलस्य च महत्त्वमित्यादीन् अनेकान् विषयान् अध्येतारः अवगच्छन्ति। पत्रमिदं सस्यारोपणे प्रेरणां ददाति, वृक्षच्छेदनाद् निवृत्तौ प्रेरणां ददाति। आत्मानं परितः स्वच्छतायाः रक्षणे उत्साहं वर्धयति। विश्वविद्यालयपरिसरे सुन्दरोद्यानस्य निर्माणं प्रोत्साहयति। हरिद्वनोद्देशः परिसरे सर्वेषां सदस्यानां मनसः उल्लासं वर्धयति।
- CBCS System - एषा प्रणाली छात्राणां कृते मूलैः वैकल्पिकैः अथवा कौशलाधारितपाठ्यक्रमैः सह युक्तात् निर्धारितपाठ्यक्रमात् पाठ्यक्रमचयनस्य अवसरं प्रददाति। पाठ्यक्रमाणां मूल्याङ्कनं ग्रेडिंग्-व्यवस्थायाः अनुसरणं कृत्वा जायते। पारम्परिकसङ्ख्याव्यवस्थायाः अपेक्षया इदं श्रेष्ठम् अस्ति। छात्रेभ्यः अवसरप्रदायकं इदं शैक्षिकं प्रतिरूपम् वर्तते यच्छात्राणां कृते स्वेच्छानुगुणं पाठ्यक्रमान् विषयान् च ज्ञातुं महत् अवसरं प्रददाति। अस्य बृहत्तमः लाभः अस्ति यत् छात्राय स्वरुचिम् आधारीकृत्य कार्यक्रमान्/पाठ्यक्रमान् चयनं कर्तुं स्वतन्त्रतां ददाति। तथा स्नातक-स्नातकोत्तर-अध्ययनकाले अन्तर्विषय-बहुविषयक-पाठ्यक्रमं कर्तुं समर्थयति। विकल्पापेक्षया अधिकं स्वतन्त्रतां ददाति। छात्राः यस्य पाठ्यक्रमस्य अध्ययनं कर्तुम् इच्छन्ति तस्यैव पठनावसरः अस्यां प्रणाल्यां वर्तते।

| File Description | Document |
|---|---|
| Upload the Minutes of the Academic Council/ Executive Council etc. विद्वद्परिषदादीनां निर्णयान् उपारोपयतु | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.4.3_1716049578_12674.pdf) |

| | |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/1.4.3_1716049158_12674.pdf) |

## 2.Teaching-learning and Evaluation

### 2.1 Student Enrollment and Profile

***2.1.1 Average percentage of students from other States and Countries during the last five years***

***विगतेषु पञ्चसु वर्षेषु अन्येभ्यः राज्येभ्यः राष्ट्रेभ्यश्च प्रविष्टानां छात्राणां मध्यमानस्य प्रतिशततायाः मानम्।***

**Answer:** 2.79

2.1.1.1 Number of students from other states and Countries, year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु अन्येभ्यः राज्येभ्यः राष्ट्रेभ्यश्च प्रविष्टानां छात्राणां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 27 | 12 | 4 | 7 | 6 |

| File Description | Document |
|---|---|
| List of students (other states and countries) छात्रसूची (अन्येभ्यः राज्येभ्यः/ राष्ट्रेभ्यश्च) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.1.1_1715840600_12( |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.1.1_1715840649_12( |
| Copy of the domicile certificate/passport from respective countries) अधिवासप्रमाणपत्रम् /आज्ञापत्रम् (सम्बद्धदेशानां) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.1.1_1715840521_12( |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.1.1_1715840637_12( |

***2.1.2 Demand Ratio (Average of last five years)***

***अभियाचनायाः अनुपातः (विगतानां पञ्चानां वर्षाणां मध्यमानम्)***

**Answer:** 88.91

2.1.2.1 Number of eligible applications received for admissions to all the Programmes year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु प्रचालितेषु सर्वेषु कार्यक्रमेषु प्राप्तार्हतानाम् आवेदनपत्राणां वार्षिकक्रमेण सम्पूर्णा सङ्ख्या

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 217 | 240 | 205 | 176 | 162 |

2.1.2.2 Number of seats available year-wise during the last five years.

विगतेषु पञ्चसु वर्षेषु प्रतिवर्षम् उपलब्धानां स्थानानां सङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 275 | 260 | 205 | 195 | 195 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.1.2_1715954329_126 |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.1.2_1716111979_126 |

***2.1.3 Average percentage of seats filled against seats reserved for various categories (SC, ST, OBC, Divyangjan, etc.) as per applicable reservation policy during the last five years***

***विगतेषु पञ्चसु वर्षेषु, आरक्षणनीत्यनुसारेण, नानाप्रवर्गेभ्यः (अनुसूचितजातिः, अनुसूचितजनजातिः, अन्य-अप्रगतजातिः, दिव्याङ्गजनाः, इत्यादयः) निर्दिष्टेषु आरक्षितस्थानेषु, सम्पूरितानाम् आरक्षितस्थानानां प्रतिशतं मध्यमानस्य प्रतिशतता।***

**Answer:** 29.7

2.1.3.1 Number of actual students admitted from the reserved categories year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु प्रतिवर्षम् आरक्षितप्रवर्गेभ्यः प्राप्तप्रवेशानां छात्राणां सङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 49 | 33 | 24 | 36 | 27 |

2.1.3.2 Number of seats earmarked for reserved category as per GOI/State Govt. rule year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु  भारतशासनस्य अथवा राज्यशासनस्य नियमानुरूपम् आरक्षितप्रवर्गेभ्यः निर्दिष्टानां स्थानानां वार्षिकी सङ्ख्या

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 138 | 130 | 103 | 98 | 98 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.1.3_1715843791_126 |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.1.3_1716103624_126 |

**2.2 Catering to Student Diversity**

***2.2.1 The institution assesses the learning levels of the students, after admission and organises special programmes (including spoken Sanskrit shibirams/ camps/ workshops/ summer schools etc.) for advanced learners and slow learners***

***छात्राणां प्रवेशानन्तरं संस्था तेषाम् अधिगमस्तरान् परीक्षते, अग्रसराधिगन्तॄणां मन्दाधिगन्तॄणां च कृते विशिष्टान् शैक्षिकपाठ्यक्रमान् (संस्कृतसम्भाषणशिबिराणि/ आवासीयशिबिराणि/ कार्यशालाः/ ग्रीष्मकालिकशिबिराणि इत्यादि) आयोजयति।***

**Answer:**

**"मुण्डे मुण्डे मतिर्भिन्ना"** इत्यनेन सुभाषितेन सिद्ध्यति यत् सर्वे छात्राः समस्तरीयाः न भवन्ति। तथा कक्षानुगुणेनापि एवमनुभूतं यत् महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये विभिन्नपृष्ठभूमीनां विभिन्नक्षेत्राणामप्रगतसमुदायानां छात्राणामावश्यकतानुगुणम्(आवश्यकतां परिपूरयितुम्) अनेकविधोपायान् कल्पयति।

- -

विश्वविद्यालयस्य छात्राः एव मूलधनं सन्ति। छात्राणां सर्वतोमुखी विकासः एव विश्वविद्यालयस्य शिक्षकाणां च मूलमुद्देश्यं भवति।

**विद्यार्थिनां मूल्याङ्कनम्-**

प्रथमतः यत्र शिक्षणे गुरुकुलपद्धत्याः आदर्शेषु यथा- संवादशैल्यामध्यापनम्, प्रश्नप्रोत्साहनम्, सरलोदाहरणमाध्यमेन विषयस्य स्पष्टीकरणञ्चेत्यादयः प्रयोगाः क्रियन्ते। द्वितीयं कक्षायाः बाह्यप्रकृतिः, समाजादिना शिक्षणमुत्कृष्टं कर्तुं प्रयोगाः अपि क्रियन्ते।

**प्रगतच्छात्राणाङ्कृते –**

1. **वाक्यार्थपरिषत्-** विश्वविद्यालयीयाः अध्यापकाः शास्त्रीयमेकं विषयमवलम्ब्य आदर्शरूपेण वाक्यार्थं कुर्वन्ति। परिषदः अधिवेशने उपस्थिताः छात्राः शास्त्रवाक्यार्थप्रणालीम् अभ्यस्यन्ति। विश्वविद्यालये अधिगमप्रणालीयम् आचर्यते।
2. **स्पर्धानाम् आयोजनम्-** काले काले शैक्षिकाः सांस्कृतिकाश्च विविधाः स्पर्धाः आयोज्यन्ते। भारतीयविद्यास्थानानां बोधनार्थाय स्फूर्तिस्पर्धा आयोज्यते। अग्रसराध्येतारः छात्राः तत्र भागमूद्ध्वा प्रयोजनं लभन्ते । राज्यस्तरीयस्पर्धायां भागग्रहणाय प्रशिक्षणं प्रदीयते छात्राणाङ्कृते। विश्वविद्यालये कालिदासदिवसप्रसङ्गे प्रतियोगितायाः अपि आयोजनं क्रियते।
3. **विशिष्टव्याख्यानम्-** विश्वविद्यालये विशिष्टव्याख्यानानि आयोज्यन्ते। शास्त्राणां, संस्कृतभाषायाः, भारतीयसंस्कृतेः अन्येषु मौल्यप्रतिपादकेषु विषयेषु व्याख्यानानि आयोजितानि भवन्ति। आमन्त्रिताः विशिष्टाः विद्वांसः व्याख्यानं कुर्वन्ति। छात्राः तत्र लाभं प्राप्नुवन्ति ।
4. **प्रतियोगितासु मार्गदर्शनम्-** शैक्षिक/सांस्कृतिक/क्रीडास्पर्धासु राज्यस्तरीयासु राष्ट्रस्तरीयासु भागग्रहणाय मार्गदर्शनं क्रियते। छात्राः बहिः प्रवर्तमानासु प्रतियोगितासु सोत्साहं भागं गृह्णन्ति।
5. **प्रोत्साहनम् अभिप्रेरणा-** राज्यस्तरीयराष्ट्रस्तरीयस्पर्धासु प्राप्तपुरस्काराणां छात्राणां विश्वविद्यालयपक्षतः अभिनन्दनं क्रियते। सामाजिकजालपुटेषु वार्ता प्रसार्यते। विश्वविद्यालयस्य पत्रिकायां **पाणिनिधारा** इत्यत्र पुरस्कारवृत्तान्तः प्रकाश्यते। एतादृशैः उत्साहवर्धकैः कार्यैः अन्येऽपि छात्राः प्रेरिताः भवन्ति।
6. **सभासञ्चालनम्-** विश्वविद्यालये विविधकार्यक्रमाणां सञ्चालनं स्वागतकथनम्, धन्यताविष्करणम् इत्यादिकौशलं प्राप्तुम् अवसरः कल्प्यते ।
7. **शास्त्रार्थप्रशिक्षणवर्गः-** छात्रेषु शास्त्रीयं विशिष्टं ज्ञानम् आधातुं विश्वविद्यालयद्वारा शास्त्रार्थप्रशिक्षणवर्गः आयोज्यते। विश्वविद्यालयस्तरे चिताः अग्रेसराध्येतारः छात्राः प्रशिक्षणवर्गे भागं गृह्णन्ति ।

**मन्दाध्येतॄणां कृते-**

1. **आवासीयशिबिरम्-** लेखनकौशलवर्धनाय आवासीयशिबिरं चाल्यते।
2. **प्रशिक्षणवर्गेषु भागग्रहणार्थं प्रोत्साहनम्-** अन्यसंस्थाद्वारा प्रचाल्यमानेषु भाषाबोधनवर्गः, वेदशिक्षणम्, शास्त्रार्थप्रशिक्षणवर्गः, सम्भाषणशिबिरम् इत्यादिप्रशिक्षणवर्गेषु भागग्रहणाय छात्राणां कृते अवसरः कल्प्यते।

3. **प्रवेशपरीक्षाणां मार्गदर्शनम्-** विशिष्टाध्ययनार्थम् विभिन्नपाठ्यक्रमेषु प्रवेशं लब्धुं NET, SET/SLET इत्यादिपरीक्षासु छात्राणां कृते मार्गदर्शनं क्रियते। विश्वविद्यालयीयाः छात्राः स्नातक/ स्नातकोत्तरपाठ्यक्रमस्य अवधौ एतन्मार्गदर्शनं प्राप्य उन्नताध्ययने प्रवेशं लभन्ते।
4. **लघुचलच्चित्रनिर्माणे मार्गदर्शनम्-** संस्कृते लघुचलच्चित्रनिर्माणार्थम् अवसरः कल्प्यते। विश्वविद्यालये लघुचलच्चित्रस्पर्धाम् आयोजयति।
5. **पर्यटनकार्यक्रमाः-** छात्राणां विशिष्टानुभवप्राप्तये विश्वविद्यालयः पर्यटनकार्यक्रमान् आयोजयति। विश्वविद्यालये विश्वपर्यटनदिवसस्य अवसरे विशेषाः कार्यक्रमाः **"चलें गाँव की चौखट पे"** इत्यादिरूपेण क्रियन्ते।

**संस्कृतसम्भाषणकौशलप्रशिक्षणवर्गः-**

1. संस्कृतशिक्षणप्रशिक्षणाय विश्वविद्यालये स्वतन्त्रं केन्द्रं स्थापितं वर्तते, यत् काले काले वर्गमाणाम् आयोजनं करोति। एतेषु वर्गेषु न केवलं सामान्यभाषणस्य प्रशिक्षणं भवति, अपितु सन्धिः, समासः, करकम् इत्यादिविषयाधारितस्वतन्त्रवर्गाणामपि सम्पादनं क्रियते।
2. Covid 19 इत्यस्य कालेऽपि ऑनलाइन कक्षायाः आयोजनं कृत्वा छात्रान् समाजेन सह योजयितुं कार्यं कृतम् ।

**कर्मकाण्डकार्यक्रमाः-**

कर्मकाण्डं संस्कृतक्षेत्रसम्बद्धः बृहद् विषयः अस्ति । सर्वेषां छात्राणां कृते विशेषतः पौरोहित्यस्य वेदविषयस्य च छात्राणां कृते सरस्वतीपूजा,गणेशोत्सवः, रुद्राभिषेकम् इत्यादीनां माध्यमेन छात्रान् कर्मकाण्डेन सह प्रयोगात्मकरूपेण संयोजयितुं अवसराः प्रदीयन्ते। महालक्ष्मीपूजाविधानसदृशाः विशेषप्रशिक्षणकार्यशालाः अपि आयोज्यन्ते।

**विशेषकार्यक्रमाणामायोजनम्-**

संस्कृतस्य छात्राः विज्ञानेन अपि परिचिताः भवेयुः इति निश्चित्य संस्कृतविज्ञानपरिसंवादः, गणितदिवसः इत्यादयः कार्यक्रमाः आयोज्यन्ते ।

**सङ्गोष्ठी –**

विश्वविद्यालये अनेकाः अन्ताराष्ट्रियसङ्गोष्ठ्यः राष्ट्रियगोष्ठ्यः, विशेषव्याख्यानानि, प्रशिक्षणकार्यक्रमाश्च अत्यधिकतया आयोज्यन्ते। येन छात्राः विषयविशेषज्ञानानाम् व्याख्यानानि श्रुत्वा स्वज्ञानवर्धनम्, अद्यतनीकरणं च कर्तुं शक्नुवन्ति।

**वेधशालायाः भ्रमणम्-**

उज्जयिन्यां ज्योतिषकालगणनायाः क्रेन्द्रभूतं वेधशालाद्वयं विद्यते। तत्र एका जीवाजीवेधशाला अपरा च डोंगलावेधशाला। अत्र ज्योतिषः छात्राः समयानुसारं वेधशालाभ्रमणं कुर्वन्ति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.2.1_1716026401_12674.pdf) |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम् | View Document (https://mpsvv.ac.in/images/naac/LINK%202%20CRITERIAN/Cover%20Page%20Index%202.2.1.pdf) |

***2.2.2 Student - Full time teacher ratio***

***छात्राणां पूर्णकालिकाध्यापकानां च अनुपातः***

**Answer:** 16.5

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.2.2_1716042913_12674.pdf) |
| **Other Upload Files** | |

| | |
|---|---|
| 1 | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.2.2_1715846669_12674.pdf) |

**2.3 Teaching- Learning Process**

***2.3.1 Student centric methods, such as experiential learning, participative learning and learning through dialogue mode and use of hermeneutics in the teaching of knowledge texts and Kavyas, problem solving methodologies are used for enhancing learning experiences.***

***अनुभवात्मकः अधिगमः, सहभागी अधिगमः, संवादपद्धत्या अधिगमः इत्यादयः छात्रकेन्द्रितविधयः, वादपद्धत्या शिक्षणं, शास्त्राणां काव्यानां च पाठने टीकाभाष्यादिपद्धतयः समस्यापरिष्कारविधिविज्ञानानि च अधिगमानुभवसमभिवर्धनाय उपयुज्यन्ते।***

**Answer:**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये भारतीयज्ञानशाखानां सुसम्पन्ना पठनपाठनपरम्परा विद्यते। शिक्षकः छात्राणां स्तरं ज्ञात्वा एव पाठनीयं विषयमुपयुक्तविधिना पाठयति। काले पर्यवेक्षते परीक्षते च। तत्र छात्रकेन्द्रिताः विधयः-

1. **अनुभवात्मकाधिगमः-** संस्कृतसाहित्ये शृङ्गारादिनवरसानां परिचयं कक्षायां छात्राः प्राप्नुवन्ति। फलितज्योतिषे जातकस्य कुण्डल्यां फलादेशविचारःपाठ्यते। विद्यार्थिनः स्वकीयानुभवद्वारा फलादेशविज्ञानं जानन्ति। योगविभागस्य छात्रैः समाजाय सौजन्ययोगप्रशिक्षणस्य उपक्रमः क्रियते।
2. **सहभागि-अधिगमः- पादं सब्रह्मचारिभ्यः** अनेन हेतुना छात्राः सहपाठिभिः साकं पाठ्यांशमभ्यस्यन्ति। व्याकरणशास्त्रीयाः छात्राः पाठितानि सूत्राणि सहपाठिनः परस्परं पाठं चिन्तयन्ति। सिद्धान्तज्योतिषगणितविज्ञानप्रक्रियामपि एकत्रीभूय अभ्यस्यन्ति। तथा च फलितज्यौतिषे न्यायदर्शने, संस्कृतसाहित्ये, अद्वैतवेदान्तदर्शने, द्वयोः त्रयाणां च समूहं कृत्वा प्रत्येकस्य कृते एकैकः विषयः प्रदीयते। ते समूहरूपेण अभ्यस्यन्ति।
3. **संवादपद्धत्याधिगमः-** विद्यार्थिनः व्याकरणशास्त्रे स्फोटवादस्य, साहित्ये काव्यप्रकाशस्य पाठ्यांशानां संवादं कुर्वन्ति। वेदान्तशास्त्रे ईशावास्योपनिषदं संवादात्मकतया अधिगच्छन्ति। ज्योतिषे, चिन्तनाधिगमस्य अवसरमधिकतया प्राप्नुवन्ति।

**छात्रकेन्द्रितविधयः-**

1. **प्रश्नविधिः-** अयं प्राचीनः विधिः। प्रश्नोपनिषदि "**ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान् पृच्छत**" यदि विज्ञास्यामः सर्वं ह वो वक्ष्यामः इति निर्देशः प्राप्यते। कालांशे कश्चन कालः विद्यार्थिनां जिज्ञासाशान्त्यर्थं प्रदीयते। विद्यार्थिनः प्रश्नाः कुर्वन्ति। पाठितविषयस्य अध्ययनकाले समुत्पन्नाः प्रश्नाः आगामिकक्षायां पृच्छन्ति। ततः शिक्षकैः समाधानं क्रियते।
2. **प्रयोगपूर्वकं शिक्षणम्-** संस्कृतसाहित्ये नाटकस्य, ज्यौतिषशास्त्रे फलादेशविज्ञानस्य, वेदे कर्मकाण्डस्य तथा च योगशास्त्रे आसनानां प्रायोगिकं ज्ञानं प्रदीयते।
3. **कण्ठस्थप्रोत्साहनविधिः-** विश्वविद्यालये शब्दरूपपाठः, धातुरूपपाठः, अमरकोशः, सूक्तिपाठः, सूत्रपाठः, इत्यादिमाध्यमेन छात्रेषु शास्त्रकण्ठस्थीकरणाय अध्यापकैः प्रोत्साहनं प्रदीयते।
4. **दृष्टान्तविधिः-** व्याकरणे स्फोटः, वर्णनित्यत्वम्, वेदान्ते अध्यासः, भ्रमः, साहित्ये वृत्तयः, (लौकिकन्यायानाम् उपयोगः) एवं नैकेषां विषयाणां पाठने च एषः विधिः प्रयुज्यते। प्रदीयमानेन दृष्टान्तेन दार्शनिकसिद्धान्तस्य सुलभावगतिः भवति।
5. **अध्यारोप-अपवादविधिः-** सोपानक्रमेण विषयोपन्यासेन अध्यापनम् । स्थूलात् सूक्ष्मं प्रति अज्ञातात् ज्ञातं प्रति, इन्द्रियगम्याद् अतीन्द्रियं प्रति विषयं क्रमेण बोधयितुम् एषः विधिः आश्रीयते। अद्वैतवेदान्ते ब्रह्मणः स्वरूपकथनादौ प्रयुज्यते।
6. **आदर्शवाचनविधिः-** पुराणानि, वेदमन्त्राः, काव्यानि इत्येतेषां पाठनाय विश्वविद्यालये प्राचुर्येण असौ विधिः स्वीक्रियते।
7. **समस्यासमाधानविधिः-** शास्त्रीयविषयाणां पाठनसमये आदौ संशयः ततः समाधानं पुनः संशयः ततः समाधानम् इत्येवं क्रमेण सिद्धान्तस्य स्थापनं क्रियते। विश्वविद्यालयस्य पाठ्यक्रमेषु अत्यन्तोपयोगिनाम् एनं विधिम् आश्रयन्ते अध्यापकाः ।
8. **परीक्षाविधिः-** शास्त्राणां दृढावगतिसम्पादनाय शलाकाप्रतियोगिता क्रियते। अवान्तरविषये पाठिते घटकपरीक्षा क्रियते।

**वादपद्धत्या शिक्षणम्-**

1. **वादविधिः-** "**वादे वादे जायते तत्त्वबोधः**" इति उक्त्यनुसारेण शास्त्रीयग्रन्थेषु दर्शनग्रन्थेषु च प्रमेयविचारः वादसरण्या प्रतिपादितो वर्तते। अतः वेदान्ते न्याये व्याकरणे साहित्ये च अध्यापकाः अमुं विधिम् आश्रयन्ते। वाक्यार्थपरिषदि अध्यापका विशेषतः अनेन विधिना प्रमेयं प्रतिपादयन्ति ।

1. **टीकाभाष्यपद्धतिः-** विभिन्नपाठ्यक्रमेषु विद्यमानानां शास्त्रीयग्रन्थानां पाठनाय टीकापद्धतिः अत्यन्तम् उपादेया वर्तते ।
2. **व्याख्यानविधिः-** प्रसिद्धोऽयं विधिः समान् शास्त्रविषयान् च बोधयितुम् अवलम्ब्यते। एतैः विधिभिः सह अध्यापितान् विषयान् अधीयानाः विद्यार्थिनः स्वस्यानुसन्धानदृष्टिं दृढीकुर्वन्ति।

**सांस्कृतिकभ्रमणम्-**

सांस्कृतिकभ्रमणेन छात्राः उज्जैनस्य विशिष्टसांस्कृतिकन्यासं पश्यन्ति। तथा उज्जयिन्याः अनतिदूरे स्थितानां पुरातात्विकस्थलानां महिदपुरदुर्गस्य, पुरातत्त्वीयोत्खननस्थलस्य, भस्मटेकरीत्याख्यस्य, स्वातन्त्र्यान्दोलनेन सह सम्बद्धस्थलानां च भ्रमणं कुर्वन्ति। विश्वविद्यालयः पारम्परिकगुरुकुलैः सह सम्बद्धा अस्ति। येषां माध्यमेन छात्राः गुरुकुलपरम्परायाः सम्पर्कं प्राप्नुवन्ति। यथा योगविभागस्य छात्राः हरिद्वारगुरुकुलस्य भ्रमणं कृतवन्तः । इतोऽपि अतिरिक्तं छात्राः जीवाजीवेधशाला, डोंगलावेधशाला, मानवसंग्रहालयः, ठाकुरपर्वतसिंहसंग्रहालयः इत्यादिस्थानानां भ्रमणं कुर्वन्ति। अन्येषु विश्वविद्यालयेषु अपि अत्रत्याः छात्राः गच्छन्ति। यथा - शोधविदुषां दलेन कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य रामटेकस्य शैक्षणिकभ्रमणं कृत्वा तत्र पाण्डुलिपिन्यासोऽपि अवलोकितः। एतेषु भ्रमणस्थलेषु छात्राणां प्रथमहस्तसूचना प्राप्यते । एतत् छात्राणां कृते स्वस्य पारस्परिककौशलं वर्धयितुं गहनतरम् अन्वेषणं विकसितुं च मञ्चं प्रदाति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.3.1_1716027119_12674.pdf) |
| Link for Additional Information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://mpsvv.ac.in/images/naac/LINK%202%20CRITERIAN/LINK%202.3.1.pdf) |

***2.3.2 Percentage of teachers using ICT for effective teaching with Learning Management Systems (LMS), E-learning resources etc.***

***अधिगम-प्रबन्धन-प्रणाली(अ.प्र.प्र)-वैद्युत-अधिगम-संसाधन(वै.अ.स)-प्रभृतिभिः सह सूचना-संप्रेषण-प्राविधिकीं (सू.सं.प्रा) प्रभाविशिक्षणार्थम् उपयुञ्जताम् अध्यापकानां प्रतिशतता।***

**Answer:** 46.43

2.3.2.1 Number of teachers using ICT

सूचना-सम्प्रेषण-प्राविधिकीम् (सू.सं.प्रा) उपयुञ्जताम् अध्यापकानां सङ्ख्या

Answer: 13

| File Description | Document |
|---|---|
| Upload List of teachers (using ICT for teaching) based on Data Template दत्तांशप्रारूपाधारेण सूचना-संप्रेषण-प्राविधिकी (सू.सं.प्रा) (अ.प्र.प्र., वै.अ.सं) उपयुञ्जताम् अध्यापकानां सूची उपारोपणीया | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.3.2_1715848380_12674.xlsx) |
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.3.2_1716104198_12674.pdf) |

| | |
|---|---|
| Provide link for webpage describing the " LMS/ Academic management system" जालपुटस्य सन्धानं दीयतां यत्र अधिगम-प्रबन्धन-प्रणाली (अ.प्र.प्र) वैद्युत-अधिगम-संसाधनानां (वै.अ.स) विवरणं लभ्यते | View Document (http://www.mpsvv.ac.in/index.php/en/students/lms) |

***2.3.3 Ratio of mentor to students for academic and stress related issues (preceding academic year data)***

***शैक्षिकसमस्याविषये, उद्वेगविषये च छात्राणां कृते उपलब्धानाम् उपदेष्टॄणाम् अनुपातः (प्रगतवर्षस्य दत्तांशः)***

**Answer:** 16.5

2.3.3.1 Number of mentors

मार्गदर्शकानां सङ्ख्या

Answer: 28

| File Description | Document |
|---|---|
| Upload year-wise list of number of students, full time teachers and mentor/mentee ratio <br> छात्राणां तथा पूर्णकालिकाध्यापकानां वार्षिकी सूची तथा उपदेष्टृ-उपदेश्यानामनुपातश्च उपारोपणीयः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.3.3_1716107171_12674.pdf) |

***2.3.4 University encourages the Grurukula method of teaching/ Pathashalas/ Traditional Oriental Learning System (TOLS)/ Gurukula/ Shastrapeethas***

***विश्वविद्यालयः गुरुकुलपद्धत्या अध्यापनं/ पाठशालाः/ परम्परागतप्राच्याधिगमप्रणालीः/ गुरुकुलानि/ शास्त्रार्थपीठानि च पोषयति।***

**Answer:**

विश्वविद्यालस्यास्य पाठ्यक्रमाः अनुसन्धानस्य व्यापकतां परिवर्धयन्ति। अत्रत्यः पाठनविधिः आधुनिकविधिना सह गुरुकुलविधिमपि अनुसरति। विश्वविद्यालये परम्परानुगमकप्राच्यसरण्याः अवलम्बनेन शास्त्राध्ययनं जायते। विश्वविद्यालयः प्रकृत्यानुगुणं जीवनयापनाय गुरुकुलपद्धति-एवं-परम्परागतप्राच्याधिगमप्रणाल्यादीन् स्वविधानेन सम्पोषयति।

**गुरुकुलपद्धत्या अध्यापनम्-**

विश्वविद्यालयः विश्वविद्यालयानुदानायोगस्य निर्देशने छात्राणां सरलावगमनाय कक्षादिकं सञ्चालयति। तेन सह प्राच्यभारतीयगुरुकुलपद्धत्या न्यायादिमूलपारम्परिकशास्त्रशिक्षणे अवसरं प्रकल्पयति।

**पाठशालापोषणम्-** विश्वविद्यालयः मध्यप्रदेशान्तरगतसमस्तस्वसम्बद्धपाठशालासु पाठ्यक्रमादीनां निर्धारणं कृत्वा कालानुगुणं निर्देशनप्रदानेन तेषां पोषणं करोति।

**परम्परागतप्राच्याधिगमप्रणाल्याः सम्पोषणम्-**

विश्वविद्यालये वाक्यार्थसभा, शास्त्रार्थसभा, शास्त्रपरीक्षा, शास्त्रस्पर्धा, संस्कृतकविसमवायः, इत्यादयः रचनात्मककौशलवर्धकाः, अनुसन्धाने च प्रेरणादायकाश्च कार्यक्रमाः विश्वविद्यालयद्वारा समायोज्यन्ते। अनेन आयोजनेन प्राच्यपरम्परागताधिगमप्रणाल्यादीनां पोषणं तथा शास्त्रार्थपीठादीनां प्रतिष्ठायाः संरक्षणं संवर्धनञ्च भवति।

विश्वविद्यालये प्रतिवर्षं आयोजिते युवमहोत्सवे वाक्यार्थविषयमाश्रित्य एका विशिष्टा प्रतियोगिता आयोज्यते। तत्र विषयानुगुणं पृथक् पृथक् विषयमाश्रित्य वाक्यार्थप्रस्तुतिः जायते। व्याकरणे, न्यायदर्शने, वेदान्तदर्शने, साहित्यशास्त्रे च छात्राः विशेषरूपेण वाक्यार्थं प्रस्तुवन्ति। श्रेष्ठप्रदर्शनाय छात्राः स्वर्णपदकेन पुरस्क्रियन्ते।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.3.4_1716027644_12674.pdf) |
| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://mpsvv.ac.in/images/naac/LINK%202%20CRITERIAN/LNK%202.3.4.pdf) |

### 2.4 Teacher Profile and Quality

***2.4.1 Average percentage of full time teachers against sanctioned posts during the last five years***

***अनुमोदितानि पदानि लक्ष्यीकृत्य गतेषु पञ्चसु वर्षेषु नियुक्तानाम् अध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 68.67

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.1_1715850299_126 |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.1_1715852446_126 |

***2.4.2 Average percentage of full time teachers with Ph.D. during the last five years***

***गतेषु पञ्चसु वर्षेषु, विद्यावारिधिः (पीएच.डी) इत्युपाधिमतां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 74.19

2.4.2.1 Number of full time teachers with Ph.D. year-wise during the last five years

विगतपञ्चवर्षेषु, विद्यावारिधिः (पीएच्.डी) इत्युपाधिमतां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 21 | 15 | 13 | 14 | 13 |

| File Description | Document |
|---|---|

| | |
|---|---|
| List of number of full time teachers with PhD and number of full time teachers for 5 years (Data Template) गतेषु पञ्चसु वर्षेषु विद्यावारिधिमतां पूर्णकालिकाध्यापकानां तथा पूर्णकालिकाध्यापकानाञ्च सूची | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.2_1715863475_12674.xls |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.2_1715864648_12674.pc |

***2.4.3 Average teaching experience of full time teachers in number of years***

***पूर्णकालिकाध्यापकानाम् अध्यापनानुभवस्य वर्षप्रमाणेन मध्यमानम्***

**Answer:** 4.79

2.4.3.1 Total experience of full-time teachers

पूर्णकालिकाध्यापकानां सम्पूर्णः अध्यापनानुभवः

Answer: 134

| File Description | Document |
|---|---|
| List of Teachers including their PAN, designation, dept and experience details (Data Template) आयकरसङ्ख्या-पदवी-विभाग-अनुभवानां विवरणसहिता अध्यापकसूची | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.3_1715864824_12674.xlsx) |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.3_1715866386_12674.pdf) |

***2.4.4 Average percentage of full time teachers who received awards, recognition, fellowships at State, National, International level from Government recognised bodies during the last five years***

***विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्रस्तरेषु, सर्वकार-सर्वकाराभिज्ञातनिकायैः पुरस्कारं प्राप्तवतां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 18.81

2.4.4.1 Number of full time teachers receiving awards from state/ national/ international level from Government recognised bodies year-wise during the last five years

विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्रस्तरेषु, सर्वकार-सर्वकाराभिज्ञातनिकायैः पुरस्कारं प्राप्तवतां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 05 | 04 | 09 | 0 | 01 |

| File Description | Document |
|---|---|
| Institutional data: as per Data Template सांस्थानिकदत्तांशः देयः (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.4_1715868090_12674.xlsx) |
| e-copies of award letters (scanned or soft copy) पुरस्कारसम्बद्धानां पत्राणां वैद्युतप्रतिलिपयः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.4_1715868220_12674.pdf) |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.4_1715868200_12674.pdf) |

***2.4.5 Average percentage of full time teachers from other States against sanctioned posts during the last five years***

***विगतपञ्चवर्षेषु अनुमोदितेषु पदेषु अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 29.33

2.4.5.1 Number of full time teachers from other states year-wise during the last five years -

विगतपञ्चवर्षेषु अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या -

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 14 | 10 | 07 | 06 | 07 |

| File Description | Document |
|---|---|

| | |
|---|---|
| List of full time teachers from other state and state from which qualifying degree was obtained (Data Template) अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां सूची। राज्यस्य नामसहिता यतः तैः प्रमाणपत्रं प्राप्तम्। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.5_1715868475_12674.xlsx |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.5_1715869917_12674.pdf) |

***2.4.6 University has devised a mechanism to enable the young faculty to learn shastras under learned Gurus. Specify the names of Gurus from whom the teachers/ faculty members have studied Shastras/ Veda Shakhas.***

***विश्वविद्यालयः युवाध्यापकान् वरिष्ठविदुषां सन्निधौ शास्त्राध्ययनाय प्रोत्साहयति। गुरूणां नामानि सूचयन्तु येभ्यः अध्यापकाः शास्त्राणां वेदशाखानां वा पारम्परिकम् अध्ययनमकुर्वन्।***

**Answer:**

**युवाध्यापकान् शास्त्राध्ययनाय प्रोत्साहनम्-**

शास्त्राणां वेदशाखानां च अध्ययनम्, अध्यापनम्, अनुसन्धानम्, प्रसारः इत्यादिभिः क्रियाभिः भारतीयज्ञानशाखानां सामाजिकोपयोगः सिद्ध्यति। संस्कृतवाङ्मयस्य नयनेन समाजेन सह संस्कृतवाङ्मयस्य सम्बन्धः दृढो भवति। तेन समाजे शान्तिः, सौहार्दम, स्वास्थ्यम्, धर्मश्च सन्तिष्ठते। एतदुद्देश्येन महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः नैकान् विधीन् अनुसरति। विश्वविद्यालये विविधसङ्कायेषु कार्यरताः अध्यापकाश्च विशिष्टाः विद्वांसः वर्तन्ते। गुरूणां सन्निधौ अधीतशास्त्राः वरिष्ठाः युवानश्च अध्यापकाः वर्तन्ते। विश्वविद्यालये कार्यरताः युवानः अध्यापकाः वरिष्ठानां विदुषां सन्निधौ शास्त्राध्ययनम् अन्ववर्तयन्/ अनुवर्तयन्ति। युवाध्यापकाः वरिष्ठेभ्यः आचार्येभ्यः शास्त्राणामध्ययनमकार्षुः।

विश्वविद्यालयस्याध्यापकाः येषां सन्निधौ अध्ययनमकार्षुः तेषां नामानि-

| क्र. | अध्यापकस्य नाम | गुरोः/ मार्गनिर्देशकस्य नाम | शास्त्रं/शास्त्राणि |
|---|---|---|---|
| 01 | डॉ. अखिलेशकुमारद्विवेदी | प्रो. राममनोहरमिश्रः | व्याकरणम् |
| 02 | डॉ. उपेन्द्रभार्गवः | प्रो. हंसधरझा | सिद्धान्तज्योतिषम् |
| 03 | डॉ. सङ्कल्पमिश्रः | प्रो. सुदेशकुमारशर्मा | वेदः |
| 04 | डॉ.पूजाउपाध्यायः | 1. प्रो. विद्याप्रसादमिश्रः<br>2. श्री देवदत्तपाटिलः | भारतीयदर्शनम् |
| 05 | डॉ. शुभम्-शर्मा | प्रो. केदारनारायणजोशी | ज्योतिषम् (ज्योतिर्विज्ञानम्) |
| 06 | श्री अमितशर्मा | प्रो. ब्रजभूषणओझा | नव्यव्याकरणम् |
| 07 | डॉ. धर्मेन्द्रशर्मा | प्रो. नीलाभतिवारी | शिक्षाशास्त्रम् |
| 08 | डॉ. विजयकुमारः | 1. डॉ.अशोकथपलियालः<br>2. डॉ.पी.वी.बी. सुब्रह्मण्यम | वास्तुशास्त्रम्<br>ज्योतिषम् |
| 09 | श्री मुदितकुमारपाण्डेयः | प्रो. नीलाभतिवारी | शिक्षाशास्त्रम् |
| 10 | डॉ. अङ्कितशाण्डिल्यः | प्रो. मिथिलाप्रसादत्रिपाठी | वेदः, साहित्यम् |
| 11 | डॉ. विनोदकुमारपाण्डेयः | प्रो. गिरजाशङ्करशास्त्री | ज्योतिषम् |

| | | | |
|---|---|---|---|
| 12 | डॉ. रामकुमारी | प्रो. ललितपटेलः | साहित्यम् |
| 13 | डॉ. योगेशकुमारशर्मा | प्रो. वासुदेवशर्मा/ डॉ. अशोकथपलियालः | ज्योतिषम् |
| 14 | डॉ. अखिलेशकुमारपाण्डेयः | प्रो. प्रभादेवीचौधरी | शिक्षाशास्त्रम् |
| 15 | डॉ. शैलेन्द्रपाण्डेयः | प्रो. जे.भानुमूर्तिः | शिक्षाशास्त्रम् |
| 16 | डॉ. दिनेशचौबे | प्रो. आजादमिश्रः | व्याकरणम् |
| 17 | डॉ. कृष्णकुमारत्रिपाठी | डॉ. शान्तिलालसालवी | साहित्यम् |
| 18 | डॉ. अविनाशमिश्रः | प्रो. विनयकुमारपाण्डेयः | ज्योतिषम् |
| 19 | डॉ. गङ्गाशरणः | डॉ. कृपाशङ्करशर्मा | साहित्यम् |
| 20 | श्रीशिवानन्दमिश्रः | डॉ. मनोजमिश्रः | साहित्यम् |
| 21 | श्री आयुषदीक्षितः | प्रो. सनन्दनकुमारत्रिपाठी | साहित्यम् |
| 22 | डॉ. पतञ्जलिकुमारपाण्डेयः | डॉ. वाल्मीकिप्रसादमिश्रः | वेदः |
| 23 | डॉ. मुनीशमिश्रः | प्रो. राजारामशुक्लः | न्यायः |
| 24 | डॉ. श्रेयसकोरान्ने | डॉ. राजेश्वरशास्त्रीमुसलगाँवकरः | साहित्यम् |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.6_1716033299_12674.pdf) |
| Link for additional Information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://mpsvv.ac.in/images/naac/2%20criterian/2.4.6/List%20of%20Teachers.pdf) |

***2.4.7 Qualified faculty are available for new programmes/ emerging areas of study (computational linguistics, Computational Sanskrit, Translation Studies, Comparative Philosophy, Comparative Aesthetics, Yogic Science, Yoga Darshan, Samskrit Journalism, Sanskrit manuscriptology, Management, Jurisprudence, Cultural tourism, Temple Culture and Administration, Vastushastra, Medicinal Astrology etc.)***

***नूतनपाठ्यक्रमाणाम् उदयमान-क्षेत्राणां (सङ्गणकीय-भाषाशास्त्रं, सङ्गणकीय-संस्कृतम्, अनुवादाध्ययनं, तुलनात्मकदर्शनं, तुलनात्मकं सौन्दर्यशास्त्रं, योगविज्ञानम्, योगदर्शनं, संस्कृतपत्रकारिता, संस्कृतमातृकाशास्त्रम्, प्रबन्धनशास्त्रं, विधिशास्त्रं, सांस्कृतिकयात्रिकं, देवालयसंस्कृतिः प्रशासनं च, भैषज्यज्योतिषं, वास्तुशास्त्रम् इत्यादीनाम्) अध्यापनाय योग्यतावन्तः अध्यापकाः उपलभ्यन्ते।***

**Answer:**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये मूल्याङ्कनकाले नूतनकार्यक्रमेषु/उदीयमानक्षेत्रेषु अध्यापनार्थं योग्याः शिक्षकाः उपलभ्यन्ते । विषयक्षेत्राधारितसूची यथा-

| **क्र.** | **अध्यापकस्य नाम** | **उदीयमानक्षेत्रस्य नाम** |
|---|---|---|
| 1. | डॉ. तुलसीदासपरौहा<br>डॉ. पूजाउपाध्यायः | परियोजना |

| | | |
|---|---|---|
| 2. | डॉ. तुलसीदासपरौहा<br>डॉ. अखिलेशकुमारद्विवेदी | परामर्शः |
| 3. | डॉ. तुलसीदासपरौहा<br>डॉ. सङ्कल्पमिश्रः<br>डॉ. अखिलेशकुमारद्विवेदी<br>डॉ. दिनेशचौबे | प्रशिक्षणानुभवः |
| 4. | डॉ. तुलसीदासपरौहा<br>डॉ. सङ्कल्पमिश्रः<br>डॉ. शुभम्-शर्मा | धर्मशास्त्रम् |
| 5. | डॉ. शुभम्-शर्मा<br>डॉ. विजयकुमारः<br>डॉ. विनोदकुमारपाण्डेयः | सांस्कृतिकपर्यटनम् |
| 6. | डॉ. सङ्कल्पमिश्रः<br>डॉ. उपेन्द्रभार्गवः<br>डॉ. विनोदकुमारपाण्डेयः<br>डॉ. धर्मेन्द्रशर्मा<br>डॉ. विजयकुमारः | सङ्गणकीयसंस्कृतम् |
| 7. | डॉ. तुलसीदासपरौहा<br>डॉ. पूजाउपाध्यायः<br>डॉ. अखिलेशकुमारद्विवेदी<br>डॉ. विजयबहादुरत्रिपाठी<br>डॉ. रामकुमारी<br>डॉ. धर्मेन्द्रशर्मा<br>श्रीअमितशर्मा | अनुवादाध्ययनम् |
| 8. | डॉ. तुलसीदासपरौहा<br>डॉ. पूजाउपाध्यायः<br>डॉ. अखिलेशकुमारद्विवेदी<br>डॉ. सन्दीपशर्मा | तौलनिकदर्शनम् |
| 9. | डॉ. तुलसीदासपरौहा<br>डॉ. पूजाउपाध्यायः<br>डॉ. विजयबहादुरत्रिपाठी | तौलनिकसौन्दर्यशास्त्रम् |
| 10. | डॉ. पूजाउपाध्यायः<br>डॉ. भानुप्रतापबुन्देला<br>श्री शुभमगेहलोतः<br>डॉ. वरुणआहूजा<br>सुश्रीईशापाटीदारः | योगविज्ञानम् |
| 11. | डॉ. पूजाउपाध्यायः<br>डॉ. भानुप्रतापबुन्देला | योगदर्शनम् |

| | | |
|---|---|---|
| 12. | डॉ. तुलसीदासपरौहा<br>डॉ. उपेन्द्रभार्गवः<br>डॉ. विजयकुमारः<br>डॉ. दिनेशचौबे | संस्कृतपत्रकारिता |
| 13. | डॉ. तुलसीदासपरौहा<br>डॉ. पूजाउपाध्यायः<br>डॉ. सङ्कल्पमिश्रः<br>डॉ. शुभम्-शर्मा | संस्कृतमातृकाशास्त्रम् |
| 14. | डॉ. तुलसीदासपरौहा<br>डॉ. पूजाउपाध्यायः<br>डॉ. सङ्कल्पमिश्रः<br>डॉ. शुभम्-शर्मा | प्रबन्धनशास्त्रम् |
| 15. | डॉ. तुलसीदासपरौहा<br>डॉ. पूजाउपाध्यायः<br>डॉ. उपेन्द्रभार्गवः | विधिशास्त्रम् |
| 16. | डॉ. शुभम्-शर्मा<br>डॉ. सङ्कल्पमिश्रः<br>डॉ. विजयकुमारः<br>डॉ. अङ्कितशाण्डिल्यः | देवालयसंस्कृतिः एवं प्रशासनम् |
| 17. | डॉ. शुभम्-शर्मा<br>डॉ. विनोदकुमारपाण्डेयः<br>डॉ. विजयकुमारः,<br>डॉ. मनीषशर्मा,<br>डॉ. योगेशशर्मा | भैषज्यज्योतिषम् |
| 18. | डॉ. शुभम्-शर्मा,<br>डॉ. उपेन्द्रभार्गवः<br>डॉ. विनोदकुमारपाण्डेयः<br>डॉ. विजयकुमारः<br>डॉ. मनीषशर्मा,<br>डॉ. योगेशशर्मा | वास्तुशास्त्रम् |

उपर्युक्ताः शिक्षकाः सम्बन्धितविषयेषु प्रशिक्षणं, पारम्परिकज्ञानं, प्रयोगात्मकं सर्वेक्षणं, अन्तरविषयशिक्षणम् इत्यादीनां माध्यमेन समये समये एतेषु विषयेषु स्वज्ञानम् अद्यतनं कुर्वन्ति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.7_1716028453_12674.pdf) |

| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://mpsvv.ac.in/images/naac/LINK%202%20CRITERIAN/link%202.4.7.pdf) |
|---|---|

***2.4.8 Specify the names of Shastra-Chudamani/ Emeritus/ Adjunct Faculty/ Fellows/ Visiting Professors/ Post Doctoral Fellows on the rolls of the University.***

***विश्वविद्यालयेन सह सम्बद्धानां शास्त्रचूडामणिविदुषां, राष्ट्रस्तरीयाचार्याणाम्, अतिथ्याचार्याणां, संयोजिताचार्याणां, प्रतिष्ठिताचार्याणां, विद्यावारिध्युत्तरशोधरतानां विदुषां च नामानि सूचयन्तु।***

**Answer:**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः शास्त्रार्थचूडामणिपण्डितानां राष्ट्रस्तरीयविदुषाम्, अतिथ्याचार्यादीनां कार्यशालासङ्गोष्ठीसम्मेलनादिद्वारा लाभमाप्नोति।

विगतेषु पञ्चवर्षेषु महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये नैकाः शास्त्रार्थचूडामणिपण्डितानां राष्ट्रस्तरीयाचार्याणाम्, आतिथ्याचार्याणां पथप्रदर्शनमभूत्। तेषां केषाञ्चित् पण्डितानां नामानि अत्र प्रस्तूयन्ते-

| क्र. | नाम | पदनाम | संस्थानाम |
|---|---|---|---|
| 01 | बालकृष्णशर्मा | पूर्वकुलपतिः | विक्रमविश्वविद्यालयः उज्जयिनी म.प्र. |
| 02 | डॉ. निरञ्जनमिश्रः | विभागाध्यक्षः साहित्यविभागः | भगवानदासआदर्शसंस्कृतमहाविद्यालयः हरिद्वारम्, उ.ख. |
| 03 | प्रो. रमाकान्तपाण्डेयः | निदेशकः | केन्द्रीयसंस्कृतविश्वविद्यालयः भोपालपरिसरः |
| 04 | प्रो. ललितपटेलः | पूर्वकुलपतिः | श्रीसोमनाथसंस्कृतविश्वविद्यालयः वेरावलम् गुज. |
| 05 | डॉ. ब्रजभूषणओझा | सहाचार्यः, व्याकरणविभागः | काशीहिन्दूविश्वविद्यालयः वाराणसी उ.प्र. |
| 06 | डॉ. प्रदीपपाण्डेयः | सहाचार्यः व्याकरणविभागः | केन्द्रीयसंस्कृतविश्वविद्यालयः भोपालपरिसरः म.प्र. |
| 07 | प्रो. रामसलाहीद्विवेदी | व्याकरणविभागाध्यक्षः | लालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली |
| 08 | प्रो. मिथिलाप्रसादत्रिपाठी | पूर्वकुलपतिः | महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयःउज्जयिनी म.प्र. |
| 09 | प्रो. विरूपाक्षजड्डीपालः | सचिवः | महर्षिसान्दीपनिवेदविद्याप्रतिष्ठानम्, उज्जयिनी म.प्र. |
| 10 | प्रो. मनोजमिश्रः | विगाध्यक्षः वेदविभागः | केन्द्रीयसंस्कृतविश्वविद्यालयः रणवीरपरिसरः जम्बू. |
| 11 | प्रो. हरेकृष्णशतपथी | कुलपतिः | कलिंगइन्स्टीट्यूटऑफसोशलसाइंसभुवनेश्वरम्, उडीसा |
| 12 | प्रो. हरेरामत्रिपाठी | कुलपतिः | कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः रामटेकनागपुरम् |
| 13 | प्रो. विनयकुमारपाण्डेयः | ज्योतिषविभागाध्यक्षः | काशीहिन्दूविश्वविद्यालयः वाराणसी उ.प्र. |
| 14 | प्रो. राजारामशुक्लः | कुलपतिः | सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी |
| 15 | श्रीचमूकृष्णशास्त्री | सहसंस्थापकः | संस्कृतभारती |
| 16 | प्रो. पी. एन. शास्त्री | पूर्वकुलपतिः | राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली |
| 17 | प्रो. गोपबन्धुमिश्रः | कुलपतिः | श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुज. |

| | | | |
|---|---|---|---|
| 18 | प्रो.भगवतशरणशुक्लः | विभागाध्यक्षः, व्याकरणविभागः | काशीहिन्दूविश्वविद्यालयः, वाराणसी उ.प्र. |
| 19 | डॉ. देवदत्तपाटिलः | संस्थापकः | श्रीविद्यापाठशालाः, गोवा |
| 20 | प्रो. रामकुमारशर्मा | आचार्यः, साहित्यम् | केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः, जयपुरम् |
| 21 | प्रो. विष्णुपदमहापात्रः | आचार्यः, न्यायदर्शनम् | श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नईदिल्ली |
| 22 | प्रो. रामकिशोरत्रिपाठी | आचार्यः, वेदान्तदर्शनम् | सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी |
| 23 | प्रो. हंसधरझा | आचार्यः, सिद्धान्तज्योतिषम् | केन्द्रीयसंस्कृतविश्वविद्यालयः भोपालपरिसरः भोपालम् |
| 24 | प्रो. परागजोशी | आचार्यः, साहित्यम् | कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः रामटेक, नागपुरम् |
| 25 | प्रो. उमावैद्यः | पूर्वकुलगुरुः | कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः रामटेक, नागपुरम् |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.8_1716028631_12674.pdf) |
| Link for additional Information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://mpsvv.ac.in/images/naac/LINK%202%20CRITERIAN/link%202.4.8.pdf) |

***2.4.9 Specify the systems adopted to recharge academically and rejuvenate teachers (e.g. learning with traditional Gurus, providing research grants, study leave, nomination to national/ international conferences/ seminars, in-service training, organizing national/ international conferences, vakyartha-Sadhas, Shastrtha-Sabha, Shastra-Pareeksha, Shastra-spardha/ Samskrita-Kavi-Samavaya (Sanskrit Poets' Meet) etc.)***

***अध्यापकान् शैक्षिकरूपेण पुनर्नवीकर्तुम् अभिगृहीताः व्यवस्थाः सूचयतु- यथा- पारम्परिकगुरूणां सविधे अध्ययनम्, अनुसन्धानानुदानप्रदानम्, अध्ययनावकाशप्रदानम्, राष्ट्रिय/ अन्ताराष्ट्रियसम्मेलने नामनिर्देशनम्/ सेवारतप्रशिक्षणं, राष्ट्रिय/ अन्ताराष्ट्रियसम्मेलनस्य आयोजनं, वाक्यार्थसभाः, शास्त्रार्थसभाः, शास्त्रपरीक्षाः, शास्त्रस्पर्धाः, संस्कृतकवि-समवायः इत्यादयः।***

**Answer:**

विश्वविद्यालयः शिक्षकाणां गुणवत्तां वर्धयितुं तेषां ज्ञानस्य अभिमुखीकरणाय च निरन्तरं प्रयत्नं करोति। अस्मिन् राष्ट्रियान्तर्राष्ट्रियशोधसङ्गोष्ठी, सम्मेलनं, काव्यगोष्ठी, वादविमर्शः, इत्यादिषु सहभागितायै नियमानुसारेण शैक्षिककर्तव्यावकाशः प्रदीयते। अपि च तेषां शैक्षिकनवीनीकरणं दृष्ट्या प्रतिवर्षं बहवः कार्यक्रमाः आयोज्यन्ते। एतेषु शिक्षकप्रशिक्षणकार्यक्रमाः, राष्ट्रिय/अन्तर्राष्ट्रीयशोधगोष्ठी/सम्मेलनं/सङ्गोष्ठी/कार्यशाला, शास्त्रार्थसभा, संस्कृतकविसमवायः इत्यादयः प्रमुखाः कार्यक्रमाः सन्ति।

**अध्यापकानां शैक्षणिकरूपेण पुनर्नवीकरणम्-**

विश्वविद्यालयः शिक्षकान् वरिष्ठशिक्षकाणां सन्निधौ अधिगमायापि प्रोत्साहयति। संस्कृतस्य आचार्यः केदारनाथशुक्लः, ज्योतिषक्षेत्रे वरिष्ठपञ्चाङ्गकारः आचार्यः आनन्दशङ्करव्यासः, वास्तुकला एवं इतिहासक्षेत्रे वरिष्ठपुरातत्त्ववित्, पद्मश्री आचार्यः भगवतीलालराजपुरोहितः, साहित्यशास्त्रक्षेत्रे च आचार्यः केदारनारायणजोशी, आचार्यः बालकृष्णशर्मा, आचार्या अजितात्रिवेदी, आचार्यः सूर्यप्रकाशव्यासः सदृशाः विभूतयः उज्जयिन्यां निवसन्ति। आचार्यजनाः तेभ्यः सततं प्रत्यक्षतया सम्पर्कं कृत्वा तेभ्यः तत्तद्विषयाणां गूढज्ञानं प्राप्नुवन्ति।

**पारम्परिकगुरूणां सविधेः अध्ययनम्-**

स्वावकाशदिवसेषु प्राध्यापकाः भारतस्य अन्यवरिष्ठविदुषां निकटं गत्वा तेभ्यः प्रत्यक्षतया अधिगमं कुर्वन्ति। उदाहरणाय विश्वविद्यालस्य प्राध्यापिका डॉ. पूजाउपाध्यायः स्वसन्ततिपालनावकाशस्यावधौ विश्वप्रसिद्धनैयायिकस्य आचार्यदेवदत्तपाटिलमहोदयस्य समीपमुषित्वा न्यायशास्त्रस्याध्ययनमकार्षीत्। इतोऽपि इतरे विश्वविद्यालयस्य आचार्याः अपि आधुनिकदूरसञ्चारयुक्तिभिः तथा अन्तर्जालादिमाध्यमैः दूरस्थेभ्यः आचार्येभ्यः मार्गदर्शनं प्राप्नुवन्ति।

**राष्ट्रियान्ताराष्ट्रियायोजनानि-**

2019-20 तमे वर्षे अखिलभारतीयशास्त्रार्थसभायाः आयोजनं बृहद्रूपेण जातम् । 2021-22 तमे वर्षे राष्ट्रियशिक्षानीतौ भाषाणां क्रियान्वयनविषये राष्ट्रियसंगोष्ठ्याः आयोजनमभवत्। अस्मिन् वर्षद्वये कोविड इत्यस्य प्रथमद्वितीयचरणकारणात् यदा सर्वकारीयदिशानिर्देशेन भौतिकरूपेण कार्यक्रमस्य आयोजनं कर्तुं न शक्यते । तदा संस्कृतशिक्षणप्रशिक्षणज्ञानविज्ञानसंवर्धनकेन्द्रद्वारा विविधविभागैश्च आनलाईनकार्यक्रमाः आयोजिताः अभूवन्। 2021-22 तमे वर्षे विविधाः शोधगोष्ठी/संगोष्ठी/व्याख्यानानि/ प्रशिक्षणादिकार्यक्रमाः आयोजिताः अभवन्। येषु अन्यसंस्थाभिः अपि सम्बन्धः योजितः आसीत्।

- एतेषां गतविधीनां समन्वये विश्वविद्यालयस्य प्राध्यापकानां महती भूमिका आसीत् । विशेषव्याख्यानेषु आचार्यसहिताः सर्वे श्रोतारः संस्कृते विज्ञानं, मृगपक्षिविज्ञानं, नाट्य-अनुभवं, यन्त्र-मण्डल-चक्रादिविषयेषु नवीनं ज्ञानं प्राप्तवन्तः।
- 2022-23 सत्रे शिक्षाशास्त्रविभागेन गुरुपूर्णिमायां राष्ट्रियशोधसङ्गोष्ठी आयोजिता तथा महाराजाविक्रमादित्यशोधपीठेन सह ज्योतिषज्योतिषविभागेन वास्तुशास्त्रनगरनियोजनविषये तथा राजाभोजविषये अन्तार्राष्ट्रीयशोधसङ्गोष्ठी आयोजिता। अस्मिन् कालखण्डे योगविभागेन, दर्शनविभागेन च विशेषानुष्ठानानि अपि आयोजितानि ।
- विश्वविद्यालयेन 13/01/2020 तमे दिनाङ्के मध्यप्रदेशराजभवने शास्त्रार्थसभा समायोजिता, यस्यां देशस्य मूर्धन्यविद्भिः सह विश्वविद्यालयस्य आचार्याः अपि सहभागितामकार्षुः। वरिष्ठविदुषां तर्कान् श्रुत्वा सर्वेषां ज्ञाने वृद्धिः परिष्कारश्च जातः।
- विश्वविद्यालयः निरन्तरं शास्त्रीयसामाजिकसांस्कृतिकविषयेषु राष्ट्रीय-अन्तर्राष्ट्रीय-शोधसङ्गोष्ठीसम्मेलनं परिसंवादः कार्यशाला चेद्यादीनां आयोजनं करोति। प्रमुखेषु आयोजनेषु सत्रे 2018-19 साहित्यविभाग द्वारा, वेद-एवं-व्याकरणविभागद्वारा 2018-19 सत्रे विषये वेदाङ्गशिक्षाशास्त्रालोके उच्चारणविज्ञानम्, एवमेव अन्यैः विभागैः अपि एतादृशायोजनं कृतम्। यथा- ज्योतिष-एवं-ज्योतिर्विज्ञानद्वारा देवालयवास्तोः विविधायामविषये आयोजिताः राष्ट्रीयशोधसङ्गोष्ठ्याः, विशिष्टसंस्कृतविभागद्वारा छन्दशास्त्रविमर्शः इति विषये कार्यशालाः इत्यादयः कार्यक्रमाः विशेषरूपण आयोजिताः।

**संस्कृतकविसमवायः-**

विश्वविद्यालयः अनेकवर्षैः अखिलभारतीयकालिदाससमारोहे संस्कृतकविसमवायस्य सहायोजकोऽस्ति। यत्र डॉ. तुलसीदासपरौहामहोदयस्य सञ्चालने विश्वविद्यालयस्य अन्याः आचार्याः अपि स्वकाव्यप्रतिभायाः प्रदर्शनं कुर्वन्ति। तथा वरिष्ठकवीनां काव्यपाठं श्रुत्वा तेभ्यः संवादं कृत्वा काव्यसृजनस्य सूक्ष्मयुक्तीनां ज्ञानं प्राप्नुवन्ति। विश्वविद्यालयद्वारा संस्कृतशिक्षकप्रशिक्षणकार्यक्रमाणामपि आयोजनं जातम्।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.9_1716028827_12674.pdf) |
| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://mpsvv.ac.in/images/naac/LINK%202%20CRITERIAN/2.4.9%20link.pdf) |

***2.4.10 Specify the names of faculty imparting indepth shastra knowledge/ Avadhana/ shastrartha to the students and encouraging them to take various shastra exams conducted by different organisations in addition to regular teaching.***

***नित्याध्यापनातिरिक्तत्वेन छात्राणां कृते विविधसंस्थाभिः सञ्चालितासु शास्त्रार्थपरीक्षासु स्पर्धासु च भागं ग्रहीतुं शास्त्रार्थेषु अवधानकलायां विशेषप्रशिक्षणं प्रददताम् अध्यापकानां विषये विवरणं प्रयच्छत।***

**Answer:**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयद्वारा आयोजितेषु नित्याध्यापनातिरिक्तेषु नैकेषु कार्यक्रमेषु स्पर्धासु च अत्रत्याः शिक्षकाः छात्रान् सततं प्रोत्साहयन्ति। तेषां नामानि यथा-

1. डॉ. तुलसीदासपरौहा- साहित्यम्
2. डॉ. अखिलेशकुमारद्विवेदी- व्याकरणम्

3. डॉ. उपेन्द्रभार्गवः- ज्योतिषम्
4. डॉ. सङ्कल्पमिश्रः- वेदः
5. डॉ.पूजाउपाध्यायः- साहित्यम् दर्शनं च
6. डॉ. शुभम्-शर्मा- ज्योतिर्विज्ञानम्
7. डॉ. सन्दीपशर्मा- न्यायशास्त्रम्
8. डॉ. विजयकुमारः- ज्योतिषम्
9. डॉ. अङ्कितशाण्डिल्यः- वेदः
10. डॉ. रामकुमारी- साहित्यम्
11. डॉ. दिनेशचौबे - व्याकरणम्
12. डॉ. कृष्णकुमारत्रिपाठी- साहित्यम्
13. डॉ. अविनाशमिश्रः- ज्योतिषम्
14. डॉ. गङ्गाशरणः- साहित्यम्
15. श्रीअनुरुद्धकुमारत्रिपाठी- व्याकरणम्

साधारणाध्यापनेन सह अत्रत्याः प्राध्यापकाः छात्रान् प्रोत्साहयितुं शास्त्रकलास्पर्धां, शास्त्रार्थसभां, श्लोकन्त्याक्षरीस्पर्धां, अष्टाध्यायीसूत्रान्ताक्षरीस्पर्धां, च नियमेन परिचालयन्ति।

शिक्षकाः संस्कृतशास्त्रस्पर्धाभ्यः छात्रान् सज्जीकर्तुं सततं प्रयासं कुर्वन्ति। विश्वविद्यालयः शास्त्रकण्ठपाठे शास्त्रभाषणे, शास्त्रशलाकायां, वाक्यार्थादिषु भागं ग्रहीतुं छात्रान् सर्वदा प्रेरयन्ति।

अखिलभारतीयस्तरे विश्वविद्यालयः संस्कृतनाटकगानपरिप्रच्छान्ताक्षर्यादिविविधस्पर्धासु प्रतिवत्सरं भागमग्रहीत्।

विद्यार्थिनः अन्यसंस्कृतविश्वविद्यालयद्वारा सञ्चालितसंस्कृतवर्गे ग्रीष्मावकाशकाले संस्कृतप्रशिक्षुतायां, शास्त्रप्रशिक्षणे भागमगृह्णन्। साधारणाऽध्यापनातिरेकेण विश्वविद्यालयः छात्रेभ्यः शास्त्रपरीक्षाः अवधानसंस्कृतवर्गसंस्कृतप्रशिक्षणसंस्कृताभ्यासशालादिविविधाभ्यासकार्यक्रमान्, स्पर्धाः च आयोजयति।

**यूजीसी नेट/जेआरएफ/स्लेट प्रशिक्षणशिबिरे प्राध्यापकानां योगदानम्-**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य प्लेस्मेन्टसेल इत्यनेन यूजीसी नेट/ जेआरएफ/ स्लेट/ सेट प्रशिक्षणकेन्द्रस्य आयोजनम् 2018-19 तः अद्यावधिपर्यन्तं प्रचलति। यत्र सर्वेऽपि अत्रत्याः प्राध्यापकाः नित्याध्यापनातिरिक्तसमये अध्यापकत्वेन सहयोगं कुर्वन्ति। अत्र येषां प्राध्यापकानां योगदानमासीत् तेषां नामानि- डॉ. मुदितपाण्डेयः, डॉ. पूजाउपाध्यायः, डॉ. अखिलेशकुमारद्विवेदी, डॉ. विनोदकुमारपाण्डेयः, डॉ. विजयकुमारः, डॉ. रामकुमारी, डॉ. पतञ्जलिकुमारपाण्डेयः, डॉ. गङ्गाशरणः, श्रीअनुरुद्धत्रिपाठी, श्रीशिवानन्दमिश्रः, श्रीप्रवीणजोशी इत्यादयः अध्यापकाः समर्पिताः आसन्।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.4.10_1716028990_12674.pdf) |
| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://mpsvv.ac.in/images/naac/LINK%202%20CRITERIAN/2.4.10%20link.pdf) |

**2.5 Evaluation Process and Reforms**

***2.5.1 Average number of days from the date of last semester-end/ year-end examination till the declaration of results during the last five years***

***विगतपञ्चवर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां सङ्ख्यायाः मध्यमानम् -***

**Answer:** 21.8

2.5.1.1 Number of days from the date of last semester-end/ year-end examination till the declaration of results year-wise during the last five years.

विगतपञ्चवर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 25 | 16 | 25 | 11 | 32 |

| File Description | Document |
|---|---|
| List of Programmes and date of last semester and date of declaration of results (Data Template) पाठ्यक्रमसूची, अन्तिमषाण्मासिक्याः दिनाङ्कः, परीक्षापरिणामघोषणदिनाङ्कश्च (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.5.1_1715945545_1267 |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.5.1_1715966238_1267 |

***2.5.2 Average percentage of student complaints/ grievances about evaluation against total number appeared in the examinations during the last five years.***

***विगतपञ्चवर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये अभियाच्जाम्/ अभियोगं वा कृतवतां छात्राणां मध्यमानस्य प्रतिशतता।***

**Answer:** 0.36

2.5.2.1 Number of complaints/ grievances about evaluation year-wise during the last five years.

विगतपञ्चवर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये अभियाच्जाम्/ अभियोगं वा कृतवतां छात्राणां वार्षिकी सङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 4 | 0 | 0 | 0 | 2 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.5.2_1715945193_126 |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.5.2_1716113380_126 |

***2.5.3 Average percentage of applications for revaluation leading to change in marks***

***पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां प्रतिशतं मध्यमानस्य मानं, यत्र अङ्कानां परिवर्तनं जातम्।***

**Answer:** 5

2.5.3.1 Number of applications for revaluation leading to change in marks year-wise during the last five years

विगतपञ्चवर्षेषु पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां वार्षिकी सङ्ख्या, यत्र अङ्कानां परिवर्तनं जातम्।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 01 | 00 | 00 | 00 | 00 |

2.5.3.2 Number of revaluation applications year-wise during the last five years.

विगतपञ्चवर्षेषु पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां वार्षिकी सङ्ख्या

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 04 | 00 | 00 | 00 | 02 |

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.5.3_1716113617_12674.pdf) |

***2.5.4 Positive impact of reforms on the examination procedures and processes including IT integration and continuous internal assessment on the examination management system.***

***परीक्षाप्रबन्धनप्रणाल्याः परीक्षापद्धतेः सूचनाप्रविधेश्च निरन्तरम् आन्तरिकपरीक्षणस्य च अनुकूलः प्रभावः अनुभूयते।***

**Answer:**

पाठ्यक्रमाणाम् अङ्गं भवति परीक्षापद्धतिः। महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य परीक्षापद्धतिः, तन्त्रज्ञानसम्पत्तेः सहकारेण सूचनाप्रविधिसंयोजनेन परीक्षासम्बन्धिकार्याणि निर्वहति। परीक्षापद्धतिः, आन्तरिकपरीक्षाप्रणाली, आन्तरिकमूल्याङ्कनं यथाकालं समन्वयति।

विश्वविद्यालयद्वारा शास्त्री, बी.ए. आनर्स, बी.ए. योगः, शास्त्रिशिक्षाशास्त्री (BA.Bed), इत्येते स्नातकपाठ्यक्रमाः राष्ट्रियशिक्षानीतिदिशा सज्जीकृताः चतुर्वार्षिकाः पाठ्यक्रमाः सन्ति। एतेषां पाठ्यक्रमाणां परीक्षापद्धतिः वार्षिकी । अत्र प्रति प्रश्नपत्रं त्रिंशद् अङ्कानां आन्तरिकमूल्याङ्कनं सप्तत्यङ्कानां च बाह्यपरीक्षा भवति। एवमेव आचार्य-एम.ए.पाठ्यक्रमाः चतुर्षु सत्रार्द्धेषु विभक्ताः सन्ति। अत्र प्रति सत्रार्द्धं पञ्चप्रश्नपत्राणि भवन्ति। तत्र पञ्चमं पत्रं वैकल्पिकं भवति। यत्र सी.बी.सी.एस. पद्धत्या स्वविषयमतिरिच्य स्वरुच्या अन्यं विषयं स्वीकृत्य छात्राः अधीयते। अत्र 40 अङ्कानामान्तरिकमूल्याङ्कनं 60 अङ्कानां बाह्यमूल्याङ्कनं भवति। एवमेव विद्यावारिधिपाठ्यक्रमः, प्रमाणपत्रीयपाठ्यक्रमाश्च सञ्चाल्यन्ते। उपर्युक्तानां पाठ्यक्रमाणां परीक्षावेदनं विश्वविद्यालयस्य वेवसाईट(Website) सद्यस्कमाध्यमेन (Online) सञ्चाल्यते।

**परीक्षायाः पूर्वप्रक्रिया-**

- प्रत्येकं प्रश्नपत्राय प्रश्नपत्रद्वयं निर्मातुं परीक्षकनामानि स्वीकृत्य प्रश्नपत्राणां सज्जीकरणं विधीयते।
- परीक्षाविभागेन विषयानुगुणं प्रश्नपत्रसज्जीकरणाय कार्यालयादेशाः क्रियन्ते ।
- समयपत्रकम् अन्तर्जालमाध्यमेन, पत्रमाध्यमेन च प्रसार्यते ।
- आवेदनपत्रम् अन्तर्जालमाध्यमेन प्रपूर्य कक्षा-विभाग-विषयानुगुणं वर्गीकरणं क्रियते।
- परीक्षाशुल्कं विश्वविद्यालयस्य वित्तकोषे अन्तर्जालमाध्यमेनैव स्वीक्रियते ।

- विषयानुगुणं प्रश्नपत्राणां टङ्कणं, पूर्वफलसंशोधनम्, आवश्यकतानुगुणं प्रतिलिपिं कृत्वा तत्तत्परीक्षाकेन्द्रेभ्यः प्रश्नपत्राणि, रिक्ताः उत्तरपुस्तिकाः, आवश्यकाः कर्गदाश्च प्रेष्यन्ते।

**परीक्षासमये प्रक्रिया-**

- परीक्षाक्रेन्द्राणां निर्धारणं क्रियते।
- परीक्षासूची(परीक्षासमयसारिणी)निर्धारणं क्रियते।
- आवश्यकप्रपत्राणां प्रश्नपत्रादीनां च सम्प्रेषणम्।
- परीक्षानिरीक्षणमण्डलानि प्रेष्यन्ते ।

**केन्द्रीयकृतमूल्याङ्कनस्य प्रक्रिया**

- परीक्षाकेन्द्रेभ्यः आगतानाम् उत्तरपुस्तिकानां दिवस-कक्षा-विषयानुगुणं वर्गीकरणं क्रियते।
- मूल्याङ्कनकर्तृणां नामानि परीक्षासमितिना स्वीक्रियन्ते। ततः बाह्यमूल्याङ्कनं कर्तुमुत्तरपुस्तिकानां विवरणं परीक्षाविभागद्वारा क्रियते।
- स्नातकस्तरस्य आधारपरीक्षापाठ्यक्रमपरीक्षामूल्याङ्कनम् ओ.एम. आर. पत्रकसङ्गणकमाध्यमेन क्रियते।

**परीक्षापरिणामस्य प्रक्रिया-**

- परीक्षकैः पर्णं (फाईल) प्रपर्णं (काउन्टरफाईल) प्राप्यते।
- परीक्षापरिणामः सङ्गणकमाध्यमेन सज्जीक्रियते ।
- परीक्षापरिणामः विश्वविद्यालयस्य अन्तर्जालमाध्यमेन उद्घोष्यते ।
- परीक्षापरिणामस्य सूचनां विश्वविद्यालयस्य वेवसाईट (Website) माध्यमेन महाविद्यालयाः अवगच्छन्ति।
- "**पासलिस्ट**" (उत्तीर्णसूची) अपि विश्वविद्यालयेन उद्घोष्यते।

**परीक्षापद्धतौ पारदर्शिता-**

- परीक्षायाः कृते आवेदनपत्राणि महाविद्यालयानां कृते अणुसङ्केतमाध्यमेन प्रेष्यन्ते, तथा च परीक्षाशुल्कम् अन्तर्जालमाध्यमेन पूरयितुं सौविध्यं प्रदीयते, येन समयस्य कर्गदानां च रक्षणं भवति।
- प्रश्नपत्राणां गोपनीयतां रक्षयितुं प्रश्नपत्राणाम् उपरि विश्वविद्यालयस्य विशेषचिह्नयुतः कर्गदः स्थाप्यते।
- परीक्षायां प्रश्नपत्राणां बन्धस्य उद्घाटनं छात्राणाम् उपस्थितौ क्रियते, अपि च प्रत्येक प्रश्नपत्रबन्धस्य उपरि छात्रद्वयस्य हस्ताक्षरमपि स्वीक्रियते, येन परीक्षाप्रश्नपत्रस्य बन्धः सुरक्षितः अस्ति इति निश्चेतुं शक्यते।
- समग्रमूल्याङ्कनप्रक्रियायां विद्यार्थिनः परिचयः गुप्तः भवेत्, एतत् सुनिश्चितं क्रियते।
- परीक्षापरिणामः मासावधिं यावद्विश्वविद्यालयस्य अन्तर्जाले प्रकाश्यते। येन छात्राः स्वयमेव यत्र कुत्रापि स्थित्वा परीक्षापरिणामं द्रष्टुं शक्नुवन्ति ।
- विद्यार्थिनां हिताय अन्तिमसत्रीयविद्यार्थिनां कृते पूरकपरीक्षायाः आयोजनं क्रियते। पूरक,ATKT, अन्तिमावसररूपेण विद्यार्थिनां परीक्षायोजनं क्रियते। स्नातके पुनर्मूल्याङ्कनं भवति। स्नातकोत्तरे पुनर्गणना भवति।
- विद्यार्थिभ्यः विशिष्टकर्गदयुक्ता (Watter proof) अङ्कतालिका (Mark sheet) प्रदीयते ।
- विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या सञ्चालितानां कार्यक्रमाणां परीक्षापद्धतौ विश्वविद्यालय-अनुदान-आयोगस्य निर्देशानुसारं SGPA/ सञ्चितश्रेण्यङ्कसाधारणमानम् (CGPA) पद्धत्यानुगुणम् श्रेणीपत्रिकान्विता (ग्रेड) अङ्कतालिका प्रदीयते।
- महाविद्यालयाः स्वस्य आईडीपासवर्ड इत्यस्य उपयोगं कृत्वा स्वयमेव आन्तरिकमूल्याङ्कनपरीक्षायाः प्रदत्ताङ्कं सम्पूरयन्ति। अनेन समयस्य रक्षणं/सदुपयोगो भवति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.5.4_1716030393_12674.pdf) |
| Provide link for Additional Information अतिरिक्तसूचनानां सन्धानम् | View Document (https://mpsvv.ac.in/images/naac/LINK%202%20CRITERIAN/2.5.4%20link.pdf) |

***2.5.5 Status of automation of Examination division along with approved Examination Manual-***

***परीक्षाविभागस्य यान्त्रिकीकरणेन सह अङ्गीकृतायाः परीक्षामार्गदर्शिकायाः स्थितिः -***

**Answer:** A. 100% automation of entire division & implementation of Examination Management System (EMS) (अ. सम्पूर्णविभागस्य 100% यान्त्रिकीकरणम्, परीक्षा-प्रबन्धन-प्रणाल्याः कार्यान्वयनं च ।)

| File Description | Document |
|---|---|

| | |
|---|---|
| Current Manual of examination automation system परीक्षा-यान्त्रिकीकरण-प्रणाल्याः अधुनातनी दर्शिका | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.5.5_1715945746_12674.pdf) |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.5.5_1716017248_12674.pdf) |
| Annual reports of examination including the present status of automation (Data Template) अधुनातन्याः यान्त्रिकीकरणस्थित्या सहितं परीक्षायाः वार्षिकं वृत्तम् (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.5.5_1715945723_12674.xlsx) |

***2.5.6 Use of Sanskrit as a medium for Question Paper setting and Answering in Examination.***

***विश्वविद्यालयः परीक्षाप्रश्नपत्राणां निर्माणे उत्तरलेखने च संस्कृतमाध्यममनुसरति।***

**Answer:**

विश्वविद्यालयोऽयं संस्कृतमाध्यमेन सञ्चालितो भवति। **भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा** इति भणतिमनुस्मरन् महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः उज्जयिन्याः महर्षिसान्दीपनि-कविकुलगुरुकालिदास-भर्तृहर्यादीनां प्राचीनभारतीयशास्त्रपरम्परायाः संरक्षणं करोति। अत्र शास्त्रि-आचार्यादिपाठ्यक्रमेषु समस्तपाठ्यक्रमाणां प्रश्नपत्रनिर्माणम् उत्तरपुस्तिकालेखनञ्च संस्कृतमाध्यमेनैव भवति।

- स्नातकस्नातकोत्तरपरीक्षायां पारम्परिकविषयाणां परीक्षासु संस्कृतभाषा प्रयुज्यते।
- पाठ्यक्रमे ये भाषासम्बन्धिनः विषयाः सन्ति, तेषां परीक्षा तया भाषया एव भवति।
- शास्त्रिशिक्षाशास्त्रिसदृश-आधुनिकपाठ्यक्रमेऽपि अध्ययनाध्यापनं प्रश्नपत्रनिर्माणमुत्तरलेखनञ्चेति संस्कृतमाध्यमेनैव भवति।

अतः छात्राणां संस्कृतभाषायाः समुचितोन्नत्यै अपि संस्कृतमाध्यममनुसरति।

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.5.6_1716022960_12674.pdf) |
| Upload a few answer papers of some programs written in Sanskrit. (संस्कृतमाध्यमेन लिखितोत्तराणां केषाञ्चित् पाठ्यक्रमाणां कानिचित् उत्तरपत्राणि।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.5.6_1715982321_12674.pdf) |

| | |
|---|---|
| Provide link for Additional Information (अतिरिक्तसूचनानां सन्धानम्) | View Document (https://mpsvv.ac.in/images/naac/2%20criterian/2.5.6/Sanskrit%20Medium%20Writting%20.jpg) |

**2.6 Student Performance and Learning Outcomes**

***2.6.1 Programme outcomes, Programme specific outcomes and course outcomes for all Programmes offered by the institution are stated and displayed on website and communicated to teachers and students.***

***संस्थाद्वारा परिचालितानां सर्वेषां पाठ्यक्रमाणां परिणामाः, पाठ्यक्रमाणां विशिष्टपरिणामाः,पाठ्यपत्राणां परिणामाः च संस्थाजालस्थाने निर्दिश्यन्ते, प्रदर्श्यन्ते च, छात्राणां शिक्षकाणां च कृते प्रेष्यन्ते।***

**Answer:**

अस्मिन् विश्वविद्यालये सञ्चाल्यमानानां सर्वेषां कार्यक्रमाणां परिणामाः राष्ट्रिय-अध्यापक-शिक्षा-परिषत् (NCTE), विश्वविद्यालय-अनुदान आयोगः (UGC), मध्यप्रदेश-सर्वकारः इत्यादिसंस्थानां मार्गदर्शनानुसारं नियमानुगुणं च निर्धार्यन्ते। एते कार्यक्रमपरिणामाः, कार्यक्रमविशिष्टपरिणामाः, पाठ्यक्रमपरिणामाः च वैश्विकस्तरीयाः भवेयुः अथ च नियोक्तृणाम् अभियाचनानुसारं भवेयुः एतद्विषये महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः अधोलिखितां प्रक्रियाम् अनुसरति।

1. विश्वविद्यालयस्य अभ्यासक्रमसमितिद्वारा पाठ्यक्रमनिर्माणसमये तत्तत्कार्यक्रमस्य परिणामविषये, विशिष्टपरिणामविषये, पाठ्यक्रमपरिणामविषये च विशदं चिन्तनं क्रियते। सामान्यतया पाठ्यक्रमस्य परिणामः तत्तत्कार्यक्रमस्य परिणामस्य तथा च तत्तत्कार्यक्रमविशिष्टस्य परिणामस्य आधारेण निश्चीयते। अतः कार्यक्रमपरिणामस्य निर्माणानन्तरं कार्यक्रमविशिष्ट परिणामः, पाठ्यक्रम परिणामः च निर्धार्यते।

1. एतेषु कार्यक्रमेषु प्रत्येक कार्यक्रमस्य उद्देश्यानि, विषयाङ्गानि, अन्वित्याधारेण विभाजनम्, पाठ्यपुस्तकस्य नाम, सन्दर्भपुस्तकानां नामानि, व्याख्यानस्य रूपरेखा, मूल्याङ्कनविधिः इत्यादिविषयाणां समावेशः भवति। प्रत्येक सङ्कायस्य प्राध्यापका विषयविशेषज्ञाः च स्वकीयविषयसम्बद्धस्य कार्यक्रमस्य स्वरूपं निर्माय अभ्यासक्रमसमितौ प्रस्तुवन्ति, अभ्यासक्रमसमितेः सदस्याः तत्तद्विषयाणां विशेषज्ञाः भवन्ति। ते एतेषां सर्वेषां परिणामानां विषये चिन्तनं कुर्वन्ति।
2. अभ्यासक्रमसमितिद्वारा यथासमयम् उपविश्य कार्यक्रमपरिणामेषु नावीन्यं सम्पाद्यते। ततः परं कार्यक्रमाणां परिणामाः, कार्यक्रमाणां विशिष्टपरिणामाः, पाठ्यक्रमाणां च परिणामाः विश्वविद्यालयस्य तत्तत्सङ्कायेषु प्रस्तूयन्ते, तत्र एतेषाम् अनुमोदनानन्तरं विश्वविद्यालयस्य विद्यारिषदि, कार्यपरिषदि च प्रस्तुत्य अनुमतिः स्वीक्रियते। ततः प्राप्तायाम् अनुमत्यां सत्याम् इमे परिणामाः विश्वविद्यालयस्य जालपुटे, अध्यापकेषु, विद्यार्थिषु च प्रदर्शनपुरस्सरं सम्प्रेष्यन्ते।

**कार्यक्रमविशिष्टपरिणामानां, पाठ्यक्रमापरिणामानां च कार्यक्रमपरिणामानां, सम्प्रेषणकार्यतन्त्रस्य विवरणम्**

1. कार्यक्रमेषु तत्परिणामेषु च कालानुगुणं नावीन्यं सम्पादनार्थम् अभ्यासक्रमसमितिसदस्याः सङ्कायप्राध्यापकैः प्रस्तुतस्य कार्यक्रम-परिणामस्य अवलोकनं विधाय कार्यक्रम-परिणामम् अनुमन्यते। ततः अयं कार्यक्रम-परिणामः विश्वविद्यालयस्य विद्यापरिषदि (Academic Council), कार्यपरिषदि (Executive Council) च अनुमोदनार्थं प्रस्तुतः क्रियते । ततः अनुमोदनानन्तरं कार्यक्रम-परिणामः सर्वेषां प्राध्यापकानां कृते, विश्वविद्यालयसंलग्नमहाविद्यालयानां कृते च प्रेष्यते। यस्य आधारेण सर्वत्र अध्यापनं भवति।

2. एतेषां कार्यक्रमपरिणामानां, कार्यक्रमविशिष्टपरिणामानां, पाठ्यक्रमपरिणामानां च उद्योजनं विश्वविद्यालयस्य अन्तर्जालेऽपि क्रियते। ततः छात्राः, अध्यापकाः, लाभग्राहिणः च एतान् परिणामान् ज्ञातुं शक्नुवन्ति ।

3. नूतनसत्रस्य आरम्भे विश्वविद्यालये प्रचालितानां कार्यक्रमाणां परिचयात्मिका एका गोष्ठी आयोज्यते यत्र सर्वेऽपि छात्राः, अध्यापकाः च भागं गृह्णन्ति। अस्यां गोष्ठ्यां शास्त्री, आचार्य, इत्यादीनां कार्यक्रमाणां कार्यक्रमविशिष्टानां च परिचयः प्रदीयते। अपि च अत्रैव अमीषां कार्यक्रमपरिणामानां, कार्यक्रमविशिष्टपरिणामानां च विषयेऽपि छात्राः अध्यापकाश्च सूच्यन्ते ।

4. कार्यक्रमपरिणामविषये तत्तत्सङ्कायस्य अध्यक्षाः गोष्ठ्यां स्वसङ्कायान्तर्गतान् अध्यापकान् एतद्विषये बोधयन्ति। ततः परं तत्तत्सङ्कायस्य प्राध्यापकैः अस्य कार्यक्रमस्य उद्देश्यानि, विषयाङ्गानि परिणामाः च छात्राणां कृते कक्ष्यासु नूतनसत्रारम्भे बोध्यन्ते।

6. अस्य विश्वविद्यालयस्य एतेषां आन्तरिकगुणवत्ताऽऽश्वासनकेन्द्रमपि कार्यक्रमपरिणामानां, कार्यक्रमविशिष्टपरिणामानां, पाठ्यक्रमापरिणामानां च विषये चर्चा करोति ।

7. इमे कार्यक्रमाणां परिणामाः, कार्यक्रमाणां विशिष्टपरिणामाः, पाठ्यक्रमाणां परिणामाः च विश्वविद्यालयस्य परीक्षाविभागेन अपि अन्तर्जालमाध्यमेन सर्वेषां लाभग्राहिणां कृते सम्प्रेष्यन्ते । इत्थं कार्यक्रमस्य स्वरूपं, तस्य निर्माणं, मूल्याङ्कनप्रक्रिया, स्वाध्यायकार्य, आन्तरिकपरीक्षा इत्यादिविषयाणां विश्वविद्यालयेन सम्प्रेषणं क्रियते ।

विश्वविद्यालयस्य सर्वेषां कार्यक्रमाणां P.O. (पाठ्यक्रमपरिणामाः) P.S.O. (कार्यक्रमाणां विशिष्टपरिणामाः ) पाठ्यक्रमाणां परिणामाः http://www.mpsvv.ac.in/ इति वेबसाईटमध्ये प्रदर्शिताः ।

| File Description | Document |
|---|---|
| Upload POs, PSOs, COs for all courses सर्वेषां पाठ्यक्रमाणां परिणामाः पाठ्यक्रमाणां विशिष्टपरिणामाः, पाठ्यपत्राणां परिणामाः च संस्थाजालस्थाने उपारोपणीयाः। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.6.1_1715983705_12674.pdf) |
| Upload a description of Mechanism of Communication सम्प्रेषणकार्यतन्त्रस्य विवरणम् उपारोपणीयम्। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.6.1_1716023095_12674.pdf) |
| Provide the URL जालस्थानसन्धानं निर्दिशन्तु | View Document (https://mpsvv.ac.in/index.php/en/ug-shastri-syllabus-outcome) |

***2.6.2 Attainment of Programme outcomes, Programme specific outcomes and course outcomes are evaluated by the institution***

***एतेषां सर्वेषां पाठ्यक्रमपरिणामानां, पाठ्यक्रमविशिष्टपरिणामानां, पाठ्यपत्रपरिणामानां निष्पत्तीनां च मूल्याङ्कनं संस्था करोति।***

**Answer:**

महर्षिपाणिनिसंस्कतवैदिकविश्वविद्यालयस्य पाठ्यक्रमाः भारतीयज्ञानपरम्पराश्रिताः वर्तन्ते। भारतीयपरम्परा, संस्कृतिः, वेदेषु शास्त्रेषु च निहिताः विचारधाराः इत्येते बिन्दवः पाठ्यक्रमेषु प्रतिबिम्बिताः भवन्ति। पाठ्यक्रमाणां निर्माणम्, निष्पत्तिः, परिणामानां मूल्याङ्कनम्, निष्पत्तेः मूल्याङ्कनम्, मापनम् इतीमानि चाक्रिककार्याणि यथाकालं क्रियन्ते।

- महर्षिपाणिनिसंस्कतवैदिकविश्वविद्यालयः सर्वेषां कार्यक्रमविशिष्टपरिणामानां, पाठ्यक्रमपरिणामानां च निष्पत्तीनां मूल्याङ्कनं करोति। तदर्थं विश्वविद्यालये निष्पत्तिमापनस्य विश्वसनीया मापनपद्धतिः वर्तते। विश्वविद्यालयस्य संस्थागतसंस्कृतिः शैक्षणिकक्षेत्रेषु छात्राणां सर्वोत्तमप्रदर्शनार्थं निरन्तरं प्रयासरता वर्तते।
- अस्य विश्वविद्यालयस्य सर्वेऽपि कार्यक्रमाः, विशिष्टाश्च कार्यक्रमाः **"संस्कृतं नाम दैवी वाक्"** इति विश्वविद्यालयस्य ध्येयवाक्यम् अभिमुखीकृत्य छात्राणां समग्रविकासार्थं निर्धारिताः सन्ति। अतः विद्यार्थिनां दैनन्दिनव्यवहारेण, विभिन्नप्रतियोगितासु प्रदर्शनमाध्यमेन, परीक्षायां प्राप्ताङ्कमाध्यमेन च एतेषां परिणामानां निष्पत्तीनां च मापनं विश्वविद्यालयेन क्रियते।
- एतेषां कार्यक्रमाणां परिणामस्य आधारेण सत्रान्तपरीक्षायाः अनन्तरं विद्यार्थिनां कृते विश्वविद्यालयेन उपाधिः प्रदीयते। एतस्याः परीक्षायाः आधारेण एतत् सुनिश्चितं क्रियते यत् विभिन्नकार्यक्रमाणां, कार्यक्रमविशिष्टानां, पाठ्यक्रमपत्राणां च परिणामाः छात्रैः कियता परिमाणेन प्राप्ताः सन्ति। परीक्षायाः एतन्महत्त्वाधारेण विश्वविद्यालये एका समीचीना परीक्षाप्रक्रिया अस्ति। यत्र विश्वसनीया परीक्षापद्धतिः, विश्वसनीया मूल्याङ्कनप्रणाली, यथासमयं परीक्षापरिणामस्य उद्घोषणा इत्यादिकम् अस्याः उद्देश्यानि सन्ति। अयं विश्वविद्यालयः एतानि उद्देश्यानि पूरयितुं सर्वविधां व्यवस्थां करोति।
- प्रत्येकं वर्षे सततमूल्याङ्कनमाध्यमेन सङ्गायगोष्ठीमाध्यमेन च कार्यक्रमाणां मूल्याङ्कनं विधीयते।
- कार्यक्रमविशिष्टस्य परिणामस्य मूल्याङ्कनं प्रत्येकस्मिन् सत्रे क्रियते। तथैव पाठ्यक्रमस्य मूल्याङ्कनमपि प्रत्येकं सत्रस्य अन्ते क्रियते ।
- पाठ्यपत्रस्य परिणामनिष्पत्तेः मूल्याङ्कनं सततरूपेण आन्तरिकमूल्याङ्कनमाध्यमेन तत्तद्विभागस्य अध्यापकाः कुर्वन्ति।
- कार्यक्रमस्य विशिष्टपरिणामनिष्पत्तेः मूल्याङ्कनं तत्तद्विभागस्य अध्यक्षाः कुर्वन्ति। तथा च कार्यक्रमाणां परिणामनिष्पत्तेः मूल्याङ्कनं कुलपतिः, विद्यापरिषदः सदस्याः, कार्यपरिषदः सदस्याः च कुर्वन्ति ।

**पाठ्यक्रमपरिणामनिष्पत्तीनां फलोदयः-**

- शैक्षिकवर्षम् 2018 आरभ्य अस्य विश्वविद्यालयस्य त्रिंशत्यधिकाः छात्राः विश्वविद्यालय- अनुदान-आयोगस्य राष्ट्रियपात्रतापरीक्षां, कनिष्ठ-शोधाध्येतृवृत्तिं, राज्यपात्रतापरीक्षां च उत्तीर्णवन्तः। तत्र त्रयः छात्राः कनिष्ठ-शोध-अध्येतृवृत्तिं (Junior research Fellowship), द्वे छात्रे राष्ट्रिय-जनजातीय-शोधवृत्तिं (National Tribal Fellowship), त्रयः छात्राः मध्यप्रदेशसर्वकारस्य शोधवृत्तिं (Scheme Of Developing High quality research) प्राप्तवन्तः ।
- अस्य विश्वविद्यालयस्य बहवः छात्राः केन्द्रीयसंस्कृतविश्वविद्यालयेन तथा अन्यैः विश्वविद्यालयैः प्रायोजितायां राज्यस्तरीय-शास्त्रीयस्पर्धायां, विभिन्नसंस्थाभिः आयोजितासु प्रतियोगितासु भागं गृहीत्वा भाषण-शलाका-काव्यरचना-स्फूर्तिस्पर्धादिषु

स्वर्णादिपुरस्कारैः सभाजिताः भवन्ति ।

**परिणामस्य निष्पत्तेः मापनार्थं छात्राणां सततरूपेण आन्तरिकमूल्याङ्कनम् -**

- सर्वेषां परिणामानां मूल्याङ्कनं कर्तुं विश्वविद्यालयः छात्राणां सततरूपेण आन्तरिकं मूल्याङ्कनं करोति। प्रत्येकं पाठ्यक्रमस्य आन्तरिकमूल्याङ्कने विश्वविद्यायलेन सम्पूर्णरूपेण पारदर्शिता परिपाल्यते। यत्र उपस्थितेः आधारेण प्रदत्तस्वाध्यायकार्यस्य आधारेण, लिखितपरीक्षायाः आधारेण च अङ्काः प्रदीयन्ते ।
- कार्यक्रमस्य परिणामनिष्पत्तेः मूल्याङ्कनाय प्रतिपुष्टिप्रणाली विद्यते, यत्र विश्वविद्यालयः संरचित-प्रतिपुष्टिप्रणाल्या छात्रेभ्यः, अध्यापकेभ्यः, वृत्तिदातृभ्यः, पूर्वच्छात्रेभ्यः, अभिभावकेभ्यश्च प्रतिपुष्टिं स्वीकृत्य समीक्षां करोति। प्रतिपुष्टिं प्राप्य छात्राणां स्वस्थमानसिकतानिर्माणम्, सेवा-त्याग-राष्ट्रभावनायाः निर्माणम्, विविधप्रान्तेभ्यः आगतानां छात्राणां भाषाकौशलविकासाय च अयं विश्वविद्यालयः सततरूपेण प्रयासरतोऽस्ति ।
- एतेषां परिणामानां प्राप्तौ बाधकतत्त्वानि अभिज्ञाय विश्वविद्यालयेन तेषां निराकरणार्थं विभिन्नाः शैक्षणिकाः उपक्रमाः आयोज्यन्ते। तद्यथा मन्दाधिगन्तॄणां छात्राणां कृते अतिरिक्ताः वर्गाः, वैयक्तिकं मार्गदर्शनम्, पूरकपरीक्षायाः अवसरः इत्यादीनि। अग्रेसराधिगन्तारः छात्राः कार्यक्रमस्य परिणामाधारेण अभिज्ञायन्ते, ततः तेषां संवर्धनगतिविधीनां माध्यमेन सम्पोषणं क्रियते येन एते छात्राः योग्याः नागरिकाः भवेयुः।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.6.2_1716033582_12674.pdf) |
| Provide link for Additional Information अतिरिक्तसूचनानां सन्धानम् | View Document (https://mpsvv.ac.in/images/naac/LINK%202%20CRITERIAN/2.6.2%20link.pdf) |

***2.6.3 Average pass percentage of students***

***छात्राणाम् उत्तीर्णताप्रतिशततायाः मध्यमानम्***

**Answer:** 98.64

2.6.3.1 Total number of final year students who passed the university examinations

विश्वविद्यालयस्य परीक्षासु उत्तीर्णानाम् अन्तिमवर्षीयाणां छात्राणां सङ्ख्या

Answer: 145

2.6.3.2 Total number of final year students who appeared for the examinations

अन्तिमवर्षपरीक्षासु सम्मिलितानां छात्राणां योगः

Answer: 147

| File Description | Document |
|---|---|

| | |
|---|---|
| Upload list of Programmes and number of students passed and appeared in the final year examination (Data Template) पाठ्यक्रमसूची, परीक्षायाम् उत्तीर्णानां छात्राणां सङ्ख्या, आन्तिमवर्षपरीक्षायां सम्मिलितानां छात्राणां योगः च उपारोपणीयाः(दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.6.3_1716042753_1267 |
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/2.6.3_1716032801_1267 |
| Provide link for the annual report वार्षिकप्रतिवेदनस्य सन्धानम्। | View Document (https://mpsvv.ac.in/images/naac/2%20criterian/2.6.3/Cover%20Page%20Index%202.6.3.pdf |

***2.6.4 The Institution has mechanism to evaluate the performance of students through the vakyartha/ shastrartha-Sabhas, Shalaka-Pareeksha, Shastra-Pareeksha (Oral), Shastra-spardha, Writing Sanskrit-Slokas/ Padya/ Poetry etc.***

***संस्था वाक्यार्थ/शास्त्रार्थसभा-शलाकापरीक्षा-शास्त्रपरीक्षा(मौखिकं)-शास्त्रस्पर्धा-संस्कृतश्लोक-पद्य-काव्यादिभिः छात्राणां प्रस्तुतेः मूल्याङ्कनार्थं किमपि कार्यतन्त्रमनुसरति।***

**Answer:**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयेन छात्राणां प्रदर्शनस्य मूल्यांकनाय विविधाः पद्धतयः उपयुज्यन्ते। यथा- वाक्यार्थ-सभा, शास्त्रार्थसभा, शलाकापरीक्षा, शास्त्रपरीक्षा, शास्त्रस्पर्धा, संस्कृतपद्यरचना, वाग्वर्धिनीपरिषदि छात्राणां विषयप्रस्तुतिः इत्यादिभिः पद्धतिभिः छात्राणां प्रस्तुतेः मूल्याङ्कनार्थं कार्यतन्त्रमनुसरति।

**वाक्यार्थ-सभा/ शास्त्रार्थसभा-**

- भारतीयसंस्कृतेः मूलभूतसिद्धान्तेषु निहितानां प्रबुद्धानां, समावेषिणाम् उदात्तानां, सहिष्णुनां, सार्वत्रिकानाम् उद्देश्यानां पूर्तये क्रियाशीलमिदं केन्द्रं संस्कृतस्य सन्दर्भे प्रगतिशीलप्रगतेः अपि च बहुमूल्यम् अध्ययनं प्रशिक्षणम्, अनुसन्धानम्, अन्वेषणञ्च कुर्वद् अस्ति। भाषा प्राचीनशास्त्रपरम्परायाः तथा भारतीयशिक्षायाः क्षेत्रे उत्कृष्टकीर्तिमानं स्थापयतुं सर्वदा यत्नं विदधाति। अनेन केन्द्रमाध्यमेन न केवलमत्रत्याः जनाः लाभान्विताः जाताः अपितु देशविदेशपर्यन्तं जनाः लाभान्विताः भवन्ति।

नायकत्वस्य अन्तर्भावःएवं क्रमेण वर्तते-

मध्यप्रदेशराज्यस्य मा. राज्यपालाः, विश्वविद्यालस्य मा. कुलाधिपतयः प्रमुखाः नायकाः।

कुलपतिः विश्वविद्यालयस्य शैक्षिकाणां प्रशासनकार्याणां च प्रमुखकार्यकारीनायकः। विश्वविद्यालयनिर्णयानां क्रियान्वयनं करोति।

कुलसचिवः विश्वविद्यालयस्य प्रमुखः प्रशासनाधिकारी

संकायाध्यक्षः विश्वविद्यालयस्य शैक्षिककार्याणि साधयन्ति।

अनुसन्धाननिदेशकः अनुसन्धानविषयेषु क्रियान्वयनं करोति।

- विभागाध्यक्षः, विश्वविद्यालयस्य अधिकारिणः, छात्रकल्याणाधिष्ठाता, राष्ट्रियसेवायोजनानिदेशकः, वित्ताधिकारी, पुस्तकालयाध्यक्षः अन्ये च स्वक्षेत्रे प्रदत्तं दायित्वं वहन्तः उन्नतये सहकुर्वन्ति।

विश्वविद्यालस्य सर्वाः योजनाः विश्वविद्यालयस्य ध्येयमन्तर्दृष्टिश्च मनसि निधाय तदनुगुणं निर्धारिताः सन्ति।

विश्वविद्यालयस्य अध्यापकाः विश्वविद्यालयस्य सर्वासु प्राधिकरणिषु निर्णयप्रदानाय सहभागं स्वीकुर्वन्ति। विभागीयसमितिः वा अध्ययनमण्डलमथवा विद्यारिषद् उत कार्यपरिषद् वा भवतु सर्वत्र तेषां सोत्साहं भागग्रहणेन च शासनं प्रभारीरूपेण क्रियान्वयनं कर्तुं समर्थं भवति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.1.1_1716110976_12674.pc |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/index.php/en/about-us/mpsvv/vision-mission-core-values) |

***6.1.2 The institution practices decentralization and participative management***

***संस्था सहभागिप्रबन्धनव्यवस्थां विकेन्द्रीकरणप्रक्रियां च अनुसरति।***

**Answer:**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य प्रशासनव्यवस्था पूर्णतः सहयोगिनी विकेन्द्रीकरणप्रक्रियाश्रिता वर्तते। **सङ्घे शक्तिः कलौ युगे** इति वाक्यमनुसृत्य प्रबन्धनव्यवस्था स्वीयानां मानवीयसिद्धान्तानां सहयोगेन एव कार्यं विदधाति। प्रबन्धनपरिश्रमयोः सुचारुरूपेण सङ्घटनाभावे प्रशासनकार्याणि निर्विघ्नं न सम्भवन्ति। अतः सहभागिप्रशासनव्यवस्थां विकेन्द्रीकरणप्रक्रियां च महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः अनुसरति । सहभागिप्रबन्धनव्यवस्थायाः अनुसरणेन विकेन्द्रीकरणप्रक्रियायाः क्रियान्वयनेन च महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य कृते जायमानाः लाभाः यथा -

- संस्कृतेन सम्बद्धानां नूतनविचाराणां योजनानां च क्रियान्वयनावसरे विश्वविद्यालयस्य प्रबन्धनव्यवस्था आत्मानं सबलम् इति भावयति। यतोऽहि समेषां विश्वविद्यालयानां परिपूर्णः सहयोगः एव प्रबन्धनव्यवस्थायाः बलमस्ति।
- लक्ष्यप्राप्तिप्रसङ्गे निर्धारितकाले कार्यकारणावसरे समस्यायाः समाधानान्वेषणावसरे च विश्वविद्यालयोऽयं व्यक्तिगतभूमिकां दायित्वं च अवगम्य व्यक्तिगतं योगदानं प्रयच्छति। अनेन विश्वविद्यालयस्य धनसमयशक्त्यादीनां सदुपयोगो जायते।
- सहभागिप्रबन्धनव्यवस्थायाः अनुसरणेन महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य समेषां कर्मचारिणां मनोबलं प्रतिपलं वर्धते ।
- सहभागिप्रबन्धनव्यवस्थायाः कारणेन विकेन्द्रीकरणप्रक्रियायाः क्रियान्वयनेन च विश्वविद्यालयस्य सर्वाः व्यवस्थाः सुचारुरूपेण प्रचलन्ति।

- विश्वविद्यालयः नूतनयोजनानां क्रियाकलापानां च अनुप्रयोगात् पूर्वपरामर्शशैलीम् आश्रित्य समेषां परामर्शान् स्वीकृत्य अन्तिमनिर्णयं स्वीकरोति । एवमेव अन्तिमनिर्णयप्रसङ्गेऽपि संयुक्तनिर्णयशैलीं समाश्रित्य प्रशास्ति।
- विभिन्नाः परिषदः, समितयः, प्रकोष्ठाः, मण्डलानि, विद्याशाखाश्च प्रशासनव्यस्थां सबलीकर्तुमेव संरचिताः सन्ति।

विश्वविद्यालयस्य प्रतिनिधिभूताः विभिन्नाः समितयः संस्थायाः हितमवलम्ब्य कार्यं कुर्वन्ति। तासु प्रमुखाः समितयः यथा -

**चयनसमितिः**

विश्वविद्यालयस्य नियुक्तिप्रक्रियायां भिन्नभिन्नदृष्टिकोणानां प्राप्तिस्तथा कस्यचिदेकस्य प्रतियोगिनः प्रति विशेषपूर्वाग्रहस्य सम्भावनायाः निराकरणपूर्वकं कार्यं करोतीयं समितिः।

**प्रवेशसमितिः**

प्रवेशसमितिः विद्यार्थिनां प्रवेशप्रक्रियायाः पञ्जीकरणस्य परिचय-प्रवेशपत्रादीनां च वितरणं करोति। अस्याः समितेः अनुशासने छात्राणां प्रवेशः नियमानुसारं विधीयते।

**परीक्षासमितिः**

गोपनीयविभागात् प्रश्नपत्राङ्गीकरणम्, परीक्षायाः व्यवस्थापनम्, केन्द्रस्थापनस्य निर्धारणम्, प्रवेशपत्रप्रश्नप्रत्रदीनां वितरणम्, उत्तरपुस्तिकास्वीकरणम्, मूल्याङ्कनाय गोपनीयविभागं प्रति प्रेषणम् इत्यादीनि कार्याणि विश्वविद्यालये सम्भवन्ति।

**शोधसमितिः**

शोधसमितिः मूल्याङ्कनं करोति यत् प्रस्ताविता परियोजना विश्वविद्यालयस्य नियमानुरूपा विद्यते, तथा अनुसन्धानस्य कृते उपयुक्तसंसाधनानि सन्ति। तथा अनेन शोधेन प्राप्यमाणाः परिणामाः उपयोगिनः सन्ति न वा। अनुसन्धानसमितिः सम्भावितानां शोधकर्तृणां सङ्ठनात्मकसहकारिभिः सह सहयोगस्य समर्थनस्य कृते कार्यं करोति।

**छात्रवृत्तिसमितिः**

छात्रवृत्तिसमितिः छात्रवृत्तिप्राप्तये पात्राणां छात्राणां नामसूचीं निर्माय वस्तुनिष्ठमाध्यमेन छात्रवृत्तिप्रदानाय व्यवस्थां करोति।

**प्रकाशनसमितिः**

प्रकाशनसमितिः विश्वविद्यालयस्य शैक्षिकसम्बद्धान् नैकान् ग्रन्थान् एवं विश्वविद्यालयस्य त्रैमासिकवार्षिकादिपत्रिकाणां प्रकाशनस्य कार्यं करोति।

**ग्रन्थालयसमितिः**

ग्रन्थालयसमितिः पुस्तकानां क्रयणसंरक्षणसंस्थापनवितरणादिषु कार्येषु सर्वदा पथप्रदर्शनं करोति।

**प्रतियोगितासमितिः**

प्रतियोगितासमितिः छात्राणां चतुर्मुखीविकासाय आवश्यकतानुसारं विविधानां प्रतियोगितानामायोजनं करोति।

**छात्रावाससमितिः**

छात्रावाससमितिः विश्वविद्यालये विद्यार्थिनाम् आवासभोजनादिव्यवस्थां निर्वहति। छात्रावासे प्रवेशाय आवश्यकान् नियमान् निर्धारयति। विद्यार्थिनां प्रतिनिधिभ्यः छात्रावासनिर्वहणादिषु सहयोगप्रदानाय प्रेरयति।

**वित्तसमितिः**

वित्तसमितिः विश्वविद्यालये वेतननित्यनैमित्तिकव्ययादीनां प्रबन्धनस्य कार्यं निर्वहति। स्थायवित्तीयसमितेः अनुमोदनेन सहयोगेन वा क्रियाकलापान् विश्वविद्यालयः समेधयति।

**अनुशासनसमितिः**

अनुशासनसमितिः अनुशासनबाधकान् वारयितुमनुशासनव्यवस्थां संरक्षयितुं च सहयोगं करोति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.1.2_1716035829_12674.p |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/index.php/en/about-us/organogram) |

***6.1.3 Sanskrit-Version of vision, mission statement of the university, the Act, Statute, MoA and Rules, Official notification/information, Regulations are available in institutional website.***

***विश्वविद्यालये दूरदृष्टिपत्रस्य, ध्येयपत्रस्य, अधिनियमानाम्, संवैधानिकनिकायानाम्, विश्वविद्यालयस्य लिखितनियमानाम्, औद्योगिकसूचनानां, विनियमानाञ्च संस्कृतरूपान्तरणम् उपलभ्यते।***

**Answer:**

संस्कृतभाषायाः सर्वाङ्गीणविकासाय संस्कृतस्य प्रचाराय प्रसाराय च स्वायत्तसंस्थारूपेण २००८ तमस्य अगस्तमासस्य १५ दिनाङ्के महर्षि पाणिनि संस्कृत विश्वविद्यालयः प्रतिष्ठापितः। अस्मिन् विश्वविद्यालये दूरदृष्टिपत्रस्य, ध्येयपत्रस्य, अधिनियमानां, संवैधानिकनियमानां, विश्वविद्यालयस्य लिखितनियमानां, च अधिकाधिकानि संस्कृत रूपान्तराणि सम्पादितानि। तेषु कानिचन जालपुटे स्थापितानि सन्ति। विश्वविद्यालयस्य जालपुटे एतद्विषयकं विवरणमपि अस्ति। एवं प्रशासने, प्रबन्धने, सञ्चिकानामुपरि टिप्पणीलेखने, सूचनाफलकस्योपरि, कार्यालयीयसूचनासु, शिक्षकविषयकसूचनाप्रदाने अन्येषु कार्येषु च मुख्यमाध्यमरूपेण संस्कृतभाषा स्वीकृता वर्तते। महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः संस्कृतस्य संरक्षणाय सम्पूर्णपरिसरस्य वातावरणं संस्कृतमयं कर्तुं तत्परोऽस्ति।

**प्राशासनिककार्यालये संस्कृतस्य प्रोत्साहनविधिः** -

विश्वविद्यालयेन प्राशासनिककार्यालये यथाशक्यं संस्कृतस्य प्रोत्साहनार्थं सञ्चिकाः संस्कृतमाध्यमेन सञ्चालनाय केषाञ्चित् संस्कृतवाक्यानां सूचिका निर्माय प्रदत्तास्ति। विश्वविद्यालयस्य सिद्धान्तध्येय-लक्ष्यपत्राणि अपि संस्कृतेन संरच्य सर्वत्र संलग्नानि वर्तन्ते। तथा समये समये शिक्षकेतरकर्मचारिभ्यः संस्कृतसम्भाषणशिबिराण्यपि आयोज्यन्ते।

**शैक्षणिककार्यक्रमेषु संस्कृतस्य प्रयोगविवरणम्-**

विश्वविद्यालये शैक्षणिककार्याणि संस्कृतमाध्यमेन विधीयन्ते। यथा- शास्त्राणां पाठनं संस्कृतमाध्यमेन भवति। छात्रैः सह सामान्यवार्तालापः संस्कृतमाध्यमेन क्रियते। सङ्गोष्ठीनां कार्यशालानां विशिष्टकार्यक्रमाणाञ्च सञ्चिकाः, प्रचारप्रसारपत्राणि च संस्कृतमाध्यमेन संरच्यन्ते। विश्वविद्यालयस्य मुखपत्रमपि संस्कृतमाध्यमेन निर्मितमस्ति । विश्वविद्यालस्य विविधफलकानां नामानि, अधिकारिणाम्, अध्यापकाणां, कर्मचारिणां नाम- पदानि अपि सर्वत्र संस्कृतमाध्यमेन संलग्नानि सन्ति।

शास्त्रेषु प्रतिपादितविविधसुभाषितानां हिन्दीभाषानुवादसहितफलकानि विश्वविद्यालयपरिसरे स्थापितानि। वाग्वर्धिनीपरिषद्, वाक्यार्थपरिषद्, विभिन्नसङ्गोष्ठ्यः, विभिन्नस्पर्धाः संस्कृतमाधमेन सञ्चाल्यन्ते। सर्वविधकार्यक्रमाणां सत्रसञ्चालनमपि संस्कृतमाध्यमेन आचर्यते। स्पर्धानां सूचनाः, नियमाः, व्याख्यानमालाः, कार्यक्रमाणां अधिसूचनाः, सत्रसञ्चालनाय सूच्यः, आमन्त्रणपत्राणि सर्वाण्यपि संस्कृतमाध्यमेन विलिख्यन्ते तथा सम्बद्धविद्वद्भ्यः सम्प्रेष्यन्ते च ।

शैक्षणिकस्वाध्यायकार्याणि, महाविद्यालयेभ्यः शिक्षणसम्बद्धव्यवहाराः संस्कृतमाध्यमेन व्यवह्रियन्ते। छात्रेभ्यः आन्तरिकसूचनाः, समयपत्राणि, अधिसूचनाश्च संस्कृतमाध्यमेन प्रदीयन्ते ।

शैक्षणिकगतिविधिषु सर्वत्रैव प्रायः शतप्रतिशतं संस्कृतस्य व्यवहारः क्रियते । तत्र कर्तव्यावकाशप्रत्रम् (D.L), सामान्यावकाशपत्रम् (C.L), इत्यत्रापि कृतमस्ति ।

**फलम्-** बाह्यविभिन्नविश्वविद्यालयेभ्यः विविधविषयनिष्णातारः अतिथयः ये महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयं प्रति समागच्छन्ति तेभ्यः संस्कृतेन सह परिचयः भवति, संस्कृतसूक्तीनामध्ययनेन प्रशान्तचित्ताः भूत्वा आनन्दमनुभवन्ति । ततः स्वविश्वविद्यालयं गृहञ्च गत्वा संस्कृतसम्पोषणमपि समाजाय सम्प्रेषयन्ति। विश्वविद्यालये देशस्य विविधप्रान्तेभ्यः छात्राः सततम् अध्ययनरताः भवन्ति। एवं विभिन्नप्रान्तेभ्यः च समागताः अध्यापकाः अध्यापनरताः भवन्ति। एतेषां सर्वेषामपि मातृभाषाः भिन्नाः, आचाराः भिन्नाः, व्यवहाराश्च भिन्नाः तथापि सर्वे **वसुधैव कुटुम्बकमि**तिवद्वसन्ति। तत्कारणं केवलं संस्कृतमेव। सर्वे संस्कृतेन सम्भाषन्ते व्यवहरन्ते च ।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.1.3_1715975938_12674.p |
| Sanskrit-Version of vision, mission statement documents on the website(दूरदृष्टिपत्रस्य ध्येयपत्रस्य संस्कृतरूपान्तरणम् संस्थायाः जालस्थाने उपलभ्यते) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.1.3_1716111028_12674.p |

| | |
|---|---|
| Provide the weblink of the Sanskrit version of all documents(सर्वेषां प्रलेखानां संस्कृतरुपान्तरणस्य जालसन्धानं प्रयच्छतु) | View Document (https://mpsvv.ac.in/index.php/en/) |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/index.php/en/about-us/mpsvv/vision-mission-core-values) |

**6.2 Strategy Development and Deployment**

***6.2.1 Perspective/Strategic plan and deployment documents are available in the institution***

***संस्थायां भविष्यद्योजनायाः/व्यूहात्मकयोजनायाः नियोजनप्रलेखा उपलभ्यन्ते क्रियान्वयनसम्बद्धानि प्रमाणानि वा उपलभ्यन्ते।***

**Answer:**

संस्कृतवाङ्मयं विविधशास्त्रभूयिष्ठमस्तीति जानन्त्येव । न केवलम् आध्यात्मिकशास्त्राणाम् अपि तु लौकिकानां वैज्ञानिकानां च बहूनां शास्त्राणां विशालाकरो वर्तते । अतः समग्रः सम्प्रत्ययः विश्वविद्यालयस्य भविष्यद्योजनायां विकासोन्मुखी वर्तते। विश्वविद्यालयस्य दूरदर्शिता नीतिः दूरगामिविकासस्य कृते यत्नं करोति। यत्र हि संस्कृतशिक्षणप्रशिक्षणज्ञानविज्ञानसंवर्धनकेन्द्रद्वारा विविधाः कार्यक्रमाः आयोज्यन्ते। क्रमशः यथा -

- **शास्त्रसेतुः** (Shastra bridge program) एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकम् भवतीति। शास्त्राणि यद्यपि नैकानि वर्तन्ते परन्तु तानि सर्वाणि परस्परं सम्बद्धानि एव सन्ति। साङ्ख्ययोगयोः न्यायवैशेषिकयोः योगायुर्वेदयोः प्राचीनार्वाचीनयोः शास्त्रयोः इत्येवं विभिन्नानां शास्त्राणां सेतुपाठ्यक्रमाणां सम्प्रयोगः औपचारिकरूपेण विधातुं विश्वविद्यालयः चिन्तयति।
- **शास्त्रबीजरक्षा** (Seed saving for the future) शास्त्राणि बहूनि वर्तन्ते। तत्र आद्यं शास्त्रम् इति प्रकीर्तितं साङ्ख्यशास्त्रं सम्प्रति नेपथ्यं गतमस्ति। सहस्रवर्त्मा सामवेदः इति उच्यते। सम्प्रति केवलं शाखात्रयम् उपलभ्यते। अतः वेदशास्त्राणां परिरक्षणाय अग्रिमसन्तत्यै प्रदानाय च शास्त्रबीजरक्षा इति योजना विश्वविद्यालयस्य भविष्यद्योजनायां निष्ठोऽस्ति।
- **शिक्षकप्रशिक्षणम्-** विश्वविद्यालयस्य केन्द्रेण शासकीयाशासकीयसंस्कृतशिक्षकाणां कृते उन्मुखी कार्यक्रमः यथा समयम् आयोज्यते। प्रशिक्षणस्य मुख्योद्देश्यं संस्कृतशिक्षकाणां गुणवत्तासंवर्धनं व्यक्तित्वविकासश्च वर्तते।
- **बालकेन्द्रम्-** संस्कृतस्य प्रचाराय प्रसाराय कटिबद्धः विश्वविद्यालयस्य संस्कृतशिक्षणप्रशिक्षणज्ञानविज्ञानसंवर्धनकेन्द्रं नगरे प्रदेशे सर्वत्र संस्कृताधारितान् कार्यक्रमान् यथा समये आयोजयति। तत्र लघुलघुबालकानां संस्कृते प्रवेशाय बालकेन्द्रं सञ्चाल्यते।
- **शास्त्रदृष्टिः** (Shastric perception program) दृष्टिपूतं न्यसेत् पादम् इति उच्यते। शास्त्रदृष्टिः लौकिकालौकिकसुखमूला अस्ति इति ख्यापनाय तस्याः प्रत्यक्षीकरणरूपाणां कार्यक्रमाणां सङ्घटनाय विश्वविद्यालयः चिन्तनं करोति।
- **शास्त्रप्रयोगः** (Application of Shastric Principles) **शास्त्राण्यधीत्यापि भवन्ति मूर्खाः यस्तु क्रियावान् पुरुषःस विद्वान्** इति सुभाषितकारो भणति। शास्त्राणि प्रयोगपथे न सन्ति चेत्तर्हि तानि निष्प्रयोजकानि सम्भवन्ति । न केवलं शिक्षाक्षेत्रे अपि प्रशासने प्रबन्धने च शास्त्रीयसिद्धान्तानाम् अनुप्रयोगाय विश्वविद्यालयः योजनाः विनिर्माति।
- **शास्त्रसमन्वयः** (Shastra + Modern social science) **सर्वे भवन्तु सुखिनः** इति भारतीयानां चिन्तनधारा। एतदनु प्राचीनशास्त्राणाम् आधुनिकसामाजिकविज्ञानानां च मध्ये समन्वयं सम्पाद्य सम्मिश्रितपाठ्यचर्यां निर्माय तदध्ययनाय स्वतन्त्रतावसरकल्पनं विश्वविद्यालयस्य भविष्यद्योजनायाः एकम् अङ्गम् अस्ति। सर्वविधानां छात्राणां सर्वविधापेक्षायाः पूर्तिं कर्तुं समन्वयः अनिवार्यः एव । राष्ट्रियशिक्षानीतिरपि प्राचीन-अर्वाचीनशास्त्राणां समन्वयसम्पदानाय संसूचनाः प्रायच्छत्।
- **शास्त्रजीविका** (Employment/Livelihood focus) **"उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः। नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः"।।** इति सूक्तं सुभाषितकारेण आजीविकाप्रदानाभावे शास्त्राणाम् अध्ययनाध्यापने समधिकोत्साहं न प्रकाशयेयुः। संस्कृतज्ञानां कृते संस्कृतक्षेत्रे संस्कृतेतरेषु इतरेष्वपि क्षेत्रेषु विविधोद्योगावसरप्रकल्पनम् अपि विश्वविद्यालयस्य भविष्यद्योजनायाः एकम्अङ्गं वर्तते।
- **शास्त्रान्तरानुसन्धानम्-** (Multidisciplinary redearch) बहुविषयकपठनानुसन्धानसारल्यानि कल्पयित्वा उच्चशिक्षासंस्थानानां स्तरोन्नयनाय रष्ट्रियशिक्षानीतौ (NEP-2020) अनेकाः सूचनाः प्रदत्ताः। Multi-disciplinary Education and Research Universities (MERU) अस्य परिकल्पनानुसारं विश्वविद्यालये शास्त्रान्तरानुसन्धानाय विविधाः सक्रियाः भविष्यद्योजनाः सङ्कल्पिताः सन्ति।

| File Description | Document |
|---|---|

| | |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.2.1_1715969655_12674.p |
| Strategic Plan and deployment documents on the website(• व्यूहात्मकयोजनायाः नियोजनप्रलेखाः जालस्थाने उपलभ्यन्ते।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.2.1_1715967410_12674.p |
| Provide link for additional information (अतिरिक्तसूचनानां सम्पादनम्।) | View Document (https://mpsvv.ac.in/index.php/en/about-us/mpsvv/institution-development-plan) |

***6.2.2 Organizational structure of the University including governing body, administrative setup, and functions of various bodies, service rules, procedures, recruitment, promotional policies as well as grievance redressal mechanism.***

***संस्थायां सर्वविधाः प्रबन्धनव्यवस्थासंरचनाः यथा प्रबन्धनसमितिः, प्रशासनव्यवस्था, विविधनिकायानां कार्याणि, सेवानियमाः, प्रक्रियाः, नियुक्तयः, पदोन्नतिनियमाः, परिदेवनानिवारणकार्यप्रणाल्यश्च उपलभ्यन्ते।***

**Answer:**

महर्षिपाणिनिसंस्कृतविश्वविद्यालयः अधिनियमः 2006 क्रमाङ्कः 15 सन् 2008 तमे वर्षे विहितप्रावधानानामनुरूपेण विश्वविद्यालयस्य 19 परिनियमाः, 20 अध्यादेशाः तथा 8 विनियमाः निर्मिताः तथा ते विश्वविद्यालयस्य साधारणसभायाः अनुमोदनस्य प्रत्याशायां समन्वयसमितेः एवं समन्वयसमितेः स्थायीसमितेश्च समक्षं प्रस्तुताः। समन्वयसमितेः समक्षं गत्वा तासां परीक्षणं कृत्वा समन्वयसमितेः सभायां दिनाङ्कः 02.09.2010 इत्यस्मिन् तेषां प्रस्तुतीकरणं स्वीकृतम्। साधारणविगतसभायां दिनाङ्कः 20.11.2012 तमे वर्षे अस्य अनुमोदनं सञ्जातम्। महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य सञ्चालनं सुचारुरूपेण स्यादित्येतदर्थम् अधिनियमानुसारं साधारणपरिषत् कार्यपरिषद्, विद्यापरिषद्, वित्तसमितिश्च विहिताः सन्ति। तथा च छात्रान् संलक्ष्य छात्रावाससमितिः, रैगिंगरोधीसमितिः इत्यनयोः संरचना कृताऽस्ति । किञ्च विभिन्नविभागानां सम्यक्सञ्चालनाय ग्रन्थालयसमितिः, प्रकाशनसमितिः, क्रयसमितिः, भवननिर्माणसमितिः, परीक्षासमितिः, समस्यानिवारणसमितिः, महिलाविषयक समस्या-निवारणसमितिः (Women Redressal Grievance Committee) च गठितास्सन्ति।

**कुलाधिपतिः-**

मध्यप्रदेशस्य राज्यपालः महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य कुलाधिपतिः अस्ति। कुलाधिपतिः विश्वविद्यालयस्य प्रधानः अस्ति। सः विश्वविद्यालयस्य उपाधिप्रदानप्रसङ्गे दीक्षान्तसमारोहादिषु अध्यक्षपीठमलङ्करोति।

**कुलपतिः**

कुलपतेः नियुक्त्यर्थं कुलाधिपतिना संरचिता एका चयनसमितिः भवति। सा तदर्थम् अर्हाणां तालिकां निर्माति। तालिकातः कुलाधिपतिः एकं व्यक्तिविशेषं कुलपतित्वेन नियोजयितुम् अनुज्ञां ददाति। परिनियमानुगुणमेव कुलपतेः चयनं जायते। कुलपतेः अधीने कुलसचिवः, परीक्षानियन्त्रकः, वित्ताधिकारी, ग्रन्थपालकः, सङ्कायाध्यक्षः इत्यादयः कार्यं कुर्वन्ति। विश्वविद्यालयस्य प्राधिकरणं प्रबन्धनव्यवस्थां निर्वहति।

**साधारणपरिषत्**- महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयाधिनियमः 2006, इत्यत्र 15.1 इत्यत्र विहितविनियमानुसारेण साधरणपरिषदः अधिकारः स्वरूपं कार्याणि च निरूपितानि सन्ति। इयं परिषद् प्रबन्धनव्यवस्थायां शीर्षस्थाने तिष्ठति।

**कार्यपरिषत्** - विश्वविद्यालयं सुचारुरूपेण सञ्चालयितुं विद्यमाना मुख्या परिषत् इत्युक्ते कार्यपरिषत् एव वर्तते। इयं परिषद् विश्वविद्यालयस्य नीतिनिर्धारणे तेषाम् अनुप्रयोगे च प्रधानपात्रतां वहति।

**विद्यापरिषत्** :- विश्वविद्यालयीयशिक्षायाः, शिक्षणप्रक्रियायाः, प्रशिक्षणस्य, परीक्षायाः, अनुसन्धानकार्यक्रमाणां च स्तरपरिरक्षणकर्मणि विद्यापरिषत् मुख्यं स्थानं भजते ।

**A.सङ्कायमण्डलम्-** विश्वविद्यालये विभिन्नपाठ्यक्रमाणां निर्माणमध्ययनमण्डलं करोति। अध्ययनमण्डलं पाठ्यक्रमस्य निर्माणं संशोधनं वा कृत्वा अनुमोदनाय सङ्कायमण्डलं प्रति प्रेषयति। तत् तानि परिशील्य अन्तिमनिर्णयाय विद्यापरिषदं प्रति सारयति।

**सङ्कायाः**- सङ्कायाः विश्वविद्यालयस्य विविधानि विद्यास्थानानि द्योतयन्ति। प्रत्येकसङ्कायस्य एकः निर्दिष्टः सङ्कायप्रमुखः भवति।

**अध्ययनमण्डलम्**- विश्वविद्यालयस्य विभिन्नपाठ्यक्रमाणां निर्माणम् अध्ययनमण्डलं करोति। अध्ययनमण्डलं काले काले च विभिन्नपाठ्यक्रमाणां संशोधनं परिवर्तनादिकं कृत्वा कृतसंशोधनानां परिवर्तनादीनाम् अनुमोदनाय विद्यापरिषदं प्रति सारयति।

**विभागाध्यक्षः**- विभागाध्यक्षः शैक्षणिकविभागस्य प्रमुखः भवति। प्रत्येकं विभागस्य एकः निर्दिष्टः विभागाध्यक्षः भवति।

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य विभिन्नाः समितयः सन्ति। यथा -

**परीक्षासमितिः**

**स्थानीयशोधसमितिः**

**ग्रन्थालयसमितिः**

**वित्तसमितिः**

**छात्रपरिवेदनानिवारणसमितिः**

**शोधसलाहकारसमितिः**

**महिलापरिवेदनानिवारणसमितिः**

**B.छात्रवृत्तिसमितिः-** इत्याद्याः समितयः विश्वविद्यालयस्य कुलपतेः मार्गदर्शनेन गतिशीलाः सन्ति। विश्वविद्यालयस्य एतेषां मार्गदर्शनेन एव सर्वाः शैक्षिकाः प्राशासनिकाश्च क्रियाकलापाः प्रवर्तन्ते। परिवेदनानिवारणकार्यक्रमाणां आधारः विश्वविद्यालयानुदानायोगद्वारा काले काले कृतानामधिनियमानामाधारेण वर्तते। विश्वविद्यालये परिवेदनानिवारणकार्यक्रमप्रणाल्याः सुचारुरूपेण सञ्चालनाय विविधाः समितयः रचिताः सन्ति। आभिः समितिभिः गोपनीयतापूर्वकं समस्यायाः वस्तुनिष्ठपरिहारोपायाः संसूच्यन्ते। यौनोत्पीडनसम्बद्धसमितिः, छात्रसमस्यानिवारणसमितिः, कर्मचारिणां सन्तापापनोदनसमितिः इत्याद्याः सक्रियाः समितयः विश्वविद्यालये सन्ति।

**सेवानियमाः, प्रक्रियाः, नियुक्तयः, पदोन्नतिनियमाः च-**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः विश्वविद्यालयानुदानायोगस्य नियमावलिं समाश्रित्य तमसंवत्सरस्य नियमावलिं समाश्रित्य सेवानियमान् पदोन्नतिनियमान् च निर्धारयति। विश्वविद्यालयस्य अध्यादेशे शिक्षकाणां कर्मचारिणां नियुक्तिः सेवानियमाः च सङ्ग्रहेण उल्लिखिताः सन्ति। प्रत्यक्षनियुक्तौ श्रेष्ठतायाः आधारेण नियुक्तौ च विश्वविद्यालयानुदानायोगस्य नियमावलिमेव समाश्रयति ।

| File Description | Document |
|---|---|
| Upload the document of functions of the University and policies. (विश्वविद्यालयस्य एवं तन्नियमानां च कार्यप्रणाल्याः प्रलेखाः उपारोपणीयाः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.2.2_1716036197_12674.pc |
| Upload document depicting the organizational structure including, governing body and administrative setup. (सर्वविधानां प्रबन्धनव्यवस्थासंरचनानां विवरणं प्रयच्छतु- यथा प्रबन्धनसमितिः, प्रशासनव्यवस्था च।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.2.2_1715970486_12674.pc |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/images/files/Organogram/ORGANOGRAM_2.pdf) |

***6.2.3 Implementation of e-governance in areas of operation***

***1. Planning and Development***

***2. Administration***

***3. Finance and Accounts***

***4. Student Admission and Support***

***5. Examination***

***क्रियान्वयनक्षेत्रेषु वैद्युतप्रशासनस्य नियोजनम्***

***1. योजना, विकासश्च***

***2. प्रशासनम्***

***3. वित्तं, लेखाश्च***

***4. छात्राणां प्रवेशः, प्रोद्बलनं च***

***5. परीक्षा***

**Answer:** E. ≤ 1 of the above (उ. उपर्युक्तेषु कश्चन एकः)

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.2.3_17159 |
| Screen shots of user interfaces(प्रयोक्तुः अन्तःपृष्ठानां फलकचित्राणि) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.2.3_17159 |
| ERP (Enterprise Resource Planning) Document(उपक्रमसंसाधनयोजनाप्रपत्राणि) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.2.3_17159 |
| Details of implementation of e-governance in areas of operation Planning and Development, Administration etc (Data Template) (उपर्युक्तक्षेत्रेषु वैद्युतप्रशासनस्य क्रियान्वयनस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.2.3_17159 |

***6.2.4 Effectiveness of various bodies/ cells/ committees is evident through minutes of meetings and implementation of their resolutions.***

***विविधसमितीनां कार्यविवरणेभ्यः, निर्णयानां क्रियान्वयनात् च ज्ञायते यत् संस्थायाः विविधनिकायाः/ विभागाः/ समितयः प्रभावितया फलोन्मुखतया च कार्यतत्पराः सन्ति इति।***

**Answer:**

- करचरणाद्यङ्गानां शरीरसंरचनायां यादृशी भूमिका वर्तते तादृशी एव भूमिका विविधानां विद्यास्थानानां विद्याशाखानां विभिन्नसमितीनां च वर्तते। अवयववैकल्ये न्यूनतायां वा यथा शरीरं न शोभते तथैव विविधानां निकायानां विभागानां समितीनां सुचारुरूपेण सङ्घटनाभावे विश्वविद्यालयः अपि न शोभते। अतः महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः अमीषां सक्रियतायाः विषये विशिष्टध्यानं वहति।
- विकेन्द्रीकरणप्रशासनप्रणालीं समाश्रित्य संरचितस्य महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य विविधनिकायाः विभागाः समितयश्च क्रियाशीलाः विश्वविद्यालयस्य कार्यपरिषदः सभाः नियतरूपेण प्रतिवर्षं जायन्ते यत्र हि विकासपरनीतयः निर्णीयन्ते। निर्धारितनिर्णयानां क्रियान्वयनदृष्ट्या अपि इयं परिषत् प्रधानभूमिकां निर्वहति। विद्यापरिषत् विश्वविद्यालयीयशिक्षायाः, शिक्षणप्रक्रियायाः, प्रशिक्षणस्य, परीक्षायाः, अनुसन्धानकार्यक्रमाणां च स्तरपरिरक्षणकर्मणि कार्यरता भवति। अस्याः संसूचनाः विभागमुखेन समितिमुखेन च क्रियान्विताः भवन्ति। अध्ययनमण्डलं विश्वविद्यालयस्य विभिन्नपाठ्यक्रमाणां निर्माणं विदधाति।
- आन्तरिकगुणवत्ताश्वासनप्रकोष्ठानां विविधसमितीनां माध्यमेन च पाठ्यक्रमाणां प्रवर्तनाय मार्गदर्शनं लभ्यते। योजना तथा अनुश्रवणमण्डलं विश्वविद्यालयस्य विकासाय अपेक्षितानां योजनानां निर्माणकार्यं करोति। अस्य मण्डलस्य निर्णयाः विकासदृष्ट्या प्रधानाः भवन्ति । विद्यास्थानानि विद्याशाखाश्च विश्वविद्यालयस्य दर्शनशिक्षादीनि विद्यास्थानानि द्योतयति।
- विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनप्रकोष्ठः शैक्षिकेषु प्राशासनिकेषु च क्रियाकलापेषु गतिशीलतायाः संवर्धनाय एकस्याः प्रणाल्याः विकासं करोति। आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य प्राथमिकोद्देश्येषु संस्थायाः गुणवत्तासंवर्धनाय विश्वविद्यालयेन अनुसर्तव्याः मार्गोपायाः प्रमुखाः सन्ति। काले काले सभासङ्गोष्ठ्यादीनाम् आयोजनेन आर्थिक सहयोगादीनां प्रदानेन च विश्वविद्यालयस्य विकासाय प्रयतते । तदीयप्रतिवेदनेषु विश्वविद्यालयस्य गुणवत्तानिर्धारकमानकानां क्रियान्वयनेन प्राप्तस्य फलस्य विवरणम् उल्लिखितं वर्तते। विश्वविद्यालयस्य सर्वेऽपि क्रियाकलापाः छात्राणां विकासाय पूरकाः स्युरिति सङ्कल्पेन आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य प्रतिष्ठापनं विहितम् अस्ति।

आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य संसूचनाः आश्रित्य सक्रियाणां विभागसमित्यादीनां कार्येषु सञ्जाताः प्रगतयः यथा -

1. विश्वविद्यालये छात्रकेन्द्रितवातावरणं विद्यते येन शिक्षणाधिगमप्रक्रियायां प्रौद्योगिक्याः समावेशः क्रमशः जायमानं वर्तते ।
2. गुणवत्तासम्बद्धेषु तत्त्वेषु छात्राणाम् अभिभावकानां सामाजिकानां च प्रतिक्रियाः स्वीकृत्य शिक्षणाधिगमप्रक्रियायाः संवर्धनदिशि विश्वविद्यालयः सन्ततम् अग्रेसरः वर्तते।
3. आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य सहयोगेन परिसरेषु विभागीयाः ग्रन्थालयाः समारब्धाः। पुनः बहूनि पुस्तकानि क्रीत्वा संस्थापितानि इत्यतः विभागाः सर्वे स्तरोन्नतिं प्राप्नुवन्तः सन्ति।
4. नियतरूपेण विभागानां पर्यवेक्षणं प्रकोष्ठेन क्रियते इत्यतः विभागानां कार्यतत्परतायाः मूल्याङ्कनं जायमानं वर्तते। परीक्षासमितिः, शोधसलाहकारसमितिः, ग्रन्थालयसमितिः, वित्तसमितिः, छात्रावाससमितिः, क्रीडासमिति,कलासंस्कृतिसम्बद्धसमितिः इत्येवं बहव्यः समितयः सदा सक्रियाः ससूक्ष्मम् अवलोक्य अन्तिमाः निर्णयाः स्वीक्रियन्ते। छात्रपरिवेदनानिवारणप्रकोष्ठः, महिलाकक्षः इत्यादयः अपि स्थानीयस्तरे एव सन्तिष्ठन्ते। आसां निर्णयाः माननीयानां कुलपतीनां निर्देशेन समस्यानिवारणाय कार्यं कुर्वन्ति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.2.4_1715984639_12674.p |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/index.php/en/academic/academic-council/academic-minutes |

### 6.3 Faculty Empowerment Strategies

***6.3.1 The institution has effective welfare measures for teaching and non-teaching staff.***

***संस्थया अध्यापकेभ्यः अध्यापकेतरकर्मचारिभ्यश्च प्रभाविसंक्षेमोपायाः अनुस्रियन्ते।***

**Answer:**

विश्वविद्यालये अध्यापकाः शिक्षणेतरकर्मचारिणश्च आधारभूताङ्गानि भवन्ति। तेषां सर्वेषां स्वस्थचित्तेनैव विश्वविद्यालयस्य विकासोत्कर्षश्च भवितुं शक्यते। अनेनैव महर्षिपाणिनिसंस्कृतविश्वविद्यालयेन नैकाः कर्मचारिकल्याणयोजनाःअङ्गीकृताः। यथा-

1. षण्मासस्य मातृत्वावकाशः महिलाभ्यः (Meternity Live)।
2. सन्तानपालनावकाशः ।
3. चिकित्सावकाशाः
4. विशिष्टाः कर्तव्यावकाशाः।
5. विश्वविद्यालयस्वास्थ्यकेन्द्रम् ।

विश्वविद्यालयस्य पदाधिकारिभ्यः, अधिकारिभ्यः, कर्मचारिभ्यश्च पदानुसारं प्राप्तव्यकल्याणलाभाः UGC तथा राज्यसर्वकारस्य नियमानुसारं विश्वविद्यालयेन प्रदीयन्ते। विश्वविद्यालयद्वारा शैक्षणिक-प्रशासनिककर्मचारिणां कृते प्रदीयमानाः कल्याणकारिलाभाः ते निम्नलिखिताः सन्ति-

**1-शैक्षणिककर्मचारिभ्यः दीयमानाः कल्याणकारिलाभाः -**

विश्वविद्यालयस्य शैक्षणिककर्मचारिभ्यः Travel Allowance (T.A). Dearness Allowance(D.A), House Rent Allowance(H.R.A), Medical Allowance(M.A), Duty Leave (D.L) Study Leave (S.L), Maternity Leave(M.L), Paternity Leave (P.L) तथा च परीक्षासम्बद्धकार्येषु प्राशासनिककार्येषु च अनुष्ठितस्य अनुष्ठीयमानस्य च कर्मभ्यः कर्मचारिभ्यः विश्वविद्यालयः निर्धारितनियमानुसारं लाभं प्रयच्छति।

**2-प्राशासनिककर्मचारिभ्यः दीयमानाः कल्याणकारिलाभाः -**

विश्वविद्यालयस्य प्राशासनिककर्मचारिभ्यः अपि T.A, D.A, H.R.A, M.A, तथा परीक्षासम्बद्धकार्येषु प्राशासनिककार्येषु च मान्यकुलपतिना अनुमतिं लब्ध्वा प्रदीयमानकार्याणां कृतेऽपि कल्याणकारिलाभाः प्रदीयन्ते।

**विश्वविद्यालयस्य स्वास्थ्यसंरक्षणप्रणाली –**

इयं प्रणाली समस्तशिक्षक-शिक्षकेतरकर्मचारिणां मूलभूतानुकूलतायै सौविध्यकारिणी भवति । यथा – शिक्षकाणां छात्राणाञ्च कृते विस्तृत वायुयुक्तकक्षा (प्रकोष्ठः) । विश्वविद्यालयस्य परिसरमध्ये सुविधायुक्तः पुस्तकालयः वर्तते। पुस्तकालयेऽस्मिन् पाठ्यक्रमसन्दर्भितपुस्तकानि, विश्वकोश-शब्दकोशान्यविविधसन्दर्भितपुस्तकानि सन्ति । शिक्षकाणां तरकर्मचारिणां च कृते निःशुल्कपुस्तकालयसुविधा निर्धारिता । विश्वविद्यालयपरिसरे विविधप्रजातियुक्ताः वृक्षाः सन्ति। एकं सुन्दरमुद्यानमपि विद्यते । प्रदूषणनिर्मूलनाय उपयुक्तमपि इदं वातावरणम् ।

सर्वेभ्यः हितधारकेभ्यः परामर्शसुविधाभिः सह विश्वविद्यालयपरिसरे योगोपचारकेन्द्रमपि विद्यते। अत्र महिलाछात्राणां कृते समानप्रकोष्ठः विश्वविद्यालयानुदानायोगदिशा स्थापितः। लैंगिकोत्पीडननिवारणसमितिः, छात्राणां समस्यासमाधानाय समस्यानिवारणकक्षः, स्थापितः विद्यते । छात्राणां पक्षत: आगतानां समस्यानां एका आन्तरिकशिकायतसमितिरपि गठिता। विश्वविद्यालयस्य कर्मचारिणां कृते व्यावसायिक विकासाय प्रशासनिकप्रशिक्षण कार्यक्रमः आयोज्यते। विश्वविद्यालये शिक्षणेन सह शिक्षणेतर कर्मचारिभ्यः एका विशिष्टा मूल्यांकनप्रणाली विद्यते ।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.1_1716014486_12674.p |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/index.php/en/about-us/statutes) |

***6.3.2 Average percentage of teachers provided with financial support to attend conferences / workshops and towards membership fee of professional bodies during the last five years***

***विगतपञ्चवर्षेषु सङ्गोष्ठीषु/कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवताम् अध्यापकानां सामान्या प्रतिशतता।***

**Answer:** 33.91

6.3.2.1 Number of teachers provided with financial support to attend conferences/ workshops and towards membership fee of professional bodies year-wise during the last five years

विगतपञ्चवर्षेषु सङ्गोष्ठीषु/ कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवताम् अध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 28 | 16 | 0 | 0 | 0 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.2_1715987581_12674.p |
| Details of teachers provided with financial support to attend conferences, workshops etc. during the last five years (Data Template) (विगतपञ्चवर्षेषु सङ्गोष्ठीषु/कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु, सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवता) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.2_1715956575_12674.xl |

***6.3.3 Average number of professional development / administrative training Programmes organized by the university for teaching and non teaching staff during the last five years.***

***विगतेषु पञ्चसु वर्षेषु शिक्षकाणां वृत्तिविकासार्थं, शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च संस्थया समायोजितानां कार्यक्रमाणां वार्षिकी सम्पूर्णा सङ्ख्या।***

**Answer:** 0.2

6.3.3.1 Total number of professional development / administrative training Programmes organized by the Institution for teaching and non teaching staff year-wise during the last five years

विगतपञ्चवर्षेषु शिक्षकाणां वृत्तिविकासार्थं, शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च विश्वविद्यालयेन समायोजितानां कार्यक्रमाणां वार्षिकयोगः।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 01 | 00 | 00 | 00 | 00 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.3_1716015995_1 |
| Reports of the Human Resource Development Centres (UGC ASC or other relevant centres) (मानवसंसाधनविकासकेन्द्रेभ्यः (विश्वविद्यालयानुदानायोगस्य अकादमिकस्टाफ-महाविद्यालयेभ्यः अथवा तदन्यसदृशकेन्द्रेभ्यः) प्राप्तप्रमाणपत्राणि/प्रतिवेदनानि।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.3_1715989456_1 |
| Reports of Academic Staff College or similar centers(शैक्षणिकमहाविद्यालयानां प्रतिवेदनम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.3_1715988483_1 |
| Details of professional development / administrative training Programmes organized by the University for teaching and non teaching staff (Data Template)(शैक्षणिक-अशैक्षणिक-कर्मचारिणां व्यावसायिक-विकासार्थं / प्राशासनिक-प्रशिक्षणार्थं विश्वविद्यालयेन समायोजितानां कार्यक्रमाणां विवरणम्। (दत्तांशप्रारूपम्)) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.3_1715958381_1 |

***6.3.4 Average percentage of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes during the last five years***

***विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 28.92

6.3.4.1 Total number of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes year-wise during the last five years

विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 28 | 5 | 1 | 2 | 1 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.4_17160 |
| Reports of the Human Resource Development Centres (UGC ASC or other relevant centers). (मानवसंसाधनविकासकेन्द्रेभ्यः (विश्वविद्यालयानुदानायोगस्य शैक्षिककर्मचारिमहाविद्यालयेभ्यः अथवा तदन्यसदृशकेन्द्रेभ्यः) प्राप्तप्रमाणपत्राणि/ प्रतिवेदनानि।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.4_17159 |
| IQAC report summary(आन्तरिकगुणवत्ताऽश्वासनकेन्द्रस्य प्रतिवेदनसारांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.4_17159 |
| Details of teachers attending professional development Programmes during the last five years (Data Template)(विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासपाठ्यक्रमादि वृत्तिविकासपाठ्यक्रमेषु भागग्राहिणाम् अध) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.4_17159 |

***6.3.5 Institution has Performance Appraisal System for teaching and non-teaching staff***

***संस्थायां शिक्षकाणां शिक्षकेतरकर्मचारिणां कार्यनिष्पादनज्ञापनप्रणाली वर्तते।***

**Answer:**

संस्थायाः उत्कृष्टतासम्प्राप्तौ दोषविधिः, सन्दिग्धस्थितिः बाधा भवति। अतः निष्प्रपञ्चव्यवहाराय तथा निर्मलनिर्दोषरीत्या प्रगतिपथानुसरणाय विश्वविद्यालयः कार्यं करोति।

- तेषां मूल्याङ्कनं पदोन्नतिश्च पारदर्शकपद्धत्या API आधारेण विधीयते ।
- शिक्षकेतराणां कर्मचारिणामपि मूल्याङ्कनं संस्थायाः प्रगतिनिमित्तं महत्त्वपूर्णं भवति। विश्वविद्यालयेन कर्मचारिणां मूल्याङ्कनार्थमपि विशिष्टपद्धतिः स्वीकृता एतेषां गोपनीयमितिवृत्तं (CR) कर्मचारिणां कार्यशैलीं, कार्यप्रगतिं व्यवहारञ्च अवलोक्य विभागप्रमुखैः प्रमाणीक्रियते।
- विभागप्रमुखैः समर्पितमितिवृत्तम् अधिकारिभिः परिशील्यते। कुलसचिवः कर्मयोगिनामितिवृत्तस्य मान्यतायाः अधिकारी भवति एवं कुलपतिः अध्यापकानां मूल्याङ्कनं विदधाति।

शिक्षणेतरकर्मचारिणां वार्षिककार्यनिष्पादनप्रणालीपरीक्षणक्रमे कार्यालयप्रमुखः प्रस्तावं कुलसचिवं प्रति अग्रेसारयति। कुलसचिवः तदर्थं सक्षमः प्राधिकारी भवति । एतस्मिन् संस्थाने शिक्षणेतरकर्मचारिणां कार्यनिष्पादनमूल्यांकनं तथैव आवश्यकं भवति यथा हि शिक्षकाणां कृते भवति।

कुलसचिवस्य गोपनीयं प्रतिवेदनं विश्वविद्यालयस्य कुलपतिना लिख्यते ।

यदि कस्यचिदपि शिक्षकस्य, अधिकारिणः, कर्मचारिणः वा गोपनीयप्रतिवेदने प्रतिकूला टिप्पणी भवति चेत् सः कुलपतिं अस्यावेदनं प्रस्तोतुं शक्यते ।

शिक्षकैः प्रस्तुते वार्षिकस्वमूल्यांकनप्रगतिप्रतिवेदने यदि काचिद् न्यूनता भवति तदा तेः पुनः परिष्काराय सूच्यन्ते। विश्वविद्यालयः संकायसदस्यानां कर्मचारिणां च प्रतिभाकौशलस्य सम्पूर्णं उपयोगं करोति । शिक्षकेभ्यः वार्षिकमूल्यांकनप्रणाली, कर्मचारिभ्यश्च प्रदर्शनमूल्यांकनं तेषां गुणवत्तां सुनिश्चितं करोति ।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.3.5_1716036928_12674.p |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/images/naac/6/6.3.5/6.3.5%20link.pdf) |

## 6.4 Financial Management and Resource Mobilization

***6.4.1 Institution conducts internal and external financial audits regularly***

***संस्था नियमितम् आन्तरं बाह्यं च वित्तलेखाङ्केक्षणं करोति।***

**Answer:**

विश्वविद्यालये वित्तीयपारदर्शितायाः अत्यन्तम् उच्चमानकं संस्थापयितुं विश्वविद्यालयः स्थापनाकालादेव वित्तीयं विनिमयं परीक्षते। एतस्य समयबद्धरूपेण आन्तरिकं बाह्यं च परीक्षणं कार्यते। अद्यावधिवित्तीय-अङ्केक्षणे न कदापि वित्तीयानियमितता लब्धा। अत्र विश्वविद्यालयस्य आन्तरिक-लेखापरीक्षकः प्रतिवर्षं विस्तृतं प्रतिवेदनं प्रयच्छति। तस्य प्रतिवेदनानुसारेण सज्जता क्रियते आगामीवित्तीयवर्षस्य । यदि कुत्रापि संशोधनीयं न्यूनता वा प्रदर्शिता तदा शीघ्रमेव तस्य निवारणं क्रियते गुणवत्ता च सुनिश्चिता क्रियते। विश्वविद्यालयस्य पार्श्वे लेखापरीक्षणाय उत्तमं व्यवस्थितं च तन्त्रं विद्यते।

प्रतिवर्षमग्रिमवर्षस्य वित्तीयनियोजनं (budget) पूर्वमेव निश्चीयते। सर्वेपि व्ययाः नियोजनमनुलक्ष्य पारदर्शकरूपेण विहितनियमानुगुणं मान्यतायाः परमेव विधीयन्ते। विश्वविद्यालयस्य आयव्यययोः मूल्याङ्कनम् अङ्कपरीक्षणं नियमतया विश्वविद्यालयाधिनियमानुसारेण अङ्कपरीक्षणमाध्यमेन प्रमाणीकियते। एतदर्थं द्विविधा पद्धतिः परिपाल्यते।

**आन्तरिकमङ्केक्षणं बाह्यम् अङ्केक्षणञ्चेति ।**

विश्वविद्यालये नियमतया प्रतिवर्षम् आन्तरिकमङ्कपरीक्षणं कर्तुं व्यवस्था प्रकल्पितास्ति। तदर्थञ्च विश्वविद्यालयः सक्षमम् अधिकारिणं योजयति। स्थानिकः अङ्केक्षण-अधिकारी समग्रव्ययस्य सूक्ष्मावलोकनं विधाय अङ्कपरीक्षणं प्रमाणीकरोति।

बाह्यमङ्केक्षणं मध्यप्रदेशसर्वकारस्य AG द्वारा विधीयते। विश्वविद्यालयस्य वार्षिकव्ययः दशकोटिरुपकेभ्यः न्यूनो भवति। अतः बाह्यङ्केक्षणमावश्यकं न भवति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.4.1_1716022267_12674.p |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/index.php/en/administration/finance-committee/audit-university) |

***6.4.2 Funds/ Grants received from non-government bodies, individuals, philanthropers during the last five years (not covered in Criterion III) (INR in Lakhs)***

***विगतपञ्चवर्षेषु सर्वकारीयेतरनिकायेभ्यः, व्यक्तिभ्यः, दातृभ्यश्च प्राप्तम् आर्थिकं साहाय्यम् अनुदानं वा (यदि तृतीयनिकषे न निर्दिष्टम्) (लक्षशः रूप्यकेषु)***

**Answer:** 6.99

6.4.2.1 Total Grants received from non-government bodies, individuals, philanthropers year-wise during the last five years (INR in Lakhs)

विगतपञ्चवर्षेषु सर्वकारीयेतरनिकायेभ्यः, व्यक्तिभ्यः, दातृभ्यश्च प्रतिवर्षं प्राप्तस्य आर्थिकसाहाय्यानुदानस्य वार्षिकयोगः (लक्षशः रूप्यकेषु)

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 2.12 | 1.67 | 1.70 | 1.50 | 0 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.4.2_1716035029_12674.p |
| Details of Funds / Grants received from non-government bodies during the last five years (Data Template) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.4.2_1715980322_12674.xl |
| Annual statements of accounts(अङ्केक्षितस्य वार्षिकलेखापत्रस्य प्रतिकृतिः ) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.4.2_1716033471_12674.p |

***6.4.3 Institutional strategies for mobilisation of funds and the optimal utilisation of resources***

***विविधसंसाधनानां सर्वाधिकसमुपयोगार्थं, वित्तराशिसङ्ग्रहार्थञ्च संस्थायाः व्यूहाः।***

**Answer:**

मध्यप्रदेशराज्यसर्वकारद्वारा अनुदानितवित्तेन विश्वविद्यालयस्य वित्तीयकार्यं भवति। विश्वविद्यालयेन प्रतिवर्षं यो व्ययो भवति तस्यायोजनं भविष्यं परीक्ष्य विविधविभागेभ्यः स्वस्वयोजनानुसारं आवश्यकतापूर्तये धनराशेः पूर्तये भविष्यद्योजनाः समीक्ष्य अपेक्षितधनराशिः सूच्यते। आगतस्य धनव्ययस्य आकलनं विधाय आनुमानिकं पत्रकं विश्वविद्यालयस्य वित्तविभागेन सज्जीक्रियते । एतत् कल्पितधनव्ययपत्रकं विश्वविद्यालयस्य वित्तसमित्याः पुरतः उपस्थाप्यते। तस्याः संस्तुतिमाश्रित्य पुनः कार्यपरिषदा अनुमोदनं क्रियते। ततः परं विश्वविद्यालयद्वारा राज्यसर्वकारं प्रति सम्प्रेष्यते। येनाधारेण राज्यसर्वकारः अनुदानस्यायोजनालोके धनं विश्वविद्यालयाय प्रददाति।

- सर्वकारपक्षतः विश्वविद्यालयाय हेत्वनुसारं अनुदानं प्रदीयते। विश्वविद्यालयस्य कृते भविष्यद्योजना अनुदानस्य महत्तमः विनियोगः भवेत् एतदर्थं कार्यकारिण्याः अनुमोदनपूर्वकं मान्यस्य कुलपतेः अनुमत्या सर्वकारस्य नियममनुश्रुत्य राज्यसर्वकारद्वारा नियुक्तमुख्यवित्ताधिकारिणा तस्यानुदानधनस्योपयोगः क्रियते। विश्वविद्यालयेनापि सर्वकारस्य नियमानुसारं प्रदत्तधनं तद्धेतून् लक्ष्यीकृत्य प्राप्तस्य अनुदानस्य विनियोगः क्रियते।

**संचितधनव्ययः**- विश्वविद्यालयस्य संचितधनस्याधारेण नूतनप्रकल्पानां समावेशः क्रियते। नूतनभवनानां निर्माणम्, अधोसंरचनाविकासः इत्यादीनां तत्र समावेशः क्रियते।

अत्र वित्तव्यवस्थायै मध्यप्रदेशशासनपक्षतः वित्ताधिकारी प्रतिनियुक्तो भवति। यः राज्यसर्वकारद्वारा प्रदत्तस्य अन्येभ्यश्च स्रोतोभ्यः प्राप्तस्य धनस्य विनियोगं यथा नियमं कर्तुम् अधिकृतो भवति। विश्वविद्यालयस्य वित्तसमितिना सज्जीकृतस्य प्रस्तावस्य उपरि कार्यपरिषद् विचारं करोति अनन्तरं विविधमदेषु धनविनियोगं विभज्य व्ययीकर्तुम् आदिशति। अनन्तरं कुलपतेः स्वीकृत्या धनव्ययं वित्तनियन्त्रकः करोति।

व्ययीकृतस्य धनस्य अङ्केक्षणं CA द्वारा क्रियते। अनन्तरं आन्तरिक-बाह्यपरीक्षकेण अङ्केक्षणं भवति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.4.3_1716037423_12674.p |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://www.mpsvv.ac.in/index.php/en/about-us/university-act) |

**6.5 Internal Quality Assurance System**

***6.5.1 Internal Quality Assurance Cell (IQAC) has contributed significantly for institutionalizing the quality assurance strategies and processes***

***गुणवत्ताश्वासनव्यूहानां प्रक्रियाणां च संस्थानीकरणाय आन्तरिकगुणवत्ताश्वासनकेन्द्रं विशेषतः योगदानं करोति।***

**Answer:**

कस्यापि संस्थायाः लोकप्रियता उत्कृष्टता व्यापकतादिकं तस्याः संस्थायाः आन्तरिकगुणवत्ताधारितं भवति। अनेन सहजरीत्या एव संस्थायाः पारदर्शिता प्रसरति। अतः महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये आन्तरिकगुणवत्ता-आश्वासनप्रकोष्ठः स्थापितम्।

आन्तरिक-गुणवत्ता-आश्वासन-प्रकोष्ठस्य आरम्भः 2018 वर्षात् जातो वर्तते । शैक्षणिकप्रसङ्गे अध्ययनाध्यापनप्रक्रियासमीक्षायै मुख्यकेन्द्रमस्ति आन्तरिक-गुणवत्ता-आश्वासन-प्रकोष्ठः। शैक्षणिकप्रवृत्तीनां मूल्याङ्कनार्थम् अङ्कयोजनाय च औपचारिकरूपेण कार्यसम्पादने आन्तरिक गुणवत्ताश्वासनप्रकोष्ठः मुख्यभूमिकामावहति।

अस्याः निर्वहणम् एकः वरिष्ठः आचार्यः करोति । अस्यां समित्यां गुणवत्ता तथा च मूल्याङ्कनव्यूहरचना इति प्रक्रियाद्वयी समीक्ष्यते। समित्याऽनया विश्वविद्यालयस्य शैक्षणिकविकासाय प्राशासनिकपर्यवेक्षणाय च समये समये उपवेशनं मान्यस्य कुलपतेः अनुमत्या क्रियते। उपवेशने शैक्षणिकवर्षे करणीयकार्याणां मार्गदर्शिका निर्मीयते। तदनुसारं कार्यं विश्वविद्यालयेन क्रियते । विश्वविद्यालयस्य शैक्षणिक-प्राशासनिककार्यसम्पादनार्थम् आन्तरिक-गुणवत्ता-मूल्याङ्कन-प्रकोष्ठद्वारा करणीयाः निर्धारितांशाः एवं सन्ति-

1. शैक्षणिकपर्यवेक्षणे संस्थायाः अमनेकप्रकारकगुणवत्तायुक्ताश्वासनपद्धतीनां विकासः करणीयः।
2. आन्तरिक-गुणवत्ता-मूल्याङ्कन-कक्षाद्वारा एव NAAC इत्यस्य प्रामाण्यप्राप्त्यर्थम् आवेदनपत्रं प्रदातुं निश्चयः कृतो वर्तते विश्वविद्यालयेन।
3. सर्वपदाधिकारिणाम् अभिप्रायान् गुणवत्तासम्बद्धान् विश्लिष्य नियमपरिवर्तनं कार्ययोजना-परिवर्तनञ्च विश्वविद्यालयेन तथा च गुणवत्तायाः सहयोगार्थं सङ्कलनानुसारं परिवर्त्यते।
4. उत्कृष्टगुणवत्तायाः प्राप्तपरिणामानुसारं समये समये मानकानां नवीनीकरणं क्रियते। विविधपत्रसंस्थाभिः सह शैक्षणिकप्रवृत्त्यर्थं सम्पर्कः साध्यते।
5. सर्वपदाधिकारिभ्यः प्राप्तप्रतिक्रियाविषये विचारं कृत्वा समये समये निर्धारितनियमेषु परिवर्तनविषये चिन्तनं क्रियते।
6. सहाय्यार्थम् अनेन माध्यमेन संस्था शिक्षण-संशोधन-प्रशासनेषु गुणवत्तायाः परिष्करणार्थम् अभिवृद्ध्यर्थं च सततं प्रयतते, सर्वविधसाहाय्यञ्च करोति।
7. सर्वविधगुणवत्तायाः निर्वहणार्थं कार्यान्वयनायोजनायाः अभ्यासक्रमविकासार्थ च अध्ययनाध्यापनमूल्याङ्कन-संशोधन-सहकारादिसर्वप्रकारकविभागेषु विस्तृतरूपेण प्रवृत्तयः करणीयाः।
8. मार्गदर्शिकानुसारं शैक्षणिकसम्बन्धिलेखापरीक्षा क्रियते। एवं प्रकारेण आन्तरिक- गुणवत्ता-मूल्याङ्कन-कक्षाद्वारा विविधोपवेशनेषु निर्धारिताः विषयाः अधोनिर्दिष्टाः सन्ति-

**समित्या सम्प्राप्ताः सफलताः** -

1. शैक्षणिकपर्यवेक्षणे संस्थायाः अनेकप्रकारकगुणवत्तायुक्ताश्वासनपद्धतीनां विकासः जायमानो वर्तते, विविधकार्यक्रमाः यथा संस्कृतसप्ताहोत्सवः, युवमहोत्सवः, राष्ट्रिय-अन्ताराष्ट्रियपरिसंवादाः, कार्यशालाः, अल्पावधिक-यान्त्रिक-पाठ्यक्रमाः (Short Term Courses), यान्त्रिक-सङ्गोष्ठ्यः (Webinars), विशिष्टव्याख्यानानि आयोज्यन्ते।
2. आन्तरिक-गुणवत्ता-आश्वासन-प्रकोष्ठद्वारा NAAC इत्यस्य प्रामाण्यप्राप्त्यर्थम् अवेदनपत्रं प्रदातुं कृतनिश्चयानुसारं प्रवर्तमानास्ति ।
3. विश्वविद्यालयस्य शैक्षणिकाध्यापकानां (CAS) पदोन्नतिविषये यथासमयं विशेषज्ञानां परीक्षणम् एवं मूल्याङ्कनादिकं कृत्वा अभिलिखितम् आन्तरिकगुणवत्ता आश्वासन-प्रकोष्ठस्य अनुशंसाधारेण पदोन्नतिः क्रियते।
4. अभ्यासक्रमाणां प्रामाणीकरणम् अभ्यासक्रमसमित्या कारितमस्ति ।
5. अपेक्षानुसारं प्रोजेक्ट इत्यादिनिर्माणाय शिक्षकाणां मार्गनिर्देशार्थं विशेषतया प्रोजेक्टमार्गदर्शिका सज्जिता वर्तते।

6. संशोधनकार्याणां मूल्याङ्कनविवरणसूची अपि निर्मितास्ति; यस्मिन् शोधप्रबन्धस्य प्रकाशनं कृतमस्ति ।
7. शास्त्राणां तत्तद्विषयवस्तूनां सम्पूर्णज्ञानाय विश्वविद्यालये Smart Class इत्यस्य व्यवस्थापि सङ्कल्पितमस्ति। अपेक्षितं निर्माणं क्रियमाणमस्ति। तद्द्वारा दृश्य-श्रव्यमाध्यमेन ज्ञानं दृढीकर्तुं शक्नुवन्ति छात्राः।
8. आन्तरिक-गुणवत्ता-आश्वासन-प्रकोष्ठप्राध्यापकेभ्यः विविधकार्यक्रमेषु अभिविन्यासकार्यक्रमः (O.P), पुनश्चर्याकार्यक्रमः (R.C), सङ्गोष्ठयः, कार्यशालाः, अल्पावधिकार्यक्रमादिषु समये समये भागग्रहणायापि प्रोत्साहयति।

**महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य आन्तरिकगुणवत्ता सफलतया सम्पादितकार्यक्रमस्य विवरणम् इत्थम् - आश्वासन केन्द्रद्वारा**

सेवाप्रोन्नतियोजना (Career Advancement Scheme)- विश्वविद्यालयस्य पञ्च अध्यापकेभ्यः आन्तरिक-गुणवत्ता-आश्वासनप्रकोष्ठस्य संस्तुत्या मान्यकुलपतेः अनुमोदनञ्च प्राप्य सेवाप्रोन्नतिः प्रदत्तास्ति एवं सहाचार्यतः आचार्यपदं प्रति संस्तुतिः कृताऽस्ति । पञ्च नियमितसहायकाचार्याणां तथा च संशोधनाधिकारिणां स्टेज्-१ तः स्टेज्-२ इति सेवाप्रोन्नतियोजनाद्वारा (CAS) पदोन्नत्यै आवेदनपत्राणि आन्तरिकगुणवत्ता-आश्वासनप्रकोष्ठः (IQAC) प्रति प्राप्तान्यासन्। तेषां पदोन्नत्यै पञ्चसहायकाचार्याणां प्रकाशनानि, API इत्यस्य परिशोधनं मूल्याङ्कनं च कृत्वा अभिलेखानाम् उपयोगं च कृत्वा तद्विधानेन सर्वाणि पत्राणि यथानियमं प्राप्तान्यासन् । तेषां मूल्याङ्कनं कृत्वा विवरणमपि प्रस्तुतम्, आन्तरिकगुणवत्ता-आश्वासनप्रकोष्ठेण संस्तुतम् तथा च तेभ्यः पदोन्नतिः प्रदत्तापि। अन्येषां पदोन्नत्यै संस्तुतिः अपि कृतास्ति।

| File Description | Document |
| --- | --- |
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.5.1_1716022939_12674.p |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/index.php/en/iqac) |

***6.5.2 The institution reviews its teaching learning process, structures & methodologies of operations and learning outcomes at periodic intervals through IQAC set up as per norms***

***संस्था आन्तरिकगुणवत्ताश्वासनकेन्द्रद्वारा निर्धारितनियमानुरूपं नियतकालेषु अध्यापनाधिगमप्रक्रियायाः, तत्र उपयुज्यमानायाः पद्धतेः, अधिगमपरिणामस्य च समीक्षां करोति।***

**Answer:**

शैक्षिकलेखापत्रद्वारा प्राप्ताः संस्तुतयः सूचनाश्च आन्तरिकगुणवत्ताश्वासनप्रकोष्ठद्वारा शैक्षिकप्रगतिनिमित्तं तथा न्यूनतायाः दूरीकरणाय सूक्ष्मं परिशील्यन्ते। प्रतिपुष्टिव्यवस्थाऽपि कल्पिता वर्तते । अध्ययनाध्यापनस्य गुणवत्ता संवर्धनाय एते प्रयासाः विधीयन्ते ।

**अध्ययनाध्यापनप्रक्रियायाः हितग्राहिभ्यः प्रतिपुष्टिः-**

कस्यापि संस्थायाः निमित्तं हितग्राहिभ्यः प्राप्ता प्रतिपुष्टिः महत्त्वपूर्णं योगदानं करोति । प्रतिपुष्टिमाध्यमेन संस्थायाः विकासः, अभिवृद्धिश्च यथेष्टं साधयितुं शक्यते । विश्वविद्यालयस्य स्नातकोत्तरशैक्षणिकविभागेषु औपचारिकतया प्रतिपुष्टिं प्रदातुं व्यवस्था कल्पिता अस्ति। अधिकाधिकां प्रतिपुष्टिं प्राप्य ध्येयप्राप्तये विश्वविद्यालयः यतते। छात्राः, पूर्वछात्राः, अभिभावकेभ्यः, कर्मचारिभ्यः, अध्यापकेभ्यः, विश्वविद्यालयस्य सर्वेभ्यः हितग्राहिभ्यः प्राप्ताः प्रतिपुष्टयः आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य पुरतः परिशीलनाय उपस्थाप्यन्ते। आन्तरिकगुणवत्ताश्वासनप्रकोष्ठः परिशीलनपुरस्सरं शैक्षिकगुणसंवर्धनाय सूचनाः प्रददाति । तद्वारा शैक्षिकविभागाः आवश्यकतानुगुणं पाठ्यक्रमपरिवर्तनं कुर्वन्ति ।

- विश्वविद्यालये शिक्षकैः शिक्षणेतरकर्मचारिभिर्वा यत्किमपि कार्यं निष्पादितं भवति ततः प्राक् आन्तरिक-गुणवत्ता-आश्वासनकेन्द्रे (IQAC) तत्सम्बद्धां चर्चां विधाय अनुमोदनं च प्राप्य अनन्तरमेव तत्कार्यस्य अग्रिमं सोपानं परिकल्प्यते।
- विश्वविद्यालये छात्राणां गुणवत्ताप्रवर्धनाय परिसंवादः, शास्त्रार्थस्पर्धा, भाषणस्पर्धा, वाग्वर्धिनी सभा, कार्यशालाः च समये समये आयोज्यन्ते।
- प्रत्येकवर्षे विविधविभागानाम् अभ्यासक्रमनिर्माणाय BOS द्वारा प्रामाणीकरणं कृत्वा शैक्षणिकपुरोगत्यै मार्गदर्शनं प्रददाति । ततः तस्य अनुमोदनम् आन्तरिकगुणवत्ता- आश्वासन-केन्द्रद्वारा क्रियते। शैक्षणिकप्रगत्यै मध्ये समीक्षादिकमपि आयोज्यन्ते।
- Smart Class - छात्रेभ्यः शास्त्राणां तत्तद्विषयवस्तूनां सम्पूर्णज्ञानाय विश्वविद्यालये Smart Class इत्यस्य व्यवस्थापि 13 प्रकोष्ठेषु सङ्कल्पितास्ति । अपेक्षितं निर्माणं क्रियमाणमस्ति । तद्द्वारा दृश्य-श्रव्यमाध्यमेन ज्ञानं सरलतया अवगन्तुं दृढीकर्तुं च शक्नुवन्ति छात्राः ।
- विश्वविद्यालयानुदानायोगस्य नियमानुसारं विश्वविद्यालयस्य ग्रन्थालये डिजिटलीकरणं कृतमस्ति। तथा च विश्वविद्यालयपरिसरे अन्तर्जालव्यवस्थया सह आधुनिकशिक्षणप्रणाली अपि प्रारब्धा वर्तते।
- Information and Communication Technology (ICT) महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये छात्रेभ्यः यान्त्रिककार्येषु प्रवृत्त्यै ICT इत्यस्य उपयोगः क्रियते । तत्र Pen drive, Printer, Scanner, Xerox, Projector, Multiple Printer, Plagiarism आदीनामुपयोगः क्रियते। येन छात्राः आधुनिकविज्ञानेन सह सम्बद्धाः भवेयुः। तदर्थं सङ्गणककक्षायां ग्रन्थालये च व्यवस्था कृतास्ति।

- विश्वविद्यालयस्य विभिन्नाध्यापकैः विभिन्नविषयाणामुपरि लेखनकार्यप्रकाशनानि विधीयन्तेः येषाम् आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रद्वारा पारदर्शिकतामाश्रित्य विषयविशेषज्ञानां मतानि स्वीकृत्य प्रकाशनसमितिद्वारा प्रकाश्यन्ते।
- विश्वविद्यालयद्वारा संशोधनप्रवृत्तेः प्रोत्साहनार्थं संशोधनकेन्द्रस्य प्रारम्भः कृतः वर्तते। भारत-राजपत्राधिनियममाश्रित्य विश्वविद्यालय-अनुदान-आयोगद्वारा शोधार्थिभ्यः प्रकाशित-नूतननियमानुसारं शोधनिर्देशकानां विषये आन्तरिकगुणवत्ता-आश्वासन-केन्द्रद्वारा चर्चां विधाय शोधविद्यार्थिनां स्व-स्व-विषयानुगुणं मार्गदर्शकानां निर्धारणविषये किञ्च शोधकार्यसम्बद्धाः कार्यकलापाः आन्तरिकगुणवत्ता -आश्वासन-केन्द्रद्वारा निर्धारिताः भवन्ति ।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.5.2_1716037121_12674.p |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/index.php/en/iqac) |

***6.5.3 Number of quality initiatives by IQAC for promoting quality culture per year***

***प्रतिवर्षम् आन्तरिकगुणवत्ताश्वासनकेन्द्रेण गुणवत्तासंस्कृतिविकासार्थम् आयोजितानां गुणवत्तोपक्रमाणां सङ्ख्या।***

**Answer:** 12

6.5.3.1 Number of quality initiatives by IQAC for promoting quality year-wise for the last five years

प्रतिवर्षम् आन्तरिकगुणवत्ताश्वासनकेन्द्रेण (आ. गु. आ. के.) गुणवत्तासंस्कृतिविकासार्थमायोजितानां गुणवत्तोपक्रमाणां विगतपञ्चवर्षाणां सङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 6 | 4 | 1 | 1 | 0 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.5.3_171605806 |
| Number of quality initiatives by IQAC per year for promoting quality culture (Data Template) (आन्तरिकगुणवत्ताश्वासनकेन्द्रेण गुणवत्तासंस्कृतिविकासार्थमायोजितानां गुणवत्तोपक्रमाणां सङ्ख्या। (दत्तांशप्रारूपम्)) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.5.3_171604765 |
| IQAC link(आ.गु.आ.के.द्वारा आयोजितस्य गुणवत्तोपक्रमस्य सन्धानम्।) | View Document (https://mpsvv.ac.in/index.php/en/iqac-activities) |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/images/naac/6/6.5.3/program%20pdf_11zon.pdf) |

***6.5.4 Quality assurance initiatives of the institution include:***

***1. Regular meeting of Internal Quality Assurance Cell (IQAC);***

***2. Timely submission of Annual Quality Assurance Report (AQAR) to NAAC***

***3. Academic Administrative Audit (AAA) and initiation of follow up action***

***4. Participation in NIRF***

***5. UGC Recognition for any other Academic Excellence or any other quality audit recognized by state, national agencies.***

***संस्थायाः गुणवत्ताश्वासनोपक्रमेषु अन्तर्भूताः सन्ति -***

***1. आ.गु.आ.केन्द्रस्य नियमितमुपवेशनम्,***

***2. रा.मू.प्र.परिषदे समयेन वार्षिकगुणवत्ताश्वासनप्रतिवेदनसमर्पणम् ।***

***3. शैक्षिकं प्राशासनिकं लेखापत्रम्, अनुगतक्रियाणामुपक्रमणम् ।***

***4. राष्ट्रियसांस्थिकश्रेणिकरूपरेखायां भागग्रहणम् ।***

***5. विश्वविद्यालयानुदानायोगेन मान्यताप्राप्तः यः कश्चन शैक्षिकोत्कर्षः अथवा राष्ट्र/राज्य अभिकरणैः मान्यताप्राप्तं किमपि गुणावत्ताङ्केक्षणम्।***

**Answer:** C. Any 2 of the above (इ. उपर्युक्तेषु कौचन द्वौ)

| File Description | Document |
|---|---|
| Upload e-copies of the accreditations and certifications(प्रत्यायनानां, प्रमाणपत्राणां च वैद्युतप्रमाणपत्रम् उपारोपयतु।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.5.4_1716047097_12674 |
| Upload details of Quality assurance initiatives of the institution (Data Template)(संस्थायाः गुणवत्तोपक्रमाणां विवरणम्। (दत्तांशप्रारूपम्)) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.5.4_1716106708_12674 |
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.5.4_1716111600_12674 |
| Paste web link of Annual reports of University(विश्वविद्यालयस्य वार्षिकं प्रतिवेदनस्य सन्धानं प्रयच्छतु।) | View Document (https://mpsvv.ac.in/index.php/en/about-us/annual-report) |

***6.5.5 Incremental improvements made during the preceding five years (in case of first cycle)***

***Post accreditation quality initiatives (second and subsequent cycles)***

***गतपञ्चवर्षेषु सम्पादिताः क्रमविकासाः (प्रथमचक्रसन्दर्भे)***

***प्रत्यायनोत्तरं कृताः गुणवत्तोपक्रमाः (द्वितीयादिचक्रेषु)***

**Answer:**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य आन्तरिकगुणवत्ता-आश्वासनप्रकोष्ठः आन्तरिकगुणवत्तासंवर्धनाय नियतं प्रयतते। शैक्षणिक-सांस्कृतिक-क्रीडादिगतिविधीनां व्यापकविकासाय गुणवत्तावृद्धये च सततं प्रतिवद्धः। अनेन विगतपञ्चवर्षेषु सम्पादिताः क्रमविकासाः प्रत्यायनोत्तरं च कृताः गुणवत्तोपक्रमाः अधस्तनाः सन्ति।

सत्रम्- 2018-19-

1. विश्वविद्यालये कार्यरतानां शिक्षकाणां कर्मचारिणां च संस्कृतसम्भाषणदक्षतासिद्धये संस्कृतसम्भाषणस्य आयोजनं 15-25 अगस्त 2018 मासे कृतम्।
2. विश्वविद्यालये हरितपरिसरं कर्तुं नीतिनिर्माणं कृत्वा तस्य क्रियान्वयने सहस्राधिकः पादपाः 23 अगस्त 2018 दिनाङ्के महामहिमराज्यपालमहोदयानां श्रीमती-आनन्दीवेनपटेलमहाभागानां परमायामुपस्थितौ रोपिताः।
3. विश्वविद्यालयस्य शिक्षकौ तत्र डॉ. अखिलेशकुमारद्विवेदी (5-25 जनवरी 2019) डॉ. सङ्कल्पमिश्रः (4 फरवरी 01 मार्च 2019 पुनश्चर्यापाठ्यक्रमे भागं ग्रहीतवन्तौ।

सत्रम् 2019-20 –

1. नवप्रवेशितछात्रेभ्यः सत्रारम्भे प्रेरणाव्याख्यानकार्यक्रमः समायोजितः।
2. परिसरे हरितपरिसरवृद्धिमुपलक्ष्य 501 पादपाः रोपिताः।
3. नैकमूल्याङ्कनाय विश्वविद्यालयानुदानायोगस्य 12 B मान्यता प्राप्तये सज्जताकरणम्।
4. छात्राणां कृते नेट/ जे.आर.एफ. प्रशिक्षणकक्षाः 25/11/2019 तः 15/12/2019 पर्यन्तमायोजिताः।
5. छात्राणां कृते दशदिवसीयं संस्कृतप्रशिक्षणवर्गस्य आयोजनं 16-25 अगस्त 2019 पर्यन्तं कृतम्।
6. विश्वविद्यालयस्य कुलगानं निर्माय तस्य रिकार्डिंग कारितम्।

सत्रम् 2020-21-

1. विश्वविद्यालयस्य शिक्षकाः पुस्तकलेखनाय प्रेरिताः तदनु 31/12/2020 दिनाङ्के दीक्षान्तसमारोहे तैः विरचिताः अष्टौ ग्रन्थाः महामहिमराज्यपालमहोदयैः लोकार्पिताः अभूवन्।
2. कोविड 19 प्रकोपकारणात् छात्राणां समक्षमार्थिकसमस्यायाः समजायन्त अतः छात्रेभ्यः डिप्लोमापाठ्यक्रमशुल्के न्यूनता कृता।
3. आनलाइनप्रवेशप्रक्रियां सम्पादयुतुं प्राध्यापकानां कर्मचारिणां च कृते प्रशिक्षणकार्यक्रमः 09 जून 2021 दिनाङ्के आयोजितः।

सत्रम् 2021-22-

1. विश्वविद्यालये पाण्डुलिपिसंशोधनसम्पादनकौशलविकासाय शारदालिपिप्रशिक्षणकार्यशालायाः आयोजनं 25-31 अक्टूबर 2021 दिवसेषु जातम्।
2. छात्राणां संरचनात्मककौशलविकासाय हस्तशिल्पप्रतियोगिताकार्यक्रमस्य आयोजनं कृतम्।
3. संस्कृतशिक्षणप्रशिक्षणकार्यशालायाः आयोजनं 12-14 दिसम्बर 2021 पर्यन्तं जातम्।
4. विश्वविद्यालये CBCS पद्धतेः पाठ्यक्रमस्य कार्ययोजना स्वीकृता। क्रियान्वयनं जातम्।

सत्रम् 2022-23

1. विश्वविद्यालयानुदानायोगनवदेहलीद्वारा 12B मान्यताप्राप्तये प्रस्तावस्य 13 जुलाई 2022 दिनाङ्के प्रेषणं कृतम्।
2. विश्वविद्यालयस्य शिक्षककर्मचारिभ्यः ई. गवर्नेंस प्रशिक्षणकार्यशालायाः आयोजनं 21-23 सितम्बर 2022 दिनाङ्केषु जातम्।
3. शिक्षणेतरकर्मचारिणां कार्यकौशलवृद्धये कम्प्यूटरप्रोग्रामिंगप्रशिक्षणस्य आयोजनं 18-24 दिसम्बर 2022 दिनाङ्केषु अभवत्।
4. विश्वविद्यालये CBCS पद्धतेः पाठ्यक्रमस्य क्रियान्वयनं जातम्।

विश्वविद्यालयोऽयं राष्ट्रीयमूल्याङ्कनप्रत्यायनपरिषदि (NAAC) इत्यस्मिन् प्रथमावेदनं प्रस्तौति।

विश्वविद्यालयोऽयं राष्ट्रीयमूल्याङ्कनप्रत्यायनपरिषदि (NAAC) इत्यस्मिन् प्रथमावेदनं प्रस्तौति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/6.5.5_1716038242_12674.p |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://mpsvv.ac.in/index.php/en/minutes-iqac) |

## 7.Institutional Values and Best Practices

### 7.1 Institutional Values and Social Responsibilities

***7.1.1 Number of gender equity promotion Programmes organized by the institution during the last five years.***

***विगतपञ्चवर्षेषु संस्थया लैङ्गिकसमतायाः संवर्धनाय निर्वर्तितानां कार्यक्रमाणां सङ्ख्या।***

**Answer:** 6

7.1.1.1 Number of gender equity promotion Programmes organized by the institution year-wise during the last five years

विगतपञ्चवर्षेषु संस्थया लैङ्गिकसमतायाः संवर्धनाय निर्वर्तितानां कार्यक्रमाणां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 2 | 1 | 2 | 1 | 0 |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.1_1715967715_12674.pdf) |
| Report of the event कार्यक्रमस्य प्रतिवेदनम् | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.1_1715967697_12674.pdf) |
| List of gender equity promotion Programmes organized by the institution (Data Template) संस्थया लैङ्गिकसमतायाः संवर्धनार्थं निर्वर्तितानां कार्यक्रमाणां सूची। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.1_1715957367_12674.xlsx) |

***7.1.2 Institution shows gender sensitivity in providing facilities such as:***

***1. Safety and Security***

***2. Counselling***

***3. Common Room***

***संस्था अधोलिखितसौविध्यानि प्रदाय लैङ्गिकसंवेदनशीलतां व्यवस्थापयति।***

***1. निरुपद्रवता सुरक्षा च***

***2. परामर्शः***

***3. समानप्रकोष्ठः***

**Answer:**

**संस्था अधोलिखितसौविध्यानि प्रदाय लैङ्गिकसंवेदनशीलतां व्यवस्थापयति। 1. निरुपद्रवता सुरक्षा च 2. परामर्शः 3. समानप्रकोष्ठः**

**Answer:-**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयो विद्यार्थिनां सर्वाङ्गीणविकासाय शिक्षणजगति, अन्यक्षेत्रेषु उत्तरोत्तरं सर्वविधविकासाय बहुविधप्रयत्नैः विविधप्रकल्पान् च सञ्चालयति। छात्रेभ्यः सुरक्षासहितम्, गुणवत्तायुतं, सुखेन शिक्षणं प्रदीयते। आचार्यगणैः विषयगतसमस्यायाः सरलतया सहजतया च समाधानं क्रियते, छात्रैः छात्रनिष्ठप्रतिभायाः सुष्ठु सेचनं प्रदर्शनं च कार्यते। विविधेषु कार्यक्षेत्रेषु स्वकीयं नेतृत्वमित्यादीन् सर्वानपि लाभान् प्राप्नुयुः, एतदर्थं विश्वविद्यालयः छात्राणां निरुपद्रवता, सुरक्षा, **परामर्शः,** समानप्रकोष्ठश्चेत्यादिविषये निरन्तरं प्रयत्नशीलः विद्यते।

**1. निरुपद्रवता सुरक्षा च**

- बालकानां छात्रावासस्य स्वतन्त्रपालको नियुक्तः।
- विश्वविद्यालयपरिसरे उत्तमा सुरक्षाव्यवस्था वर्तते।
- महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयेन वैयक्तिकसुरक्षासंस्थायै सुरक्षाकार्यभारः प्रदत्तो वर्तते। प्रत्येकस्मिन् भवने प्रत्येकस्मिन् सार्वजनिके स्थाने च सुरक्षारक्षकानां नियुक्तिः कृता वर्तते।
- विश्वविद्यालये प्रमुखस्थानेषु वैद्युतनिरीक्षणयन्त्रस्य छायाग्राहकयन्त्रमाध्यमेन निरीक्षणं क्रियते।
- विश्वविद्यालयानुदानायोगस्य निर्देशानुसारं महिला-उत्पीडननिवारणसमितेः महिलाविकाससमितेश्च निर्माणं कृतं वर्तते।
- विश्वविद्यालयस्य शिक्षकाः शिक्षकेतरकर्मचारिणश्च बालिकानां सुरक्षाविषये विशेषचिन्तावन्तः सन्ति।
- शैक्षणिकभवने प्रत्येकस्मिन् अपि शैक्षणिकविभागे वसतिगृहेषु च स्वतन्त्र-शौचालयानां व्यवस्था कृता वर्तते। आक्षेपपेटिकानां निरीक्षणं नियमिततया क्रियते।

**2. परामर्शः -**

- समुपदेशनार्थं विशेषव्याख्यानानि जनजागरणकार्यक्रमाश्च विश्वविद्यालयपक्षतः निरन्तरतया आयोजिताः। महिलाप्रकोष्ठपक्षतः समुपदेशनविषयककार्यशालानाम् आयोजनं, तद्विषयकपरिपृच्छादिकं, तद्विषयकानुगमनम् (follow up) अपि कृतम्। संवादकार्यशालानां माध्यमेन शिक्षकैः वैयक्तिकसमुपदेशनं कारितम्।

**3. समानप्रकोष्ठः -**

- बालिकानां सौविध्याय महिलासुविधाप्रकोष्ठस्य स्थापनाकृता वर्तते।
- विश्वविद्यालये अल्पाहारस्थानम् अपि उपलभ्यते।
- रजोनिवृत्तिवस्त्राणां निष्कासनयन्त्रं तद्भस्मकयन्त्रं च विश्वविद्यालयपरिसरे स्थापितं वर्तते।

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.2_1715968150_12674.pdf) |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document (https://mpsvv.ac.in/images/naac/7%20CRITERIAN/7.1.2/Matric%207.1.2.pdf) |

***7.1.3 Alternate Energy initiatives such as:***

***Percentage of power requirement of the university met by the renewable energy sources (preceding academic year data)***

***वैकल्पिकस्य ऊर्जसः उपक्रमाः यथा-***

***विश्वविद्यालयेन उपयुज्यमानायाः विद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तेः प्रतिशतता- (प्रगताध्ययनवर्षस्य दत्तांशः)***

**Answer:** 5.25

7.1.3.1 Annual power requirement met by renewable energy sources (in KWH)

आवश्यक्याः वार्षिकविद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तिः।

Answer: 820

7.1.3.2 Annual power requirement of the institution (in KWH)

संस्थायाः वार्षिकविद्युच्छक्तेः आवश्यकता।

Answer: 15621

| File Description | Document |
|---|---|

| | |
|---|---|
| Upload details of power requirement of the university met by renewable energy sources (Data Template) विश्वविद्यालयेन उपयुज्यमानायाः विद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तेः विवरणम्। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.3_1715969148_12674.xlsx) |
| Upload any additional information अतिरिक्ताः सूचना | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.3_1716112277_12674.pdf) |

***7.1.4 Waste Management steps including:***

***1. Solid waste management***

***2. Liquid waste management***

***3. E-waste management***

***व्यर्थवस्तुप्रबन्धनप्रक्रिया यथा***

***1. घनव्यर्थवस्तुप्रबन्धनम्***

***2. तरलव्यर्थवस्तुप्रबन्धनम्***

***3. वैद्युतव्यर्थवस्तुप्रबन्धनम्***

**Answer:**

**1 घनव्यर्थवस्तुप्रबन्धनम्**

- विश्वविद्यालये घनावकरव्यवस्थापनं कृतं वर्तते ।
- स्वतन्त्रस्य मलकूपस्य व्यवस्था सर्वेषु भवनेषु कृता वर्तते। यस्य च स्वच्छता नियमिततया कार्यते। परिसरस्य स्वच्छतारक्षणविषये छात्रेषु कर्मचारिषु च विशेषजागरा वर्तते ।
- नानावर्णयुक्ताः अवकरकण्डोलाः विश्वविद्यालयपरिसरे यथोपयुक्तस्थानेषु संस्थापिताः।
- वृक्षावकरस्य सङ्कलनं कृत्वा तत् एकस्मिन् खाते सङ्गृह्यते ततश्च विश्वविद्यालस्य उपयोगिनः नैसर्गिकस्य उर्वरकस्य निर्माणं क्रियते।

**2. तरलव्यर्थवस्तुप्रबन्धनम्-**

1. विशेषावधानपूर्वकं पेयजलस्य अपव्ययनियन्त्रणं क्रियते। विश्वविद्यालयस्य हरीतिमारक्षणार्थं पर्यावरणस्य सौन्दर्यवर्धनार्थं च पेयजलस्य व्यवस्थिततया निर्गमनं कारितं वर्तते । योग्या अपवाहप्रणाली अपि उपलब्धा अस्ति। परिरक्षणव्यवस्थया पेयजलस्य अपव्ययन्यूनीकरणार्थं सूक्ष्मजलनिस्सारणसमस्याः नियमितपरीक्षणं क्रियते। अस्माकं विश्वविद्यालयपरिसरे तरलव्यर्थवस्तुनां निर्गमनं केवलं शौचालयादेव जायते। तेषां प्रणालिकया कूपं संप्राप्य vermicompost कृते उपयोगः भवति।

**3. वैद्युतव्यर्थवस्तुप्रबन्धनम्-**

- अनुपयोगिनः विद्युतकोशाः, नष्टानि सङ्गणकानि च क्षिप्यन्ते। समीकरणानन्तरं च अन्येषां यन्त्राणां च उपयोगः क्रियते।
- सर्वतः अनुपयुक्ताः अवकरकूपे क्षिप्यन्ते। समये समये ग्रामपञ्चायतात् आगतः अवकरसंग्राहकः तेषां संग्रहणं करोति।
- अवकरनिर्माणस्य न्यूनीकरणसन्दर्भः, अवकरसङ्ग्राहककर्मकरैः सह कार्यं कृत्वा विश्वविद्यालयः सहायक-शृङ्खलया सह कार्यकरणस्य, अन्येभ्यः साहाय्यप्रदानस्य च तस्य भूमिकायाः महत्त्वम् अवगच्छति।
- अवकरस्य न्यूनीकरणाय तस्य च प्रभाविदृष्ट्या तथा अभिनवपद्धत्या व्यवस्थापनाय सर्वस्तरीयप्रयत्नान् विधातुं वयं कटिबद्धाः स्मः।

| File Description | Document |
|---|---|

| | |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.4_1715970066_12674.pdf) |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम् | View Document (https://mpsvv.ac.in/images/naac/7%20CRITERIAN/7.1.4/Matric%207.1.4.pdf) |

***7.1.5 Rain water harvesting structures and utilization in the campus***

***वृष्टिजलसङ्ग्रहणसंरचना, परिसरे वृष्टिजलोपयोगश्च***

**Answer:**

**विश्वविद्यालये वृष्टिजलसङ्ग्रहव्यवस्था, सङ्ग्रहो विनियोगश्च -**

**(Rain Water Harvesting, Structures & Utilization in the Campus)**

**1. परिसरे वर्षाजलव्यवस्था (Rain Water Structural Facility in the Campus)**

- विश्वविद्यालये वृष्टिजलसङ्ग्रहणाय अहर्निशं जलप्राप्त्यै Rechargeable Bore इत्यस्य व्यवस्था वर्तते। जलस्य स्तरमुपरि आगच्छेत् तदर्थमस्मिन् परिसरे वृक्षाणां वपनमधिकमात्रायां कृतमस्ति।

**2. परिसरे वृष्टिजलसङ्ग्रहः (Rain Water Collection Facility in the Campus)**

- विश्वविद्यालयस्य परिसरः तादृशविस्तृतो वर्तते यच्च स्थानं भौगोलिकदृष्ट्या भौतिकदृष्ट्या च उन्नतं वर्तते। अतो वर्षाजलसङ्ग्रहो विश्वविद्यालये एव आवश्यकः। तदर्थं स्थानद्वये वर्षाजलसंग्राहकः निर्मितः। प्रणालिकाः एवं प्रकारेण संयोजिताः येन प्रायः परिष्कृतेषु स्थानेषु पतितानि वृष्टिजलानि प्रणालिकया जलसंग्राहके संगृहीतानि भवन्ति।

**3. परिसरे वर्षाजल-उपयोगः (Rain Water Utilization in the Campus)**

अयं विश्वविद्यालयः वृष्टिजलसङ्ग्रहफलरूपेणैवास्ति हरितनवपल्ववृक्षैः आच्छादितः। अत्र अधिकाधिकवृक्षाणां वपनेन जलं भूमौ प्रविशति। प्रतिवर्षं वर्षायाः प्रमाणं सम्यक् भवति। वृष्टिकाले वर्षाजलस्यैव उपयोगः भवति ततश्च जलसङ्ग्रहव्यवस्थायां सुरक्षितस्य जलस्य उपयोगः सर्वेषु भवनेषु समग्रेऽस्मिन् विश्वविद्यालये नलकूपेन भवति ।

इत्थं वृक्षैर्हरितः परिसरः वृष्टिजलसङ्ग्रहस्य फलेनैव अस्ति। भित्तिकाभिः वृष्टिजलसङ्ग्रहकूपेन विश्वविद्यालयस्थं यज्जलस्तरम् अस्ति तत् पेयजलस्तरं उन्नतं भवति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां सन्धानम्। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.5_1715970479_12674.pdf) |
| Provide link for additional information अतिरिक्ताः सूचनाः | View Document (https://mpsvv.ac.in/images/naac/7%20CRITERIAN/7.1.5/link%20file.pdf) |

***7.1.6 Green Practices***

***1. Students, staff using***

***a) Bicycles***

***b) Public Transport***

***c) Pedestrian Friendly Roads***

***2. Plastic free campus***

***3. Paperless office***

***4. Green landscaping with trees and plants***

***हारित्यपरिपाटयः***

***1. छात्राः, अध्यापकाः, अध्यापकेतरकर्मचारिणश्च उपयुञ्जन्ति -***

***(क) द्विचक्रयानम्***

***(ख) सार्वजनिकपरिवहणम्***

***(ग) पादयात्र्यनुकूलमार्गान्***

***2. प्लास्टिक्मुक्तपरिसरः***

***3. कर्गदरहितकार्यालयः***

***4. वृक्षैः पादपैश्च हरितः परिसरः***

**Answer:**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः वृक्षैर्हरितपादपैराच्छादिता वर्तते। प्रसङ्गेऽस्मिन् विश्वविद्यालयस्य सर्वेषां कर्मचारिणामधिकारिणां दैनिकव्यवहारः प्राकृतिकवातावरणसंरक्षणाय भवेत्तदत्र जागरूकतया भवति ।

**(क) द्विचक्रिकाणाम् उपयोगः -** विश्वविद्यालयस्य अधिकारिणः कर्मचारिणः खनिजतैलेन प्रचलितयानस्य उपयोगं कुर्वन्ति, तेषु केचन सेवकाः, उद्यानपालकाः, वैद्युत्कर्मप्रवीणः, ग्रन्थालय-अस्थायिकर्मकरः इमे सर्वे विश्वविद्यालयपरिसरं द्विचक्रकयानेन समागच्छन्ति। विश्वविद्यालयेन तादृशं परिपत्रमपि कृतमस्ति यत् कर्मचारिभिः द्विचक्रयानस्योपयोगं कृत्वा प्रकृतिः रक्षणीया।

विश्वविद्यालये मान्यात् कुलपतेः आरभ्य सर्वेषां कर्मचारिणां यानस्य व्यवस्थायै एकं सुनिश्चितं स्थानं विद्यते। यत्र एकस्मिन् कोणे विश्वविद्यालयपरिसरे स्थानं विश्वविद्यालयेन निर्मितं वर्तते, तत्र बहिस्तात् समागतानां सर्वेषां यानानां कृते समीचीनं यानस्थानकस्य (Parking) व्यवस्था कृतास्ति। तत्रापि द्विचक्रिकस्य चतुश्चक्रिकस्य च पृथग्व्यवस्था कल्पिता वर्तते। विश्वविद्यालयस्य प्रवेशद्वारात् प्रविश्य परिसरे कस्यापि आगन्तुकस्य यानमधिकं न चलेत्तदर्थं प्रवेशद्वारनिकटे एव यानस्थानकं निर्मितं वर्तत। ततः आगन्तारः सर्वेऽपि चलित्वा भवनात् भवनं चलन्तः गच्छन्ति येन चालकस्य स्वास्थ्यम् सुरक्षितं भवति तथा च विश्वविद्यालयस्य मनोहरं परिसरमपि पश्यन्तः गच्छन्ति।

**(ख). सार्वजनिकपरिवहणाय प्रोत्साहनम् -** ये कर्मचारिणः द्विचक्रकयानं न प्रयुञ्जन्ति ते सार्वजनिकपरिवहणेन (Public Transport) विश्वविद्यालयं प्रति समायान्ति। अन्येऽपि अधिकारिणः पक्षे मासे वा स्वस्य वाहनस्योपयोगम् अकृत्वा लोकयानमाध्यमेन गमनागमनं प्रकुर्वन्ति । प्रकृतिसंरक्षणाय विश्वविद्यालयस्य कतिपयकर्मचारिणः परस्परसहयोगेन एकेन यानेन विश्वविद्यालयं प्रति समागच्छन्ति ।

**(ग).पादयात्र्यनुकूलमार्गव्यवस्था -** विश्वविद्यालये मार्गाः सुदृढाः परिपक्वाः स्वच्छाः घट्टाश्च सन्ति। यत्र विश्वविद्यालयपरिसरे नूतनभवनानां निर्माणकर्मणि लोह-इष्टिका-पाषाण- धूलिकापूरितानि भारयुक्तानि यानानि सुखेन यान्तुं प्रयान्तुं च शक्नुवन्ति तथा च विश्वयोगदिवसे कार्यक्रमानुकूलाः मार्गाः, व्यायामाय परिचालनं भवेत्तदनुकूलाः मार्गाः विश्वविद्यालयेऽस्मिन् सन्ति। दिव्याङ्गः विश्वविद्यालयीयपरिसरे प्रविशति चेत् तेनापि कष्टं नानुभूयते तादृशाः मार्गाः सन्ति । पुनश्च सम्पूर्ण- विश्वविद्यालयपरिसरे सुखेन चलित्वा स्थानात् स्थानं सुखेन गन्तुं शक्यते तादृशाः पादयात्र्यनुकूलाः (Pedestrian Friendly Roads) मार्गाः विश्वविद्यालयेऽस्मिन् सन्ति।

**2.प्लास्टिकमुक्तपरिसरः -** स्वच्छताभियानान्तर्गतः विश्वविद्यालयोऽयं प्लास्टिकपदार्थानां वर्जनाय अतीव जागरितः प्लास्टिकमुक्तत्वेनोद्घोषितः वर्तते। अत एव शैक्षणिकभवनस्य द्वारे एवास्माभिः बहिस्तात् समागतानां सामाजिकानां प्लास्टिकमुक्तविश्वविद्यालये (Plastic-Free Campus) स्वागतमस्तीति उद्घोष्यते। विश्वविद्यालयः शासनस्य मार्गदर्शिकानुसारं शास्त्रिकक्षायां प्रश्नपत्रेणैकेन पर्यावरणसंरक्षणोपायाः पाठ्यन्ते। छात्राणामपि एतस्मिन् विषये जागृतिर्भवेत्तदर्थं विश्वविद्यालयस्थैः सर्वैः विश्वविद्यालये स्वच्छताभियानं च क्रियते। प्लास्टिक इति पदार्थस्य वर्जनाय प्लास्टिकपदार्थेन का हानिः एतस्मिन् सन्दर्भव्याख्यानानि भवन्ति।

**3**. महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य कार्यालयानुगुणः पत्राचारात्मको व्यवहारः अधिकतया WhatsApp. Web-site, Online माध्यमेन च क्रियते । आधुनिकयुगे सर्वैः सह समकक्षतायाः प्राप्त्यर्थं विश्वविद्यालयेऽपि सर्वत्र सर्वोऽपि व्यवहारः "Electronic Media" इत्यनेन माध्यमेनैव भवति। "Electronic Media" इत्यनेन माध्यमेन जनाः समयस्य धनस्य च रक्षणं कुर्वन्ति। अनेन माध्यमेन कर्गदस्य अधिकोपयोगो न भवति। विश्वविद्यालयोऽयं पूर्णतया कर्गदरहितकार्यालयत्वेन (Paperless Office) तद्दिशि यतमानः वर्तते। छात्राणाम् प्रवेशपत्रम् (Enrollment Form), परीक्षापत्रम् (Exam Form), शिष्यवृत्तिपत्राणि (Scholarship Form), शुल्कप्रदानपत्रम् (Fees Payment Form), स्थानान्तरीयप्रमाणपत्रम् (Transfer Certificate), प्रव्रजनप्रमाणपत्रम् (Migration Certificate) एतादृशानि सर्वाण्यपि पत्रकाणि विश्वविद्यालय वेबसाइटमाध्यमेन प्रसारितानि सन्ति, येषां समुपयोगेन कर्गदरहितः कार्यालयव्यवहारः सुचारुतया भवति। विश्वविद्यालयपरिसरेऽपि प्रायः सर्वे कार्यालयादेशाः कर्गदरहितव्यवहारत्वात् मोबाइलयन्त्रमाध्यमेन प्रसारिताः भवन्ति।

**4.वृक्षैः पादपैश्च हरितः परिसरः -** महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये '**दशपुत्रसमो द्रुमः**' इति वचनमाश्रित्य हरितक्रान्तिरूपेण सहस्राधिकाः वृक्षाः समारोपिताः सन्ति। विश्वविद्यालयेऽस्मिन् वृक्षारोपणकार्यक्रमः प्रतिवर्षं भवति। अत्र छात्रैः, प्राध्यापकैः, कर्मचारिभिः, अधिकारिभिश्च सम्मिल्य वृक्षारोपणं, वृक्षे जलसेचनं, वृक्षान् परितः आलवालानां स्वच्छताविषयकं कार्यं च क्रियते । वृक्षारोपणाय वृक्षसंवर्धनाय च विविधाः संस्थाः कार्यरताः सन्ति । ताः विश्वविद्यालयाय स्वयोगदानं प्रयच्छन्ति।

**5.हरितदिवसः –** प्रत्येकस्मिन् सप्ताहे बुधवासरं विश्वविद्यालयः हरितदिवसरूपेण परिपालयति। तस्मिन् दिवसे इन्धनयुक्तानि यानानि विश्वविद्यालयस्य मुख्यद्वारात् बहिः संस्थाप्य अटित्वा एव परिसरे सर्वैः प्रवेशः कर्तव्यः। एवं सम्पूर्णदिवसे अटनेन शरीरचर्चा यथा भवति, तथैव इन्धनयुक्तयानानां व्यवहारः न्यूनः भवति। एवं वैश्विकौष्णायनह्रासाय विश्वविद्यालयस्य क्षुद्रः प्रयासोऽयम्।

इत्थम् अनेन विश्वविद्यालयेन हरितपरिपाटयः (Green Landscaping with Trees and Plants) परिपाल्यन्ते

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.6_1715971193_12674.pdf) |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document (https://mpsvv.ac.in/images/naac/7%20CRITERIAN/7.1.6/link%20docuemnt.pdf) |

***7.1.7 Average percentage of expenditure on green initiatives and waste management excluding salary component during the last five years.***

***विगतपञ्चवर्षेषु वेतनाद् ऋते हारित्योपक्रमे, व्यर्थवस्तुप्रबन्धने च कृतस्य व्ययस्य प्रतिशततायाः मध्यमानम्-***

**Answer:** 1.27

7.1.7.1 Total expenditure on green initiatives and waste management excluding salary component year-wise during the last five years (INR in lakhs)

विगतपञ्चवर्षेषु वेतनाद् ऋते हारित्योपक्रमे, व्यर्थवस्तुप्रबन्धने च आहत्य कृतः वार्षिकव्ययः (लक्षशः)

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 3 | 1.5 | 1.2 | 0.5 | 1.6 |

| File Description | Document |
|---|---|
| Green audit report हारित्योपक्रमस्य अङ्केक्षणप्रतिवेदनम्। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.7_1715987229_12674.pdf) |
| Details of expenditure on green initiatives and waste management during the last five years (Data Template) विगतपञ्चवर्षेषु हारित्योपक्रमे, व्यर्थवस्तुप्रबन्धने च कृतस्य व्ययस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.7_1715987790_12674.xlsx) |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.7_1715987795_12674.pdf) |

***7.1.8 Differently abled (Divyangjan) Friendliness Resources available in the institution***

***1. Physical facilities***

***2. Provision for lift***

***3. Ramp / Rails***

***4. Braille Software/facilities***

***5. Rest Rooms***

***6. Scribes for examination***

***7. Special skill development for differently abled students***

***8. Any other similar facility (Specify)***

***संस्थायाम् अन्यथाशक्तजनानाम् (दिव्याङ्गानाम्) अनुकूलसंसाधनानाम् उपलब्धिः।***

***1. भौतिकसौविध्यानि***

***2. उत्तोलनफलकव्यवस्था***

***3. समतलोद्गमनी/ हस्तालम्बदण्डाः***

***4. अन्धसहकृतितन्त्रांशः/सुविधाः***

***5. विश्रान्तिप्रकोष्ठः***

***6. परीक्षायाम् अनुलेखकः***

***7. अन्यथाशक्तच्छात्रेषु विशिष्टकौशलस्य विकासः***

***8. अन्याः समरूपाः सुविधाः (नामसहितो निर्देशः)***

**Answer:** A. 5 and more of the above (अ. उपर्युक्तेषु पञ्च, ततोऽधिकानि वा)

| File Description | Document |
|---|---|
| Upload resources available in the institution for Divyangjan (Data Template) संस्थायाम् अन्यथाशक्तजने (दिव्याङ्गजने) साहाय्यकारि-साधनसम्पदाम् उपलब्धिसूचकं सन्धानम्। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.8_1715987882_12674.xlsx) |
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.8_1715988203_12674.pdf) |
| Link to photos and videos of facilities for divyangjan अन्यथाशक्तजनानाम् (दिव्याङ्गानाम्) अनुकूलसंसाधनानाम् चित्राणां चलनचित्राणां च सन्धानं दीयताम् | View Document (http://www.mpsvv.ac.in/index.php/en/facilities/multimedia/gallery-multimedia/facilites-for-specially-abled-student) |

***7.1.9 Number of specific initiatives to address locational advantages and disadvantages during the last five years***

***विगतपञ्चवर्षेषु स्थानिकानि आनुकूल्यानि प्रातिकूल्यानि च मनसि निधाय प्रवर्तितानाम् उपक्रमाणां सङ्ख्या***

**Answer:** 0

7.1.9.1 Number of specific initiatives to address locational advantages and disadvantages year-wise during the last five years

विगतपञ्चवर्षेषु स्थानिकानि आनुकूल्यानि प्रातिकूल्यानि च मनसि निधाय प्रवर्तितानाम् उपक्रमाणां वार्षिकसङ्ख्या -

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 0 | 0 | 0 | 0 | 0 |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.9_1715979110_12674.pdf) |
| Number of Specific initiatives to address locational advantages and disadvantages (Data Template) स्थानिकानि आनुकूल्यानि प्रातिकूल्यानि च मनसि निधाय प्रवर्तितानाम् उपक्रमाणां सङ्ख्या। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.9_1715978745_12674.xlsx) |

***7.1.10 Number of initiatives taken to engage with and contribute to local community during the last five years (Not mentioned elsewhere)***

***विगतपञ्चवर्षेषु स्थानिकसमुदायेन सम्बन्धमनुवर्तयितुं, योगदानं कर्तुं च उपक्रान्तानाम् उपक्रमाणां सङ्ख्या (अन्यत्र अनुल्लिखितानाम्)***

**Answer:** 7

7.1.10.1 Number of initiatives taken to engage with and contribute to local community year-wise during the last five years

विगतपञ्चवर्षेषु स्थानिकसमुदायेन सम्बन्धमनुवर्तयितुं, योगदानं कर्तुं च उपक्रान्तानाम् उपक्रमाणां वार्षिकसङ्ख्या

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 2 | 2 | 2 | 0 | 1 |

| File Description | Document |
|---|---|

| | |
|---|---|
| Upload the report of the event कार्यक्रमस्य प्रतिवेदनम्। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.10_1715979705_12674.pdf) |
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.10_1715979797_12674.pdf) |
| Details of initiatives taken to engage with local community during the last five years (Data Template) गतपञ्चवर्षेषु स्थानिकसमुदायेन सम्बन्धमनुवर्तयितुं योगदानाय च कृतानाम् उपक्रमाणां विवरणम्। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.10_1715978776_12674.xlsx) |

***7.1.11 Existence code of Conduct Handbook exists for students, teachers, governing body, administration including Vice Chancellor / Director / Principal /Officials and support staff***

***(Yes/No)***

***कुलपति-निदेशक-प्राचार्य-अधिकारिप्रभृतीनां प्रशासनाधिकारिणां सह-कार्यकर्तृगणानां, छात्राणाम् अध्यापकानां, शासिपरिषन्निकायानां च मार्गदर्शनाय संस्थित-नीतिनियमावलीयुता करदीपिका वर्तते।***

***(अस्ति/नास्ति)***

**Answer:** Yes

| **File Description** | **Document** |
|---|---|
| URL to Handbook on code of conduct for students and teachers , manuals and brochures on human values and professional ethics छात्राणाम् अध्यापकानां, शासिपरिषन्निकायानां च मार्गदर्शनाय नीतिनियमावलीयुतायाः करदीपिकायाः सन्धानम्। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.11_1715979831_12674.xls |
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.11_1715980011_12674.pdf |

***7.1.12 Display of core values in the institution and on its website***

***(Yes/No)***

***संस्थायां, संस्थायाः जालस्थाने प्रधानमूल्यानां प्रदर्शनम्***

***(अस्ति/नास्ति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचना | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.12_1715981154_12674.pdf) |
| Provide URL of website that displays core values जालस्थानस्य सन्धानं यत्र प्रधानमूल्यानां प्रकाशनं विद्यते। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.12_1715980880_12674.xlsx) |

***7.1.13 The institution plans and organizes appropriate activities to increase consciousness about national identities and symbols; Fundamental Duties and Rights of Indian citizens and other constitutional obligations***

***(Yes/No)***

***भारतीयनागरिकेषु राष्ट्रियाणाम् अभिज्ञानानां, प्रतीकानां, मूलकर्तव्याधिकारयोः, अन्येषाञ्च संवैधानिकोत्तरदायित्वानां विषये संवेदनाम् अभिवर्धयितुं संस्था योग्यकार्यक्रमाणां योजनां निर्वर्तनञ्च करोति।***

***(आम् / न)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.13_1715981600_12674.p |
| Details of activities organized to increase consciousness about national identities and symbols (Data Template) भारतीयनागरिकेषु राष्ट्रियाणाम् अभिज्ञानानां, प्रतीकानां, मूलकर्तव्याधिकारयोः, अन्येषाञ्च संवैधानिकोत्तरदायित्वानां विषये संवेदनाम् अभिवर्धयित | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.13_1715983073_12674.x |

***7.1.14 Does the institution offer a course on Human Values and professional ethics on the basis of Vedic and Sanskrit literature.***

***(Yes/No)***

***संस्था वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य मानवीयमूल्यानि वृत्तिनीतिं चाधिकृत्य पाठ्यपत्रं प्रवर्तयति किम्।***

***(प्रवर्तयति/न प्रवर्तयति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.14_1715983942_1 |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.14_1715983504_1 |
| Provide link to Courses on Human Values and professional ethics on Institutional website वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य मानवीयमूल्यानि वृत्तिनीतिं चाधिकृत्य पाठ्यपत्राणां प्रवर्तनस्य संस्थायाः जालपुटस्य सन्धानम्। | View Document (https://www.mpsvv.ac.in/index.php/en/academic/programmes/regular-prog |

***7.1.15 The institutional functioning is as per professional code prescribed / suggested by statutory bodies / regulatory authorities for different professions.***

***(Yes/No)***

***विविधवृत्तिप्राधिकाराणां परिनियमानुसारेण / संवैधानिकनिकायसंस्तुत्यनुसारेण संस्था कार्यं निर्वर्तयति।***

***(आम्/न)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.15_1715989880_1 |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.15_1715989885_1 |
| Provide URL of supporting documents to prove institution functions as per professional code विविधवृत्तिप्राधिकाराणां परिनियमानुसारेण/ संवैधानिकनिकायसंस्तुत्यनुसारेण संस्था कार्यं निर्वर्तयतीत्युपस्थापयितुं सहायकाभिलेखानां सन्धानम्। | View Document (https://www.mpsvv.ac.in/index.php/en/iqac) |

***7.1.16 Number of activities conducted for promotion of universal values (Truth, Righteous conduct, Love, Non-Violence and peace); national values, human values, national integration, communal harmony and social cohesion on the basis of Vedic and Sanskrit literature as well as for observance of fundamental duties during the last five years***

***विगतपञ्चवर्षेषु वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य वैश्विकमूल्यानां (सत्यं, चारित्र्यं, प्रेम, अहिंसा, शान्तिश्च) राष्ट्रियमूल्यानां, मानवीयमूल्यानां, राष्ट्रियैकतायाः, नानासमुदायसहभावस्य, सामाजिकसमरसतायाः, मूलकर्तव्यानामनुपालनस्य च प्रोत्साहनाय***

***प्रवर्तितानां कार्यक्रमाणां सङ्ख्या***

**Answer:** 0

7.1.16.1 Number of activities conducted for promotion of universal values (Truth, Righteous conduct, Love, Non-Violence and peace); national values, human values, national integration, communal harmony and social cohesion as well as for observance of fundamental duties year-wise during the last five years

विगतपञ्चवर्षेषु, वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य वैश्विकमूल्यानां (सत्यं, चारित्र्यं, प्रेम, अहिंसा, शान्तिश्च) राष्ट्रियमूल्यानां, मानवीयमूल्यानां, राष्ट्रियैकतायाः, नानासमुदायसहभावस्य, सामाजिक-समरसतायाः, मूलकर्तव्यानामनुपालनस्य च प्रोत्साहनाय प्रवर्तितानां कार्यक्रमाणां वार्षिकसङ्ख्या

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 0 | 0 | 0 | 0 | 0 |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.16_1715982999_12674.pd |
| University code of conduct for teachersअध्यापकानां कृते विश्वविद्यालयस्य आचारसंहिता | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.16_1715977874_12674.pd |
| University code of conduct for students छात्राणां कृते विश्वविद्यालयस्य आचारसंहिता | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.16_1715977869_12674.pd |
| Report on the student attributes facilitated by the University छात्राणां गुणार्जनाय विश्वविद्यालयस्य सहकारिताविषयकं प्रतिवेदनम्। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.16_1715977832_12674.pd |
| List of activities conducted for promotion of universal value (Data Template) वैश्विकमूल्यानां संवर्धनाय आयोजितानां गतिविधीनां सूची। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.16_1715977704_12674.xls |

| | |
|---|---|
| Handbooks, manuals and brochures on human values and professional ethics मानवीयमूल्यानि, वृत्तिनीतिं च अधिकृत्य प्रकाशिता हस्तपुस्तिका, दिग्दर्शिका, परिपत्रिका च | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.16_1715977796_12674.pd |

***7.1.17 Institution conducts Value based Moral Education Programmes based upon Ancient Indian Texts like Bhagavadgeeta, Ramayana etc, and organizes national festivals and birth / death anniversaries of the great Indian personalities.***

***संस्था रामायण-भगवद्गीताप्रभृतीन् प्राचीनभारतीयग्रन्थान् आश्रित्य नैतिकशिक्षापाठ्यक्रमान् चालयति । राष्ट्रियमहोत्सवान्, विशिष्टानां गण्यानां भारतीयव्यक्तीनां वार्षिकं जन्मदिनं/पुण्यतिथिं च समायोजयति।***

**Answer:**

**प्राचीनभारतीयग्रन्थानां नैतिकशिक्षाः, वैश्विकमूल्यानि, सार्वत्रिकमूल्यशिक्षा, राष्ट्रियमूल्य-राष्ट्रभक्तिशिक्षा च-**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयेन भारतीयप्राचीनपरम्परायाः संरक्षणपूर्वक-पाठ्यक्रमाः प्रचाल्यन्ते। संस्कृतविश्वविद्यालयत्वात् अत्र वेदानां,शास्त्राणां, दर्शनानामध्ययनमध्यापनञ्च प्रचलति। तेषु सर्वेषु शास्त्रेषु नैतिकशिक्षणम्, मूल्यशिक्षणमागच्छत्येव यथा - '**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्। दयाभूतेष्वलोलुप्त्वं मार्दवं हीरचापलम्**।। विश्वविद्यालयपरिसरे आवर्षं मूल्यवर्धनाय नीतिशिक्षायै नैके कार्यक्रमाः भवन्ति। अभ्यासक्रमेण सह सहाभ्यासिकाः प्रवृत्तयः स्पर्धाः व्याख्यानानि कार्यशालाः परिसंवादाः वाक्यार्थपरिषद्, युवमहोत्सवः पदवीदानसमारम्भः शास्त्रीयस्पर्धाः कण्ठपाठस्पर्धाः संस्कृतसप्ताहोत्सवः संस्कृतभाषया एवाध्ययनाध्यापनं राष्ट्रियमहोत्सवाः एतत्सर्वमावर्षं चलन्ति, अतः विविधैः मार्गैः छात्रेषु मूल्यशिक्षणस्य च सञ्चारः भवति ।

**1. नैतिकशिक्षा (Moral Education)**

**सत्यम् (Truth)**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य अभ्यासक्रमे वेदोपनिषद्रामायणमहाभारतपुराणादीनि शास्त्राणि सन्ति यत्र **'सत्यं वद', 'सत्यं परं धीमहि'** तद्वत् **'सत्यं ब्रूयात् प्रियं ब्रूयात्'** तथा च श्रीरामचन्द्रस्य पवित्रं चरित्रमभ्यासक्रमेऽस्ति तेन छात्रेषु सत्यभाषणस्य सत्याचरणस्य गुणः विकसितः भवति। अनेन सह राष्ट्रियपर्वोत्सवेषु ०२ अक्टूबरदिनाङ्के महात्मागान्धिनः जयन्त्यां सत्य-अहिंसायाः आदर्शाः श्राव्यन्ते, निबन्धलेखनादयः स्पर्धाः भवन्ति ।

**न्याये वर्तनम् (Righteous Conduct)**

विश्वविद्यालयस्यास्य अभ्यासक्रमे **न्याय्यात्पथः प्रविचलन्ति पदं न धीराः,उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः**, इति ज्ञानदं नीतिशतकं श्रीकृष्णनीतित्वेन श्रीमद्भगवद्गीतासदृशाः ग्रन्थाः सन्ति । तेषां ग्रन्थानामध्ययनेन न्यायपूर्णेन व्यवहारेण कः लाभः भवति ? इति छात्राः विविधैः ग्रन्थैरधिगच्छन्ति

**प्रेम (Affection)**

वेदेषु पुराणेषु नैकानि सूक्तानि नैके प्रसङ्गाः कथाः आगच्छन्ति येषु परस्परं जीवदयापूर्णः प्रेमभावः सर्वेषु विकसितः भवेत् तादृशानि उदाहरणानि कथाश्च अभ्यासक्रमे समायान्ति पुनश्च युवमहोत्सवेऽपि छात्राणां परस्परः प्रणयभावः विकसितो भवेत् तदर्थम् आयोजनम् एतद् भवति।

**अहिंसा (Non-Violence)**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य अभ्यासक्रमे प्रायः अध्यात्मग्रन्थाः शास्त्राणि च सन्ति येषु **यमनियमासनप्राणायाम.........** इत्यादियोगसूत्रैः अहिंसायाः महत्त्वं फलञ्च प्रतिपादितमस्ति। विशेषतः वेदव्यासविरचितः महाभारताख्यो ग्रन्थः शास्त्रि-आचार्यकक्षायामागच्छन्ति यस्य ध्येयवाक्यमेवास्ति 'अहिंसा परमो धर्मः' एवञ्च 'अहिंसया परं रूपम्'। अनेन छात्रेषु अहिंसावृत्तेः विकासो भवति पुनश्च परोपकारः पुण्याय पापाय परपीडनमित्यत्र परपीडनमप्येका हिंसा एवास्तीति सम्यगधीत्य छात्राः अहिंसामार्गस्य बोधं सम्प्राप्य आचरणं कुर्वन्तः भवन्ति ।

शास्त्राध्ययनस्य परमं चरमं च लक्ष्यं भवति शान्तिप्राप्तिः, इति हेतुत्वात् विश्वविद्यालयस्याभ्यासक्रेषु प्रायः सर्वेषु ग्रन्थेषु त्रिभिः तापैः शान्तिः भवेत् तादृशं ज्ञानं निहितमेवास्ति । विशेषतः शास्त्रीयाभ्यासक्रमे श्रीमद्भगवद्गीता आगच्छति तत्र **त्यागाच्छान्तिरनन्तरम्', 'स शान्तिमधिगच्छति', 'अशान्तस्य कुतः सुखम् ?', 'ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति'** एतादृश्यः सूक्तयः अभ्यासक्रमे सन्ति तासामध्ययनं कृत्वा शान्तिप्राप्त्युपायै छात्राः शास्त्राणि पठन्ति। पुनश्च अस्माकं परम्परायामपि कार्यक्रमान्ते कर्मान्ते च ॐ शान्तिः शान्तिः शान्तिः इति वारत्रयमुच्यते ।

**राष्ट्रियमूल्यानि (National Values)**

विश्वविद्यालयपरिसरे पठतां छात्राणां जीवने राष्ट्रियमूल्यविकासः भवेत्तदर्थं वेदपुराणेतिहासविषयमाध्यमेन 'राष्ट्रदा राष्ट्रं मे देहि' राष्ट्रसूक्तम्, भूमिसूक्तम्, राजभक्तिः, रामायण-महाभारतयोः युद्धकथा तथा च समग्रे वर्षे येषां क्रान्तिकारी-पुरुषाणां दिवसाः आगच्छन्ति तेन समं तन्महत्त्वं ज्ञात्वा छात्रेषु राष्ट्रियमूल्यविकासः देशभक्तिश्च वृद्धिमेति ।

**मानवमूल्यानि (Human Values)**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्याभ्यासक्रमे ये ग्रन्थाः सन्ति तेषां ग्रन्थानां कविपरिचयेनैव मानवमूल्यानां विकासाय छात्राणां प्रवृत्तिर्भवति। यथा व्यास-वाल्मीकि-पाणिनि-पतञ्जलि-कालिदास-माघ-वराहमिहिर-भास्कराचार्य-कणाद-गौतम-महीधर-सायणादीनां ग्रन्थाध्ययनेन छात्रनिष्ठमानवमूल्येषु विकासो भवति। मानवमूल्यानां विकासाय शास्त्रीयग्रन्थेषु युधिष्ठिरः, नचिकेता, भरतः, हनुमान्, ध्रुवप्रह्लादौ तथैवाधुनिककालानुगुणं भगवान् शङ्कराचार्यः, डॉ. सर्वपल्ली राधाकृष्णन्, स्वामिविवेकानन्दः, इत्यादीनां महापुरुषाणां जीवनचरित्राणि छात्राः पठन्ति ।

**राष्ट्रिय-एकीकरणम् (National Intiegration)**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये संस्कृतग्रन्थैः सह इतिहास-अर्थशास्त्रादीनां ग्रन्थानामप्यध्ययनं भवति तत्र च इतिहासग्रन्थाधारेण राष्ट्रियएकीकरणस्य पाठः छात्रैः पठ्यते तद्वत् ३१ अक्तूबरदिवसविशेषे सरदारवल्लभभाई पटेलमहोदयानां दिवसाचरणेन राष्ट्रिय एकीकरणस्य बोधः छात्रैः प्राप्यते ।

**साम्प्रदायिकसंवादितता सामाजिकैकता च (Communal Harmony & Social Cohesion)**

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्याभ्यासक्रमे छात्रेषु भेदबुद्धिः न भवेत् परस्परं सद्भावः विकसितः भवेत् तदर्थं “समानी व आकूतिः समाना हृदयानि वः”, “वसुधैव कुटुम्बकम्,” “यत्र विश्वं भवत्येकनीडम्,” “परस्परं भावयन्तः श्रेयः परमवाप्स्यथ” एतादृशैर्वाक्यैरेव उच्चनीचभेदरहितेन ज्ञानेन छात्राणां संस्कृतभाषायां प्रवेशो भवति, पुनश्च एतान्येव वाक्यानि श्रुत्वा साम्प्रदायिकभेदात् विमुखो भवति । षड्शास्त्राणामध्ययनेन विविधग्रन्थाधारेण च सामाजिकैकतायाः ज्ञानं च प्राप्नोति ।

| File Description | Document |
|---|---|
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.17_1715977616_12674.pdf) |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.17_1715977296_12674.pdf) |

***7.1.18 The institution maintains complete transparency in its financial, academic, administrative and auxiliary functions***

***संस्था स्वकीयेषु आर्थिक-शैक्षिक-प्राशासनिकेषु इतरेषु च कार्यक्रमेषु सम्पूर्णरूपेण पारदर्शिताम् अवलम्बते।***

**Answer:**

**Answer:-**

**आर्थिकपद्धतिः-**

आर्थिकव्यवस्थायां पारदर्शिकतायाः निश्चितिः एवम्प्रकारेण क्रियते -

आर्थिकलेखापरीक्षणं बाह्यसंस्थाभ्यः नियमेन कार्यते ।

विकाससमितिः, क्रयसमितिः, तत्तत्- क्षेत्रविशेषज्ञैः च इत्येतेषां विविधसमितीनां माध्यमेन क्रयणं क्रियते ।

**शैक्षणिकपद्धतिः-**

- शैक्षणिककार्यस्य पाठ्येतरकार्यक्रमाणां च दिनदर्शिकानिर्माणमपि क्रियते।
- सत्रारम्भे शिक्षकाः मिलित्वा शैक्षणिकाध्यापनयोजनायाः निर्माणं कुर्वन्ति।
- सर्वेषु शैक्षणिकोपक्रमेषु नामाङ्कनाद् आरभ्य समाप्तिं यावत् तेषां सर्वविधविकासदृष्ट्या छात्राः केन्द्रबिन्दवः भवन्ति ।
- संस्थागतगुणवत्ता आश्वासनसमित्या (IQAC) शैक्षणिकलेखापरीक्षणकार्य नियमिततया कार्यते।
- परीक्षापरिणामानां परिशीलनं क्रियते।

**प्रशासनिकपद्धतिः -**

- विश्वविद्यालयप्रशासनव्यवस्था अत्यन्तपारदर्शिनी अस्ति।
- प्रत्येकमपि जनः स्वस्य प्रशासनिकदायित्वस्य वहनं साधुतया निर्वहति ।
- कार्यालयजनेन सह व्यवहारविषये छात्राः जागरुकाः सन्ति।
- सर्वेषां शिक्षकशिक्षकेतरकर्मचारिणां उपस्थितेः अङ्कनाय विश्वविद्यालयः बायोमेट्रिकव्यवस्थायाः उपयोगं करोति। सार्वजनिकावकाशानाम् आवली वर्षारम्भे एव सूचिता भवति।
- प्रत्येक प्रक्रियायाः निर्वहणार्थं विश्वविद्यालयस्य मानकसञ्चालनप्रक्रिया निर्मिता अस्ति।

**संस्थायाः सहाय्यककर्याणि -**

- कार्यशालाः, प्रशिक्षणवर्गः, शिक्षकाधिष्ठापनकार्यक्रमः, चर्चासत्राणि, विशेषज्ञसंवादाश्च इत्यादीनां सहाय्यककार्यक्रमाणाम् आयोजनं कठोरतया भवति । एषाम् आयोजनार्थम् अधोलिखितक्रमेण क्रियान्वयनं भवति।
- विशिष्टविभागद्वारा प्रस्तावनिर्माणम्
- कार्यपरिषदः माध्यमेन प्रशासनमाध्यमेन च आर्थिकमान्यता.।
- कार्यक्रमस्य सञ्चालनम्।
- धनव्ययस्य आर्थिकविवरणसमर्पणम्।
- कार्यक्रमस्य विवरणसमर्पणम्।
- प्रमाणानां सत्यापनं अङ्कनं च कृत्वा जालस्थाने प्रकाशनम्
- विश्वविद्यालयस्य काचित् समुपदेशकसमितिः अस्ति। या च वार्षिकोत्सवस्य, युवमहोत्सवस्य, प्रकल्पानां, कार्यशालानां, अतिथिभाषणानां, राष्ट्रियसेवायोजनायाः कार्यक्रमाणां च पूर्वयोजनां निरीक्षणं च करोति।

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.1.18_1715975854_12674.pdf) |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document (https://mpsvv.ac.in/images/naac/7%20CRITERIAN/7.1.18/link%20pafe.pdf) |

### 7.2 Best Practices

***7.2.1 State at least two institutional best practices (as per NAAC format)***

***रा.मू.प्र.परिषदः प्रपत्रानुसारेण संस्थायाः सर्वोत्तमं परिपाटिद्वयम् उल्लिख्यताम्।***

**Answer:**

**१. सर्वोत्तमपरिपाट्याः शीर्षकम् – भारतीयज्ञानपरम्परायाः पुनर्जागरणम्**

**२. परिपाटेः उद्दिष्टानि- अस्याः परिपाटेः उद्देश्यमस्ति यत्**

1. जनाः संस्कृतं प्रति समर्पिताः भविष्यन्ति।
2. संस्कृतभाषायां शास्त्रेषु विहितवैज्ञानिकादिज्ञानं प्राप्स्यन्ति।
3. भारतीयभाषावित्सु समरसतावृद्धिः भविष्यति।
4. विश्वविद्यालयस्य अधिकाधिकव्यवहारे च संस्कृतमयता स्यात्।
5. विश्वविद्यालयस्य प्राशासनिकक्रियाकलापेष्वपि संस्कृतमयता स्यात्।

**३. सन्दर्भः-**

'संस्कृतं नाम दैवी वाक्' – अनेन ध्येयवाक्येन उद्देश्यसम्पूर्त्यर्थं विश्वविद्यालयेन संस्कृतभाषाप्रचाराय प्रसाराय च ज्ञानपरम्परायाः पुनर्जागरणमिति परिपाटिः कल्पिता वर्तते। सर्वप्राच्यविद्यारूपप्रतिष्ठिता भाषा इयं लोकोपकारिणी अस्ति। अस्यां भाषायां पारम्परिकविषयाः यथा वेदव्याकरणसाहित्यदर्शनपुराणादीनां सवैशिष्ट्यवर्णनं विद्यते। तथा साम्प्रतिकवैशिष्ट्यपरकविद्याऽपि समाहिता यथा खगोल-चिकित्सा-गणित-योगादयः।

1. **परिपाटिः-**

आश्रमपद्धतिशिक्षायै उज्जयिनी प्राचीनकालादेव विश्वप्रतिष्ठिता अस्ति। अस्याम् उज्जयिन्यामेव संस्कृतभाषामूलकाचार्यस्य महर्षिपाणिनेः नामाधारितः महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः संस्थापितः। यस्य मुख्योद्देश्यं संस्कृतसमर्पणम्। उद्देश्यस्यास्य पूर्णतायै विश्वविद्यालयेन स्वीकृताः आयामाः -

1. **प्रबुद्धजनसम्बादः –** उज्जयिन्यां बहवः संस्कृतविद्वांसः सन्ति। अतः विश्वविद्यालस्य संस्कृतस्य च विकासाय स्थानीयप्रबुद्धजनैः सह विश्वविद्यालयस्य माननीयकुलपतिः तान् उपेत्य चर्चां कृत्वा संस्कृतविकाशविषयकं विचारं गृह्णाति। तदनुसारं विश्वविद्यालये संस्कृतस्य अध्ययनाध्यापनयोः व्यवस्थायां परिष्कारः कृतः।
2. **विश्वविद्यालयेन सञ्चाल्यमानाः कार्यक्रमाः –** विश्वविद्यालयेन स्थापितेन संस्कृतशिक्षणप्रशिक्षणज्ञानविज्ञानसम्बर्धनकेन्द्रेण संस्कृतभाषाधारिता नैके कार्यक्रमाः सञ्चाल्यन्ते। यथा - सान्ध्यविद्यालयः, संस्कृतशिविराणि, ग्रीष्मकालीनछात्रप्रशिक्षणं, पुराणपठनम् इत्यादि।
3. **गुरुकुलसम्प्रदायेन शिक्षणपरिचयः –** विश्वविद्यालये गुरुकुलसम्प्रदायेन अध्यापनं क्रियते। अत्रत्याः छात्राः उज्जयिनीस्थे गुरुशिष्यपरम्परावति गुरुकुले न्यायदर्शनस्य विशिष्टम् अध्यापनं कर्तुं न्यायशास्त्रपण्डितं डॉ. सन्दीपशर्माणमुपागत्य शास्त्राणि

पठन्ति।

4. **शास्त्रार्थसभा –** विश्वविद्यालये छात्राणां शास्त्रार्थकौशलवर्धनाय शास्त्रार्थसभायाः आयोजनं भवति।
5. **सांस्कृतिकभ्रमणम् –** प्रतिवत्सरं विश्वपर्यटनदिवसे छात्राः शिक्षकाश्च संस्कृतवाङ्मये उल्लिखितानि पुरातात्त्विक-ऐतिहासिक-सांस्कृतिकस्थानानि द्रष्टुं यान्ति। तथा भारतीयेतिहासिकगौरवेण सह परिचिताः भवन्ति।
6. **संस्कृतप्रतिस्पर्धा –** छात्रेषु संस्कृतं प्रति अभिरूचिवर्धनाय सरलमानकसंस्कृतमाश्रित्य विभिन्नाः संस्कृतभाषणादिस्पर्धाः आयोज्यन्ते। तेन छात्राणां संस्कृतसम्भाषणं प्रति आकर्षणम् उत्साहवर्धनञ्च भवति।
7. **वाग्वर्धिनीपरिषत् –** छात्राणां वाक्कौशलविकासाय प्रतिमासं वाग्वर्धिनीसभायाः आयोजनं भवति। तत्र छात्राः विविधान् शास्त्रीयविषयान् उपस्थापयन्ति।
8. **दत्तकग्रामेषु संस्कृतशिविरम् –** विश्वविद्यालयद्वारा प्रेमनगरं मानपुरम् इति ग्रामयोः निवासिनां संस्कृतं प्रति अभिरुचिसमुत्पादयनाय संस्कृतसम्भाषणं कर्तुं दक्षतासम्बर्धनाय संस्कृतस्य महत्त्वं ज्ञातुं च संस्कृतशिविरस्य आयोजनं क्रियते।
9. **शोधपत्रिकाप्रकाशनम् –** विश्वविद्यालयः पाणिनीया इति नाम्नीं त्रैमासिकीं शोधपत्रिकां प्रकाशयति। यत्र शिक्षकाणां विद्यार्थिनाञ्च शोधनिबन्धाः प्रकाश्यन्ते। अनेन संस्कृते शोधनिबन्धलेखनस्य प्रवृत्तौ वृद्धिर्जायते।
10. **छात्रवृत्तिः –** विश्वविद्यालये अध्ययनरतेभ्यः छात्रेभ्यः विविधैः संस्थानैः प्रदीयमाना छात्रवृत्तेः लाभः प्रदीयते। तत्र मध्यप्रदेशशासनस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य विश्वविद्यालयानुदानायोगस्य अन्येषां च शैक्षणिकसंस्थानां छात्रवृत्तयः छात्रैः लभ्यन्ते।

1. **साफल्यस्य प्रामाण्यम् –**
    1. उपर्युक्तक्रियमाणैः क्रियाकलापैः विश्वविद्यालये कार्यरतानां सर्वेषां जनानां मुखे संस्कृतसम्भाषणं विलसति।
    2. शास्त्राणामध्ययनाध्यापनभाषा संस्कृतं वर्तते। तत्रापि सरलमानकसंस्कृतप्रयोगेण अध्यापकाः दृश्यश्रव्योपकरणैः स्वशास्त्रगततत्वान् रुचिपूर्वकमध्यापयन्ति।
    3. कक्षासु संस्कृतमयता निर्मिता वर्तते।
    4. शैक्षिकभवने, छात्रावासे, परिसरे च छात्राः अध्यापकाः परस्परं संस्कृतेन व्यवहरन्ति।
    5. शैक्षिकभवने द्वित्राः कार्यरताः लिपिकाः सेवकाश्चापि शनैः शनैः संस्कृतवातावरणप्रभावेण संस्कृतेन व्यवहारं कर्तुं प्रेरिताः। तेऽपि लघु-लघु संस्कृतवाक्यानां व्यवहारे प्रयोगं कुर्वन्ति।
    6. विश्वविद्यालयस्य वाहनचालकः **श्रीमान् हर्ष-परौहामहोदयः** आजीवनं संस्कृतेन वार्तालापाय व्रतं स्वीकृतवान्। स्वगृहस्य सत्यापनमपि तेन देवनागर्यां विहितम्।
    7. विश्वविद्यालयस्य सर्वेषां प्रश्नपत्राणाम् उत्तरपुस्तिकानां माध्यमभाषा संस्कृतमेव वर्तते।
    8. सर्वेषामपि कार्यक्रमाणां सञ्चालनं मुख्यातिथेः सारस्वतातिथेः विशिष्टातिथेः उद्बोधनानि प्रवचनानि भाषणानि व्याख्यानानि च संस्कृतेनैव भवन्ति।
    9. सर्वेऽपि शैक्षिककार्यक्रमाः सम्पूर्णतया संस्कृतेन प्रचाल्यन्ते।
    10. छात्राः विविधासु राष्ट्रियासु प्रादेशिकासु च संस्कृतशास्त्रस्पर्धासु भागं गृह्णन्ति पारितोषिकाश्च प्राप्नुवन्ति।
2. **सम्मुखीकृताः समस्याः आवश्यकानि संसाधनानि च –**
    1. आदौ संस्कृतेतरकार्यरतानां कर्मचारिणाम् अधिकारिणां च संस्कृतं वक्तुं काठिन्यमासीत् किन्तु मान्यस्य कुलपतेः प्रेरणया वातावरणप्रभावेण, संस्कृतसम्भाषणवर्गायोजनेन, शिबिरायोजनेन, कार्यक्रमाणां संस्कृतेन सञ्चालनेन, विदुषाम् आगमनेन भाषणेन, सूचनाफलकैः, परस्परं सद्भावयुक्तेन सम्भाषणेन, कार्यक्रमारम्भे गीयमानेन संस्कृतकुलगीतेन, कार्यक्रमान्ते पूर्णतामन्त्रेण च शनैः शनैः तेऽपि संस्कृतेन व्यवहारं भाषणञ्च कुर्वन्ति।
    2. धैर्येण छात्रैः अध्यापकैः सह व्यवहारेण विश्वविद्यालये कार्यरताः लिपिकाः सेवकाः कर्मचारिणोऽपि संस्कृतेन व्यवहर्तुं प्रवृत्ताः सन्ति।
    3. नगरेषु जनपदेषु कृतकार्यक्रमैः संस्कृतवायुसञ्चारस्तु जातः नैके नागरिकाः संस्कृतसम्भाषणशिबिरप्रविष्टाः सन्तः संस्कृतेन व्यवहारं कर्तुं यतमानाः सन्ति।
    4. संस्कृतवातावरणेन अनेन संस्कृतमाध्यमेन अध्ययनाध्यापनेन बुद्धिमन्तः नैके छात्राः काव्यरचनाकौशलमपि लब्धवन्तः।
    5. इतोऽपि छात्रेषु कार्याकर्तृषु संस्कृतवातावरणनिर्माणाय अधिकाधिककार्ययोजनाः सम्पादनीयाः। वर्गे दृश्यश्राव्यसामग्रीणां (P.P.T) व्यवहारः वर्धनीयः। येन छात्राणां शिक्षणे कुतूहलं वर्धेत। बोधे च सौकार्यं स्यात्। तेन संस्कृतकथने उत्साहः वर्धेत। येन आचारे विचारे संस्कृतमेव अनुस्यूततया वर्तेत। तेन भावियुवानः संस्कृतयुक्ताः भवेयुः।
3. **टीप्पणी –**

1 विश्वविद्यालयपरिसरे आचार्याः परस्परं संस्कृतेनैव सम्भाषन्ते।

2. छात्राणां वाग्व्यवहारे संस्कृतं स्यात् तदर्थं तैः सह सरलसंस्कृतेन आचार्याः व्यवहरन्ति।

3. पुस्तकालये सरलमानकसंस्कृतेन लिखिताः नैके लघुकथाग्रन्थाः छात्राणां संस्कृतभाषणकौशलवर्धनाय सन्ति।

4.एवं युवकेषु संस्कृतप्रेम वर्धेत चेत् एकस्मिन् काले सम्पूर्णायां उज्जियिन्याम् संस्कृतमयता स्यात् इति भविष्यत्परिकल्पनम्।

1. **सर्वोत्तमपरिपाटेः शीर्षकम्- स्वच्छवातावरणे स्वस्थजीवनम्**
2. **परिपाटेः उद्देश्यानि –** अस्याः परिपाटेः उद्देश्यमस्ति यत्

1. योगस्य शास्त्रीय गाभीर्यार्थबोधः भविष्यति।
2. विकृतजीवचर्यायाः /दिनचर्यायाः निवारणं भविष्यति।
3. छात्राः नागरिकाः स्वस्थाः भविष्यन्ति।
4. हरितक्षेत्रसम्बर्धनेनैव शुद्धवातावरणस्य कल्पना भवति।

1. **सन्दर्भः**

“योगसमाधिः” अनेन वेदव्यासवचनेन इयं धारणा बलवती भवति यत् “योगश्चित्तवृत्तिनिरोधः”। यतो हि चित्तवृत्तिनिरोधेन तपश्चर्यासामर्थ्यमायाति। तत्तु स्वस्थ वातावरणे एव सम्भवति। अतः महर्षिपाणिनिसंस्कृतविश्वविद्यालयः उपरोक्तचिन्तनेनैव स्वपरिसरे स्वच्छवातावरणसंस्थापितायै सन्नद्धोऽस्ति। अस्मिन् क्रमे विश्वविद्यालयः अधिकाधिकवृक्षरोपणकार्यक्रमे प्रोत्साहवर्धनं करोति।

विश्वविद्यालयेन अनेन एकस्मिन् दिवसे एव सर्वाधिकवृक्षारोपणस्य वैश्विकोपलब्धिः प्राप्ता। येन परिणामेन विश्वविद्यालयीयपरिसरे सञ्चालितः निःशुल्कयोगप्रशिक्षणकार्यक्रमः सफलोऽस्ति। अत्र प्रशिक्षणाभ्यासकाले स्वस्थवातावरणेन अनन्यफलसिद्धिः अनुभूयते।

1. **परिपाटिः**

वर्तमानसमाजे वैदेशिकरीतिमनुसृत्य स्वदेशीयाः युवानः स्वस्थजीवनचर्यायाम् अविश्वसन्तः अविन्यस्ताभ्यासे रताः आत्मघ्नातिनः एव भवन्ति। तान् तादृशजीवनात् प्रत्यावर्त्य भारतीययोगजीवने प्रावेशयितुम् विश्वविद्यालेन केचन पदक्षेपाः स्वीकृताः। सर्वादौ मनसः शान्तिः आवश्यिकी। तदर्थं योग्यं वातावरणं यथा स्यात् तदर्थमपि विश्वविद्यालयः प्रयासः कृतः। तेषु मुख्यतमाः -

1. **निःशुल्कयोगप्रशिक्षणम्** – योगविभागेन सर्वेषां कृते निःशुल्कयोगप्रशिक्षणमारब्धम्। तत्र प्रत्यहं प्रातः सप्तवादनतः सर्वे योगासनेच्छवः आगन्तुं शक्नुवन्ति।
2. **निःशुल्कयोगचिकित्सा** - योगविभागेन सर्वेषां कृते निःशुल्कयोगचिकित्सायाः व्यवस्था आरब्धा। यत्र अस्थिसंयोगादिषु उत्पन्ना पीडा योगद्वारेणैव निवार्यते।
3. **योगशिविरम्** – विशिष्टदिवसेषु योगविभागपक्षतः योगशिविराणाम् आयोजनं क्रियते। तत्र अस्मद्विश्वविद्यालयस्य शिक्षकाः छात्राश्च योगप्रदर्शनमाध्यमेन योगासनानां फलं सर्वेषु प्रसारयन्ति।
4. **वृक्षारोपणकार्यक्रमः** – हरितवातावरणनिर्माणाय विश्वविद्यालयेन विशिष्टेषु दिवसेसु वृक्षारोपणं करोति। विश्वविद्यालयस्य परिसरे सहस्राधिकाः ओषधिवृक्षाः गुल्माश्च सन्ति।
5. **प्लास्टिकमुक्तवातावरणम्** – प्लास्टिकपदार्थः परिवेशस्य शत्रुरूपः। तस्य निवारणाय विश्वविद्यालयः प्लास्टिकमुक्तः परिसरः निर्मितः।
6. **मादकपदार्थमुक्तपरिसरः** – अद्यतनीयाः युवानः मादकद्रव्यसेवनेन विपथगामिनः भवन्ति। विश्वविद्यालयच्छात्राः यथा तादृशाचरणात् दूरे तिष्ठेयुः तदर्थं अस्माकं परिसरः मादकपदार्थविनिर्मुक्तः कृतः।
7. **ध्यानकेन्द्रम्** – विक्षिप्तमनसा विद्यायाः ग्रहणमसम्भवमेव। छात्राणां मनःसंयोगं यथा वर्धेत तदर्थं विश्वविद्यालयेन ध्यानकेन्द्रमपि संस्थापितम्।
8. **हरितदिवसः** – प्रत्येकस्मिन् सप्ताहे बुधवासरं विश्वविद्यालयः हरितदिवसरूपेण परिपालयति। तस्मिन् दिवसे इन्धनयुक्तानि यानानि विश्वविद्यालयस्य मुख्यद्वारात् बहिः संस्थाप्य अटित्वा एव परिसरे सर्वैः प्रवेशः कर्तव्यः। एवं सम्पूर्णदिवसे अटनेन शरीरचर्चा यथा भवति, तथैव इन्धनयुक्तयानानां व्यवहारः न्यूनः भवति। एवं वैश्विकौष्णायनह्रासाय विश्वविद्यालयस्य क्षुद्रः प्रयासोऽयम्।
9. **यज्ञशाला** – परिसरे यज्ञशालायाः सम्भवात् तत्र च विशिष्टदिनेषु यज्ञसम्पादनात् यज्ञधूमेन आवृते परिसरे सर्वेषां मनः शान्तमेव जायते। तत्र च वेदोद्घोषकाले सर्वे विश्वविद्यालयीयाः भागं गृह्णन्ति। तेन वैदिकमन्त्राणां कण्ठस्थीकरणमपि जायते।

1. **साफल्यस्य प्रामाण्यम् –**
   1. प्रत्यहं प्रातः छात्राः योगासनं कर्तुमागच्छन्ति। स्वास्थ्यवन्तश्च भवन्ति।
   2. शिविरेषु जनानां सम्मर्दः शनैः शनैः वर्द्धते। एतेन योगं प्रति जनाः आकृष्टाः भवन्ति इति ज्ञायते।
   3. विविधासनादिभिः विक्षिप्तं मनः एकीभूतं भवति इति छात्राणां फलप्रकाशनेन सम्यक् दृश्यते।
   4. विविधावसरे परिसरे बहुविधवृक्षारोपणेन हरितपरिसरः सञ्जातः।
   5. 1200 संख्यकानां वृक्षाणाम् आरोपणे विश्वविद्यालयः वैश्विकप्रसस्तिं प्राप्तवान्।
   6. ओषधीयवृक्षारोपणेन वृक्षेभ्यः एव ओषधीद्रव्यप्राप्तौ प्राथमिकोपचारे तेषां प्रयोगः भवति।
   7. प्रत्येकस्मिन् बुधवासरे समग्रदिवसं यावत् अटनेन शरीरं बलयुक्तम् ओजोयुक्तं च भवति।
2. **सम्मुखीकृताः समस्याः आवश्यकानि संसाधनानि च –**
   1. छात्राः उत्साहवन्तः सन्तः प्रत्यहं प्रातः योगासनं कर्तुमागच्छन्ति। छात्राणां संख्या अनुदिनं वर्धते इति दृश्यते।
   2. अस्माकं परिसरः हरितमयः इत्यत्र नास्ति संशयः। इतोऽपि विविधावसरे वृक्षारोपणं कर्तव्यं येन प्रायः सर्वविधाः वृक्षाः अस्माकं परिसरे भवेयुः।
   3. योगस्य सुफलं जनेषु प्रचारणीयम्। येन सर्वे जनाः योगासने रताः सन्तः आत्मोन्नतिं साधयन्ति।
3. **टीप्पणी**

जनसंख्यावृद्धिकारणेन नागरिकाणां पार्श्वे भूभागावनतिः अनुभूयते इदानीम्। येन सर्वकारभूम्याः अनुपातमपि ह्रासोन्मुखी दृश्यते। येन विस्तृतसर्वकारीयभूमौ विभिन्नपरियोजनायाः कृते भूम्याः आवण्टनं भवन्नस्ति। एतादृशसमस्यायाः समाधानाय स्वच्छवातावरणनिर्माणाय च वनाच्छादितभूम्यानुपातवर्धनं भवेत्। एवमेव स्वस्थजीवनयापनाय शुद्धाहारविहारव्यवस्था शास्त्रेषु वर्णिता अस्ति। शुद्धाहारेणैव स्वस्थशरीरस्वस्थमनोवृत्तिश्च सम्भवति। इदानीं वैश्विकनीतिमनुसृत्य दीर्घोद्योगप्रणाली विकसिता सम्बर्धिता चास्ति। कृषिक्षेत्रे अन्नोत्पादनेऽपि अस्य विधेः प्रचुरप्रभावः अवलोक्यते। तेन नानाप्रकारेण नूतनव्याधिवृद्धिः अपि जायते। अतः कृषिक्षेत्रे पशुपालने च विशेषरूपेण औद्योगिकापेक्षया व्यक्तिकेन्द्रितकृषिनीतियनुसरणमपेक्षते। अनया नीत्या शुद्धाहारपरिकल्पना भवितुं शक्यते। तेन स्वस्थशरीरेण शास्त्रोक्तरीत्या योगसम्बर्धनमपि भविष्यति। तदा योगेन अस्य विश्वविद्यालयस्य स्वस्थनागरिकाणां परिकल्पना फलवती स्यात्।

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.2.1_1716058689_12674.pdf) |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document (http://www.mpsvv.ac.in/index.php/en/best-practice) |

### 7.3 Institutional Distinctiveness

***7.3.1 Describe/Explain the performance of the institution in one area distinctive to its vision, priority and thrust***

***संस्थया स्वस्य दूरदृष्टिं, प्राथम्यं, प्रधानविषयञ्च मनसि निधाय एकस्मिन् विशिष्टक्षेत्रे स्वेन कृतस्य कार्यनिष्पादनस्य विवरणं दीयताम् ।***

**Answer:**

**महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य वैशिष्ट्यम्-** समग्रभारते विद्यमानेभ्यः संस्कृतविश्वविद्यालयेभ्यः महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः वैलक्षण्यं भजते। श्रीमहाकालस्य नगरीयं, जगद्गुरुश्रीकृष्णस्य विद्यास्थली, वीरविक्रमादित्यस्य राजधानीयं, यत्र कविकुलगुरुणा कालिदासेन गढकालिकादेव्याः समाराधना विहिता। अस्माद्धेतोः अस्मिन् विश्वविद्यालये इतरस्मात् विलक्षणता विद्यते। विश्वविद्यालयेन कार्यक्षेत्राणि-प्रमुखान्युद्दिष्टानि-अनुसंधानप्राथम्यं विश्वविद्यालयस्य अन्तर्दृष्टौ ध्येयेषु च सर्वादौ निर्दिष्टम्।

**1.सर्वेषां कृते संस्कृतम् -**

संपूर्णमध्यप्रदेशे विश्वविद्यालयस्यास्य अधिकारव्याप्तिः अस्ति। विश्वविद्यालयः सर्वत्र आधुनिकशिक्षणप्रवाहकारणेन आधुनिकजिज्ञासूनां विषयानाम् अवबोधनाय ज्योतिर्विज्ञानविभागेन ज्योतिषशास्त्रगततत्त्वानां सरलरीत्या अध्यापनं प्रसारश्च कार्यते। एतेषु सर्वेषु अभ्यासक्रमेषु प्राचीनभारतीयशास्त्राणाम् च संस्कृतस्यापि अन्तर्भावो भवति। एतद्विहाय विश्वविद्यालयद्वारा स्नातकस्नातकोत्तरपाठ्यक्रमाः निसर्गोपचारः पंचकर्म अभ्यासक्रमाः इत्यादयः प्रचाल्यन्ते।

**2.भविष्यार्थे संस्कृतम्-**

विश्वविद्यालयः आधुनिकविषयाणाम् अध्ययनार्थं संस्कृते अध्ययनसामग्रीनिर्माणार्थम् प्रयत्नरतः वर्तते। अनेन सह विश्वविद्यालयः योगचिकित्सा-वास्तुशास्त्रादेः अध्ययनस्य, नवनवीनक्षेत्रेषु संस्कृताध्ययनस्य च आवश्यकतां आविष्करोति। अनेन राष्ट्रेऽस्मिन् भविष्यत्काले संस्कृतस्य विकासस्य पन्थाः प्रसृतः भवेत्।

अस्यां दिशि विश्वविद्यालयेन स्नातकोत्तरशिक्षणं-- एम.ए.वास्तुशास्त्रम्, एम्.ए. ज्योतिर्विज्ञानम् तथा एम्.एस्.सी.योगशास्त्रं विश्वविद्यालये आरब्धम्। एभिः अभ्यासक्रमैः संस्कृतक्षेत्रे नूतनाः आधुनिकाश्चाध्ययनविषयाः प्राप्यन्ते।

विश्वविद्यालयः सर्वदा शास्त्रगतगूढतत्त्वाध्यापने विश्वसिति अत एव महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये -वेद-व्याकरण-ज्योतिष-दर्शन-संस्कृतसाहित्य-शिक्षाशास्त्रमित्यादीनाम् अभ्यासक्रमाणाम् अध्ययनं प्रचलति। पारम्परिक- स्नातक-स्नातकोत्तर अभ्यासक्रमाः विश्वविद्यालये अध्याप्यन्ते। बहुविद्याशाखीयाः अन्तर्विद्याशाखीयाश्च अभ्यासक्रमाः विश्वविद्यालयस्य विभागेषु प्रचलन्ति। सम्प्रति विश्वविद्यालयः शास्त्राणां अध्ययनाध्यापने छात्राणाम् आकर्षणे यशस्वी जातः।

विश्वविद्यालयस्य शोधविभागेभ्यः विद्यावारिधिः इति उपक्रमाः अपि सञ्चाल्यते। छात्रान् अध्ययने प्रेरयितुं विश्वविद्यालयः विद्यावारिधिछात्रेभ्यः छात्रवृत्तिम् प्रददाति। अत्र अध्ययनं कुर्वाणान् छात्रान् शास्त्राध्ययने प्रेरयितुं प्रतिमासं छात्रवृत्तेः व्यवस्थां प्रददाति।

विश्वविद्यालयेन विविधेषु क्षेत्रेषु आत्मनिर्भरतां संपादयितुं नैके उपक्रमाः आरब्धाः।

**3.सामाजिकैः सह सम्बन्धः-**

विश्वविद्यालयः एकाकी कार्यं कर्तुम् न प्रभवति अतः सामाजिकसंबंधस्थापनार्थं विश्वविद्यालयः संस्कृतशिक्षणप्रशिक्षणज्ञानविज्ञानसंवर्धनकेन्द्रेण अनौपचारिकशिक्षणद्वारा असर्वकारिसंघटनया सह संलग्नीभवति। विश्वविद्यालयस्य संस्कृतशिक्षणप्रशिक्षणज्ञानविज्ञानसम्बर्धनकेन्द्रद्वारा नैकाः कार्यशालाः नैके अल्पकालीनाः उपक्रमाः परामर्शकेन्द्राणि च चाल्यन्ते।

विश्वविद्यालयस्य स्थानीयजनानाम् आवश्यकतां विज्ञाय संचालकमंडलसहमतिना विश्वविद्यालयस्य समीपवर्तिनां रोगग्रस्तानां नागरिकाणां रोगशमनाय यद्वा स्वस्थनागरिकाणां स्वस्थतासंरक्षितार्थं प्रातःकाले योगाभ्यासः सञ्चालितः। उज्जयिन्नयां बहवः संस्कृतविद्वांसः सन्ति। अतः विश्वविद्यालयस्य संस्कृतस्य च विकासाय स्थानीयप्रबुद्धजनैः सह विश्वविद्यालयस्य माननीयकुलपतिः तान् उपेत्य चर्चां कृतवान्। तेषां विचारान् च ज्ञातवान्। तदनुसारं विश्वविद्यालये संस्कृतस्य अध्ययनाध्यापनयोः व्यवस्थायां परिष्कारः कृतः। अत्र पाणिनिप्राध्यापकपीठं स्थापितं विद्यते। तत्र नैके सामाजिकाः योगदानं कुर्वन्तः सन्ति। एवमेव विश्वविद्यालये वेंकटाचलम् पीठम् स्थापितं विद्यते। यस्य स्थापनस्य संचालनस्य च व्ययराशिः सामाजिकेन प्रदत्तः। अनेन प्रतिवर्षं संस्कृतस्य प्रचाराय प्रसाराय शास्त्रसंरक्षणाय च नैके कार्यक्रमाः आयोज्यन्ते।

**4. स्वयञ्चालिता पारदर्शिका गतिशीला च प्रशासनव्यवस्था-**

गतत्रिवर्षेभ्यः विश्वविद्यालयस्य शासनव्यवस्थायां पञ्चस्तरात्मिका वृद्धिर्जाता। छात्रसंख्या द्विगुणिता। अध्यापकानां विभागानाञ्च संख्या वृद्धिङ्गता। प्रशासनव्यवस्थया प्रशासनव्यवस्थां संवर्धयितुं सूचनासम्प्रेषणप्रौद्योगिकी-तंत्रज्ञानस्य उपयोजनम् आरब्धम्।

| File Description | Document |
| --- | --- |
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/112726/7.3.1_1715974879_12674.pdf) |

| | |
|---|---|
| Link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document (https://mpsvv.ac.in/images/naac/7%20CRITERIAN/7.3.1/Institutional%20Distinctivenes%207.3.1.pdf) |

## Extended Profile

### Program

***Number of Programmes offered year-wise for last five years***
***विगतपञ्चवर्षेषु समायोजितानां पाठ्यक्रमाणां वार्षिकसङ्ख्या***

**Answer:**

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 24 | 22 | 21 | 19 | 18 |

### Students

***Number of students year-wise during the last five years***
***विगतपञ्चवर्षेषु प्रविष्टानां छात्राणां वार्षिकसङ्ख्या***

**Answer:**

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 462 | 507 | 411 | 320 | 231 |

***Number of outgoing / final year students year-wise during the last five years***
***विगतपञ्चवर्षेषु उत्तीर्णानां छात्राणां वार्षिकसङ्ख्या***

**Answer:**

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 145 | 176 | 104 | 79 | 46 |

***Number of students appeared in the University examination year-wise during the last five years***
*विगतपञ्चवर्षेषु, विश्वविद्यालये परीक्षासु सम्मिलितछात्राणां वार्षिकसङ्ख्या*

**Answer:**

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 460 | 493 | 411 | 313 | 218 |

**Teachers**

***Number of full time teachers year-wise during the last five years***
*पूर्णकालिकाध्यापकानां विगतपञ्चवर्षाणां वार्षिकक्रमेण समष्टिसङ्ख्या*

**Answer:**

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 28 | 23 | 17 | 18 | 17 |

***Number of sanctioned posts year-wise during the last five years***
*विगतपञ्चवर्षेषु अनुमोदितानां पदानां वार्षिकसङ्ख्या*

**Answer:**

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 30 | 30 | 30 | 30 | 30 |

**Institution**

***Total Expenditure excluding salary year-wise during the last five years (INR in Lakhs)***
*विगतपञ्चवर्षेषु वेतनाद् ऋते संस्थाया वार्षिकः व्ययः (लक्षशः)*

**Answer:**

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 140.54 | 102.10 | 118.38 | 129.14 | 118.71 |

## Conclusion

***Additional Information :***
Distinctive Features of the University

The following points highlight the growth and synthesis of modern and traditional knowledge system

- Focus on multidisciplinary studies and areas of research
- University has incorporated solar panel and rain water harvesting system.
- University follows CBCS pattern of examination
- Sixteen Memorandum of understanding have been signed with national and International Institutions.
- Green initiatives have been taken by the university.
- University has a Plastic free campus.
- The university has been organizing free Yoga camps in the morning since the year 2022 for maintaining the health of the society.
- The university organized a *Shatrarth Sabha* exclusively in Madhya Pradesh Raj Bhawan in the year 2020.
- The university follows a 'No Vehicle Zone policy' on Wednesday as a part of green initiative .
- The university publishes its research journal *Paniniya* which is a peer reviewed and UGC care listed online International.
- **Sanskrit Shikshan Prashikshan Gyan Vigyan Samvardhan Kendra**: The university has established Sanskrit Shikshan Prashikshan Gyan Vigyan Samvardhan Kendra which organizes a number of programs related to teaching and learning of English language. For example-evening school, Sanskrit camps, Sanskrit summer camps etc
- Guidance for competitive examination such as UGC NET , SLET etc

***Concluding Remarks:***

- **CONCLUSION**

  Maharshi Panini Sanskrit Evam Vedic Vishwavidyalya was established in the year 2008. It has 20 affiliated Colleges for Specialized Studies and Research Centre. It is the only Sanskrit university in Madhya Pradesh emerging high in the field of Sanskrit and Indian Knowledge System.The university has been formed exclusively for the development of the Sanskrit language with the amalgamation of traditional and modern disciplines. Abiding by its Vision statement;

  भारतीयज्ञानपरम्परायाःनिरन्तरप्रवाहस्यनवाचाराः

  The university integrates the timeless wisdom of ancient Indian knowledge system with modern innovation and progress across diverse disciplines.The basic aim of the university is promotion and proliferation of Sanskrit language and literature. Through a balance blend of traditional and cutting edge academic program the university seeks to improve strata of all people in search of knowledge. The university has been acknowledged for its distinctive features for the academic excellence

- The university has received Golden Book of World Records for planting more than 1000 trees in 2018.
- University has won the Globus Awards Certificate of Achievement for Best Practices in Employability and Entrepreneurship in the year 2021.
- University has won the Globus Awards Certificate of Achievement for Best Course and Curriculum Design in the 2021.
- University won the Indian Knowledge System Education and Excellence Award-2022 by Baraudi Sanskriti Sanskar Shiksha Samiti.
- Organization of first Sanskrit film festival in Ujjain-The university organized a free screening of a Sanskrit movie entitled *Yanam(based on Mangal Mission )*in the year 2022.
- The university has received Aksharvarta International Summit Award in 2023 for its work in the field of research and innovation.
- The university has been found suitable from the point of view of Environment ,Energy and Quality Management System according to Quality Research Organization,New Delhi.

## EXCLUDED METRICES

No Metrices are Excluded

## ANNEXURE

**1.Metrics Level Deviations**

| Metric ID | Sub Questions and Answers before and after DVV Verification |
|---|---|
| 1.3.2 | Number of value-added courses imparting transferable and life skills offered during the last five years.<br>विगतपञ्चवर्षेषु प्रचालितानां स्थानान्तरार्हाणां जीवनकौशलप्रदानां मूल्यसंवर्धकानाञ्च पाठ्यपत्राणां सङ्ख्या।<br><br>1.3.2.1. How many new value-added courses are added within the last 5 years विगतपञ्चवर्षेषु कति मूल्यसंवर्धक-पाठ्यपत्राणि योजितानि?<br>Remark : As per clarification received from HEI, and Diploma which should not considered. So, based on that DVV input recommended. |
| 1.3.3 | Average Percentage of students enrolled in the courses under 1.3.2.<br>1.3.2 बिन्दोः अनुरूपं जीवनकौशलप्रदे मूल्यसंवर्धके च पाठ्यपत्रे प्रविष्टानां छात्राणां प्रतिशतता।<br><br>1.3.3.1. Number of students enrolled in value-added courses imparting transferable and life skills offered year-wise during the last five years विगतपञ्चवर्षेषु प्रचालितानां स्थानान्तरार्हाणां जीवनकौशलप्रदानां मूल्यसंवर्धक-पाठ्यपत्राणां प्रतिवर्षीया सङ्ख्या।<br>Remark : As per clarification received from HEI, and changes done according to the above related metric id 1.3.2 thus DVV input is recommended. |
| 1.3.4 | Percentage of students undertaking field projects/ internships/ training programmes/ summer assignments etc. (Preceeding academic year data)<br>क्षेत्रकार्यपरियोजनासु अन्तःप्रशिक्षणेषु प्रशिक्षणपाठ्यक्रमेषु ग्रीष्मावकाशस्तकार्येषु गृहीतभागानां छात्राणां प्रतिशतता। (प्रगतवर्षस्य)<br><br>1.3.4.1. Number of students undertaking field project or internships क्षेत्रकार्यपरियोजनासु ग्रीष्मावकाशादिषु कार्याणि कुर्वताम्/ अन्तःप्रशिक्षणं प्राप्तवतां छात्राणां सङ्ख्या।<br>Answer before DVV Verification : 89<br>Answer after DVV Verification: 89<br><br>Remark : As per clarification received from HEI, and removing multiple counting of student so based on that DVV input is recommended. |
| 3.1.2 | The institution provides seed money for in-depth Shastric training/ inter-disciplinary training to its teachers for research during the last five years<br>विगतपञ्चवर्षेषु संस्था अध्यापकेभ्यः अनुसन्धानाय तलस्पर्शिशास्त्रप्रशिक्षणाय अन्तःशास्त्रीयप्रशिक्षणाय च मूलनिधिं ददाति।<br><br>3.1.2.1. The amount of seed money provided by institution to its faculty year-wise during the last five years (INR in lakhs) संस्थया विगतपञ्चवर्षेषु अध्यापकेभ्यः प्रदत्तस्य मूलनिधेः वार्षिकसङ्ख्या (लक्षशः)।<br>Remark : As per without sanctioned letter claim could not be considered so based on that DVV input is recommended. |
| 3.2.1 | Grants for research projects sponsored by the non-government sources such as industry, corporate houses, other allied organizations, national/international bodies, endowments, chairs in the institution during the last five years (INR in Lakhs)<br>संस्थायां गतपञ्चवर्षेषु उद्योग-औद्योगिकाधिष्ठान-दत्तनिधि-राष्ट्रिय-अन्ताराष्ट्रियनिकायैः अन्याभिश्च असर्वकारीयसंस्थाभिः प्रायोजितानां शोधयोजनानां कृते प्राप्तमनुदानं पीठानि च (लक्षशः)<br><br>3.2.1.1. Total Grants for research projects sponsored by the non-government sources such as industry, corporate houses, other allied organizations, national/international bodies, endowments, Chairs in the institution year-wise during the last five years (INR in Lakhs) - संस्थायां गतपञ्चवर्षेषु उद्योग-औद्योगिकाधिष्ठान-दत्तनिधि-राष्ट्रिय-अन्ताराष्ट्रियनिकायैः अन्याभिश्च असर्वकारीयसंस्थाभिः प्रायोजितानां शोधयोजनानां कृते प्राप्तानाम् अनुदानानां वार्षिकयोगः (लक्षशः)-<br>Remark : DVV has made necessary changes as per prescribed format shared by HEI and has considered non government research project |

| | |
|---|---|
| 3.2.2 | Grants for research projects sponsored by the government sources like UGC, Rashtriya Sanskrit Sansthan, IGNCA, NMM, Sanskrit Academies, ICPR, DST, ICHR etc. during the last five years (INR in Lakhs)<br>विगतपञ्चवर्षेषु विश्वविद्यालयानुदानायोग-राष्ट्रियसंस्कृतसंस्थान-इन्दिरागाँधीराष्ट्रियकलाकेन्द्र-राष्ट्रियपाण्डुलिपिमिशन्-संस्कृताकादमी-भारतीयदार्शनिकानुसन्धानपरिषद्-भारतीयेतिहासानुसन्धानपरिषदादिभिः सर्वकारीयसंस्थाभिः प्रायोजितानां शोधपरियोजनानां कृते प्राप्तमनुदानम्। (लक्षशः)<br><br>3.2.2.1. Total Grants for research projects sponsored by the government sources year-wise during the last five years (INR in Lakhs) विगतपञ्चवर्षेषु सर्वकारीयसंस्थाभिः प्रायोजितानां शोधपरियोजनानां कृते प्राप्तानामनुदानानां वार्षिकयोगः। (लक्षशः)<br>Remark : DVV has made necessary changes as per prescribed format shared by HEI and has considered government research project |
| 3.3.2 | Number of awards won by institution/teachers for innovation during the last five years<br>विगतेषु पञ्चसु वर्षेषु संस्थया अध्यापकैः नवाचारविषये प्राप्तानां पुरस्काराणां/ सम्मानानां सङ्ख्या।<br><br>3.3.2.1. Total number of awards for innovation won by institution/teachers year-wise during the last five years विगतेषु पञ्चसु वर्षेषु संस्थया/ अध्यापकैः नवाचारविषये प्राप्तानां पुरस्काराणां/ सम्मानानां वार्षिकसमष्टिसङ्ख्या।<br>Remark : As per provided certificates by HEI, thus DVV input is recommended. |
| 3.4.5 | Number of research papers per teacher in the Journals notified on UGC website/ recognised peer reviewed journals/ reputed journals published by Sanskrit/ General Universities/ Departments/ Research Institutes and notified journals by the Rashtriya Samskrit Sansthan in its website and Conference Proceedings.<br>विगतपञ्चवर्षेषु विश्वविद्यालयानुदानायोगस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु, संस्कृतविश्वविद्यालयैः तद्विभागैः प्रकाशितासु शोधपत्रिकासु राष्ट्रियसंस्कृतसंस्थानस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु सम्मेलनकार्यवृत्तेषु वा प्रत्येकम् अध्यापकस्य प्रकाशितशोधपत्राणां सङ्ख्या।<br><br>3.4.5.1. Number of research papers in the Journals notified on UGC website year-wise during the last five years विगतपञ्चवर्षेषु विश्वविद्यालयानुदानायोगस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु प्रकाशितशोधपत्राणां वार्षिकसङ्ख्या।<br>Remark : As per clarification received from HEI, and excluding publication for calendar year 2023 which should not be considered.So, based on that DVV input is recommended. |
| 3.4.6 | Number of books edited and chapters in edited volumes/ books published, monographs in Sanskrit and other languages, original creative writing in Sanskrit, Sanskrit Shastras etc. (excluding awarded works), per teacher during the last five years<br>विगतपञ्चवर्षावधौ प्रत्यध्यापकं प्रकाशितग्रन्थानां/ सम्पादितग्रन्थेषु लिखिताध्यायानां/ प्रकाशितपुस्तकानां/ प्रकाशितशोधपत्राणां/ संस्कृते एवं संस्कृतशास्त्रेषु सर्जनात्मकलेखानां सङ्ख्या। (पुरस्कारप्राप्तग्रन्थान् विहाय)<br><br>3.4.6.1. Total number of books and chapters in edited volumes / books published, and papers in national/international conference-proceedings monographs, creative writing year-wise during the last five years - विगतपञ्चवर्षावधौ प्रत्यध्यापकं प्रकाशितग्रन्थानां/ सम्पादितग्रन्थेषु लिखिताध्यायानां/ प्रकाशितपुस्तकानां/ राष्ट्रिय-अन्ताराष्ट्रिय-सङ्गोष्ठीकार्यवृत्तिषु प्रकाशितशोधपत्राणां/ सर्जनात्मकलेखानां वार्षिकसङ्ख्या।<br>Remark : As per clarification received from HEI, and excluding publication for calendar year 2023 which should not be considered.So, based on that DVV input is recommended. |
| 3.6.2 | Number of awards and recognition received for extension activities from Government /recognised bodies during the last five years<br>विस्तारगतिविधीनां कृते सर्वकारात्/मान्यताप्राप्तनिकायेभ्यः विगतपञ्चवर्षेषु प्राप्ताः पुरस्काराः/ सम्मानानि<br><br>3.6.2.1. Total number of awards and recognition received for extension activities from Government/ recognised bodies year-wise during the last five years विस्तारगतिविधीनां कृते सर्वकारात्/ मान्यताप्राप्तनिकायेभ्यः विगतपञ्चवर्षेषु प्राप्तानां पुरस्काराणां/ सम्मानानां वार्षिकयोगः।<br>Remark : DVV has made necessary changes as per supporting document shared by HEI and input value "0" has been considered as there is no extension activities |

| | |
|---|---|
| 3.6.3 | Number of extension and outreach Programmes conducted in collaboration with industry, community and Non-Government Organisations through NSS/ Swaccha Bharata Abhiyana/ NCC/ Red cross/ YRC etc., during the last five years<br>विगतपञ्चवर्षेषु उद्योगसंस्थायाः, समुदायस्य तथा असर्वकारीयसंस्थानां सहयोगेन राष्ट्रियसेवायोजना/ स्वच्छभारताभियानः/ राष्ट्रियबालचरसङ्घः/ रेडक्रास्/ वाई-आर्-सी इत्यादीनां माध्यमेन आयोजितानां विस्तारकार्यक्रमाणां बहिर्मुखकार्यक्रमाणाञ्च सङ्ख्या।<br><br>3.6.3.1. Number of extension and outreach Programmes conducted in collaboration with industry, community and Non-Government Organisations through NSS/Swaccha Bharata Abhiyana/NCC/Red cross/YRC etc., year-wise during the last five years विगतपञ्चवर्षेषु उद्योगसंस्थायाः, समुदायस्य तथा असर्वकारीयसंस्थानां सहयोगेन राष्ट्रियसेवायोजना/ स्वच्छभारताभियानः/ राष्ट्रियबालचरसङ्घः/ रेडक्रास्/ वाई-आर्-सी इत्यादीनां माध्यमेन आयोजितानां विस्तारकार्यक्रमाणां बहिर्मुखकार्यक्रमाणाञ्च वार्षिकी सङ्ख्या।<br>Remark : As per reports provided by HEI so based on that DVV input is recommended. |
| 3.6.4 | Average percentage of students participating in extension activities with Government Organisations, Non-Government Organisations and Programmes such as Spoken Sanskrit Camps/ Shibiras /Yoga camps/ etc. during the last five years.<br>विगतपञ्चवर्षेषु सर्वकारीयसंस्थाभिः असर्वकारीयसंस्थाभिश्च सह समायोजितेषु संस्कृतसम्भाषणशिबिर-योगशिबिरादिविस्तारकार्यक्रमेषु छात्राणां भागग्राहितायाः मध्यमानस्य प्रतिशतता।<br><br>3.6.4.1. Total number of students participating in extension activities with Government Organisations, Non-Government Organisations and Programmes such as Spoken Sanskrit Camps/ Shibiras/ Yoga camps/ etc. year-wise during the last five years. विगतपञ्चवर्षेषु सर्वकारीयसंस्थाभिः असर्वकारीयसंस्थाभिश्च सह समायोजितेषु संस्कृतसम्भाषणशिबिर-योगशिबिरादिविस्तारकार्यक्रमेषु छात्राणां भागग्राहितायाः वार्षिकसङ्ख्या।<br>Remark : As per clarification received from HEI, and number of students participating in activities are related to the Intent of the metric so based on that DVV input is recommended. |
| 4.3.2 | Student - Computer ratio (preceding academic year data)<br>छात्र-गणकयन्त्रानुपातः (गताध्ययनवर्षस्य दत्तांशः)<br><br>4.3.2.1. Total number of computers in the campus for academic purpose पठनप्रक्रियार्थं परिसरेषु वर्तमानानां गणकयन्त्राणां सङ्ख्या<br>Answer before DVV Verification : 20<br>Answer after DVV Verification: 20<br><br>Remark : As per provided bills in supporting documents by HEI, thus DVV input is recommended. |
| 4.4.1 | Average expenditure incurred on maintenance of physical facilities and academic support facilities excluding salary component, as a percentage during the last five years<br>पञ्चवर्षेषु वेतनाद् ऋते भौतिकसौविध्यानां शैक्षिकप्रोद्बलनसौविध्यानां च अनुरक्षणाय कृतस्य व्ययस्य प्रतिशतता-<br><br>4.4.1.1. Expenditure incurred on maintenance of physical facilities and academic support facilities excluding salary component year-wise during the last five years (INR in lakhs) विगतपञ्चवर्षेषु वेतनाद् ऋते भौतिकसौविध्यानां शैक्षिकप्रोद्बलनसौविध्यानां च अनुरक्षणाय कृतः वार्षिकव्ययः (लक्षशः रूप्यकेषु)<br>Remark : DVV has made necessary changes as per audit report shared by HEI and has considered expenditure related to Repairs and Maintenance and AMC |
| 5.2.3 | Average percentage of students qualifying in state/ national/ international level examinations during the last five years. (eg: NET/ SLET/ TOEFL/ Civil Services/ State government examinations)<br>विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्रस्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां मध्यमानस्य प्रतिशतता (उदा.नेट्-स्लेट्-टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)<br><br>5.2.3.1. Number of students qualifying in state/ national/ international level examinations (eg: NET/SLET/TOEFL/ Civil services/State government examinations) year-wise during the last five years विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्र-स्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां वार्षिकसङ्ख्या (उदा-नेट्-स्लेट्- टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)<br>5.2.3.2. Number of students appearing in state/ national/ international level examinations (eg: NET/SLET/GRE/TOEFL/ Civil Services/State government examinations) year-wise during the last five years विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्र-स्तरीयासु परीक्षासु भागं गृहीतवतां छात्राणां वार्षिकसङ्ख्या (उदा-नेट्-स्लेट्-टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)<br>Remark : As per provided certificates by HEI, and excluding certificate which is beyond the assessment period so based on that DVV input is recommended. |

| | |
|---|---|
| 5.3.3 | Average number of sports and cultural activities / competitions organised at the institution level per year.<br>प्रतिवर्षं संस्थया आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां / स्पर्धानां सङ्ख्यायाः मध्यमानम्<br><br>5.3.3.1. Number of sports and cultural activities / competitions organised at the institution level year-wise during the last five years विगतेषु पञ्चसु वर्षेषु आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां/ स्पर्धानां वार्षिकी सङ्ख्या<br>Remark : DVV has made necessary changes as per supporting document shared by HEI and value have been downgraded as events under closure date has been counted as one |
| 6.2.3 | Implementation of e-governance in areas of operation<br>1. Planning and Development<br>2. Administration<br>3. Finance and Accounts<br>4. Student Admission and Support<br>5. Examination<br>क्रियान्वयनक्षेत्रेषु वैद्युतप्रशासनस्य नियोजनम्<br>1. योजना, विकासश्च<br>2. प्रशासनम्<br>3. वित्तं, लेखाश्च<br>4. छात्राणां प्रवेशः, प्रोद्बलनं च<br>5. परीक्षा<br><br>Answer before DVV Verification : A. All 5 of the above (अ. उपर्युक्ताः सर्वे पञ्च)<br>Answer After DVV Verification: E. ≤ 1 of the above (उ. उपर्युक्तेषु कश्चन एकः)<br>Remark : As per the revised data and clarification received from HEI, based on that DVV input is recommended. |
| 6.3.3 | Average number of professional development / administrative training Programmes organized by the university for teaching and non teaching staff during the last five years.<br>विगतेषु पञ्चसु वर्षेषु शिक्षकाणां वृत्तिविकासार्थं, शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च संस्थया समायोजितानां कार्यक्रमाणां वार्षिकी सम्पूर्णा सङ्ख्या।<br><br>6.3.3.1. Total number of professional development / administrative training Programmes organized by the Institution for teaching and non teaching staff year-wise during the last five years विगतपञ्चवर्षेषु शिक्षकाणां वृत्तिविकासार्थं, शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च विश्वविद्यालयेन समायोजितानां कार्यक्रमाणां वार्षिकयोगः।<br>Remark : As provided photographs are not geo tagged so based on that DVV input is recommended. |
| 6.5.4 | Quality assurance initiatives of the institution include:<br>1. Regular meeting of Internal Quality Assurance Cell (IQAC);<br>2. Timely submission of Annual Quality Assurance Report (AQAR) to NAAC<br>3. Academic Administrative Audit (AAA) and initiation of follow up action<br>4. Participation in NIRF<br>5. UGC Recognition for any other Academic Excellence or any other quality audit recognized by state, national agencies.<br>संस्थायाः गुणवत्ताश्वासनोपक्रमेषु अन्तर्भूताः सन्ति -<br>1. आ.गु.आ.केन्द्रस्य नियमितमुपवेशनम्,<br>2. रा.मू.प्र.परिषदे समयेन वार्षिकगुणवत्ताश्वासनप्रतिवेदनसमर्पणम् ।<br>3. शैक्षिकं प्राशासनिकं लेखापत्रम्, अनुगतक्रियाणामुपक्रमणम् ।<br>4. राष्ट्रियसांस्थिकश्रेणिकरूपरेखायां भागग्रहणम् ।<br>5. विश्वविद्यालयानुदानायोगेन मान्यताप्राप्तः यः कश्चन शैक्षिकोत्कर्षः अथवा राष्ट्र/राज्य अभिकरणैः मान्यताप्राप्तं किमपि गुणावत्ताङ्केक्षणम्।<br><br>Answer before DVV Verification : A. Any 4 of the above (अ. उपर्युक्तेषु केचन चत्वारः)<br>Answer After DVV Verification: C. Any 2 of the above (इ. उपर्युक्तेषु कौचन द्वौ)<br>Remark : As per the revised data and clarification received from HEI, based on that DVV input is recommended. |

| | |
|---|---|
| 7.1.1 | Number of gender equity promotion Programmes organized by the institution during the last five years.<br>विगतपञ्चवर्षेषु संस्थया लैङ्गिकसमतायाः संवर्धनाय निर्वर्तितानां कार्यक्रमाणां सङ्ख्या।<br><br>7.1.1.1. Number of gender equity promotion Programmes organized by the institution year-wise during the last five years विगतपञ्चवर्षेषु संस्थया लैङ्गिकसमतायाः संवर्धनाय निर्वर्तितानां कार्यक्रमाणां वार्षिकसङ्ख्या।<br>Remark : As HEI has not provided proper geo tagged photographs and report for each program so based on that DVV input is recommended. |
| 7.1.9 | Number of specific initiatives to address locational advantages and disadvantages during the last five years<br>विगतपञ्चवर्षेषु स्थानिकानि आनुकूल्यानि प्रातिकूल्यानि च मनसि निधाय प्रवर्तितानाम् उपक्रमाणां सङ्ख्या<br><br>7.1.9.1. Number of specific initiatives to address locational advantages and disadvantages year-wise during the last five years विगतपञ्चवर्षेषु स्थानिकानि आनुकूल्यानि प्रातिकूल्यानि च मनसि निधाय प्रवर्तितानाम् उपक्रमाणां वार्षिकसङ्ख्या -<br>Remark : As per the revised data and clarification received from HEI, based on that DVV input is recommended. |
| 7.1.10 | Number of initiatives taken to engage with and contribute to local community during the last five years (Not mentioned elsewhere)<br>विगतपञ्चवर्षेषु स्थानिकसमुदायेन सम्बन्धमनुवर्तयितुं, योगदानं कर्तुं च उपक्रान्तानाम् उपक्रमाणां सङ्ख्या (अन्यत्र अनुल्लिखितानाम्)<br><br>7.1.10.1. Number of initiatives taken to engage with and contribute to local community year-wise during the last five years विगतपञ्चवर्षेषु स्थानिकसमुदायेन सम्बन्धमनुवर्तयितुं, योगदानं कर्तुं च उपक्रान्तानाम् उपक्रमाणां वार्षिकसङ्ख्या<br>Remark : As per the revised data and clarification received from HEI, based on that DVV input is recommended. |
| 7.1.16 | Number of activities conducted for promotion of universal values (Truth, Righteous conduct, Love, Non-Violence and peace); national values, human values, national integration, communal harmony and social cohesion on the basis of Vedic and Sanskrit literature as well as for observance of fundamental duties during the last five years<br>विगतपञ्चवर्षेषु वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य वैश्विकमूल्यानां (सत्यं, चारित्र्यं, प्रेम, अहिंसा, शान्तिश्च) राष्ट्रियमूल्यानां, मानवीयमूल्यानां, राष्ट्रियैकतायाः, नानासमुदायसहभावस्य, सामाजिकसमरसतायाः, मूलकर्तव्यानामनुपालनस्य च प्रोत्साहनाय प्रवर्तितानां कार्यक्रमाणां सङ्ख्या<br><br>7.1.16.1. Number of activities conducted for promotion of universal values (Truth, Righteous conduct, Love, Non-Violence and peace); national values, human values, national integration, communal harmony and social cohesion as well as for observance of fundamental duties year-wise during the last five years विगतपञ्चवर्षेषु, वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य वैश्विकमूल्यानां (सत्यं, चारित्र्यं, प्रेम, अहिंसा, शान्तिश्च) राष्ट्रियमूल्यानां, मानवीयमूल्यानां, राष्ट्रियैकतायाः, नानासमुदायसहभावस्य, सामाजिक-समरसतायाः, मूलकर्तव्यानामनुपालनस्य च प्रोत्साहनाय प्रवर्तितानां कार्यक्रमाणां वार्षिकसङ्ख्या<br>Remark : As provided photographs are not geo tagged so based on that DVV input is recommended. |

**2.Extended Profile Deviations**

| Extended Profile Deviations |
|---|
| No Deviations |